Sanskrit Classical Works Series : 1

VIRŪPĀKSHA VASANTŌTSAVA CHAMPŪ

VIDYARATNA R. S. PANCHAMUKHI, M. A.,
Director of Kannada Research (Retired).

KANNADA RESEARCH INSTITUTE, DHARWAR.
1953

Published by
S. S. Malwad, M. A.,
Director, Kannada Research Institute,
Dharwar.

Printed by
K. G. & A. S. Jathar,
Karnatak Printing Works, Dharwar.

CONTENTS

		Pages
1.	Introduction	i–xvi
2.	Text	१–१११
3.	Some suggestions regarding the text . . .	1–2
4.	Errata	3–7
5.	Index to verses	1–14
6.	Index to important words	15–18

INTRODUCTION

The *Virūpāksha-vasantōtsava-champū* is a fine Sanskrit work composed by poet Ahōbala, as can be gathered from the opening verse of the *Uttara-Turya-Kāṇḍa* of the work.

श्रीपंपेशरथोत्सवाश्रितकथा सेतां सपूर्वेक्षणां
सुप्रीतः पुनरादिदेश तमिमं विप्रं ततः किं परं ।
ब्रूहीति स्वयमेवमुत्तरमयं प्राह द्विजोऽहोबलः ॥ (p. 57).

The work is divided into two sections— the first section comprising the first three *kāṇḍas* or chapters and a part of the fourth chapter which deal with the car-festival of the god Virūpāksha at Hampi and the second section forming the remaining part of the fourth chapter or the *Turīya Kāṇḍa* which describes the hunt-festival or *Mṛigayōtsava* of the god Virūpāksha and the other relevant ceremonies terminating with the final ablution (*avabhṛitha*). The manuscript copies of the work on which the following text is based were purchased from Drs. N. Venkataramanayya and V. Raghavan of the Madras University. The festival of the Vasantōtsava is said to last for nine days commencing from the *Dhvajārōhaṇa* festival on *Chaitra śuddha navami* and ending with the *avabhṛitha* abluation on *Chaitra vadi dvitīyā*. The extant portion of the work describes the festival of the Simhavāhana which takes place on the day previous to the car festival. The two copies of the manuscripts appear to have been derived from the same original and as such there is no difference in the readings or the arrangement of matter. The original copy is not available to me for comparison of the readings. It seems that the original manuscript is possessed by M. Ramakrishnakavi, M. A., Madras, who lent it to Dr. Venkataramanayya for copying. The copy of Dr. N. V. Ramanayya may be taken to be fairly accurate.

The main contents of the Champu

The poem begins with the description of the car of Shri Virūpāksha. On this occasion of the festival, numerous people had gathered there and feasts etc. were continuously going on.

There was a brahmin there, who had the position of the worshipper of the God. He was very greedy and was not satisfied at the lot of money he had earned. At this festival a number of his relatives—his father-in-law and his relatives–had assembled there in his house. This was worrying him much. He collected much money from merchants etc. saying that he would perform 'Paṁchāmṛitā-Abhisheka' to the God; but however he pocketted that amount, finishing the Abhisheka just with water.

For this mischief of his, he was caught by the Parapati but later on however, he was excused by the king and let off. The Brahmin (manager of the temple) went to the garden outside to attend the feast, which was arranged there. Greedy as he was, he ate so much that it was impossible for him to get up without the aid of his wife.

He went home, but was not relieved of the worry since he had so many guests, who were the relatives of his wife. So he complained of this to his wife. She assured him that her relatives did not take any food from others, but only gave it to others. So there was absolutely no worry for him; only it was enough if he would spend a few words. The Brahmin was content with this.

There were others also in the gathering namely the Kshatriyas, Vaiśyas, Sūdras etc. All these were happy, since their desires of trade etc. were fulfilled. The courtesans too had assembled and earned ample money. Thus everybody was pleased and was eager to witness the car festival. There were men,

women, lovers, beloveds and also those whose husbands had been on journey and those whose husbands had returned from journey.

There had come a gallant, who was suffering from the pangs of seperation from his mate. He was pleased to see her there and having met her after some time, felt much contented. There were many such others, who had come for the car-festival. There were others also, who aspired for Mōksha.

The beginning of the festival was indicated by the beating of the drum and the gathering then grew so large and thick that there was hardly any space, even for an ant to move. The king of Vidyānagara too was present there. There were many other kings like the king of Kashmir, of Srī Rasidesa, Mokshapura, Balari-Nagara, king of Vanechara family, king of Harapura, Bhujanaganagara and many others.

By this time the two idols of Śiva and Pārvati were placed in the car and the Prasada was distributed to all after proper worship. The great sage Vidyāraṇya got up in the car with his pupils and followers; and the worship of the car and the images of Gods then followed.

The Brahmins proceeded to draw forth the car but it did not move. Thereupon, the king was called to propitiate the god. The king came andworshipped the car and taking the rope in his hands, he pulled it and the car moved forth.

There was another car presented by a merchant named Paṁpārya and it was drawn by the merchant and the Sūdra classes.

The car drawn by the Brahmins started running, and latter stopped at a place, being prayed to, by the people. The other car too was coming slowly. The drawing of the car proceeded and both the cars came near each other.

There was sun-set. The people were pleased and the God also granted their desires. The moon came up. The people thought it fit to take the car to its proper place and so drew it forth again.

The car came to its destination and the festival of that day ended with proper ceremonies and worship of the idols of Gods which were brought from the car, and were placed on a jewelled seat. Thereupon, all retired to their respective places.

There is a small episode of two lovers who were in pangs of separation and who after-wards were united.

The third chapter closes with the praise of the poem.

The fourth chapter commences with the description of the hunting festival or the 'Mṛigayā-Mahōtsava' which formed a part of the Vasantōtsava.

After the festival of car was over, all the people returned home. But there was one Brahmin who thought that it would be fun to go to the other side of the river, and decided to go there with his friend, who was the son of the minister of the king of Śrīrāśidēsa.

They proceeded on their walk in the thickets, but the Brahmin youth felt afraid. But on being assured of safety by his friend, he went further and both enjoyed the sylvan beauty. They saw a Bilva tree and in that connection, the poet tries to tell about the non-difference between Saiva and Vaisnava sects remarking that the *Bilva* tree is the Lakshmi.

They crossed the Hanumat rivulet, and proceeded to Vālibhaṇḍāra Śaila. It was late in the day and the Brahmin wished to return lest it should be late to witness the hunting festival of Śiva.

On their way back, they met a tiger, whereupon the Brahmin youth being terrified, prayed to God. In the mean-time God

himself came there and killed the tiger. He bowed to the Brahmin and said that he was 'Dvijarājaśēkhara Vīrabhaṭa' a servant of Śiva. The Brahmin called him as Rājaśēkhara himself rather than his *bhaṭa*.

That Bhaṭa gave them a ring bearing the words 'Śrī Virūpāksha'. This convinced them that he was Virūpāksha himself. Thus over-joyed at the sight of Śiva, they arrived at Pampā city in the evening.

God wandered in the forest where he met divine ladies who compelled him to enjoy with them. Then with Ganga on the head, He returned to Pampa.

The image of Pārvatī was placed in the quadrangle of the temple, but the image of Śiva was stopped on the way with a veil-indicating thereby that Pārvatī had frowned on him and did not allow him in.

After the worship of Śiva and a mock-fight there follows a lively conversation between Pārvatī and Śiva (people on two sides reciting them). Thereafter, Śiva is let in and then *Avabhṛita* ceremony follows.

The seat of God was brought near the 'flag post' and after proper worship the flag with the mark of the bull was lowered down.

The festival was thus concluded after worship, of God so many times; and all the gathering scattered. Some left for their places and some remained, thinking of going after finishing the meals. Of such people, there were some who stayed at the greedy Brahmin's house. The Brahmin was shocked to know this and pretended to be sick, in order to send them away.

At this his wife started weeping and her father consoled her and went to call a physician. But a pupil of his, began to tell her a story to console her. The story is of a greedy Brahmin,

who, through fear of progeny did not even unite with his wife. But some how, he did so, and got a son. He with great difficulty, gets a bride to his son. The bride's father too is as stingy or even more than himself. In a lonely forest they celebrate the marriage, but there too God Śiva, presents himself with his wife in the form of a Brahmin couple. He asks for Dakshina; but the Brahmin refuses. He asks him to come to his town and take some thing. Śiva does so. There too the Brahmin tries to avoid by even pretending to be dead. Śiva does not leave, and even proceeds to burn him. Yet the Brahmin is resolute and does not move. Śiva being defeated shows his real form to him and blesses him.

The pupil says to the wife of the Brahmin that it was such sort of sickness, with which her husband was laid down.

By that time the Lord of Shri Rasi dēsa came thare and gave some money to this greedy Brahmin, to arrange a feast whereupon the 'sick' son-in-law got up and pleased all his relatives with the dainty dishes.

After that the people left for their houses.

The poem ends with the Mangala verse in praise of the work.

The *Champū* is important in more than one ways. Firstly, it throws considerable light on the various ceremonies that used to be performed in the Spring Festival of the god in the Vijayanagara period and how far it has come down to the modern time in its unmixed character. The poet was a personal witness of the celebration and the details furnished by him though couched in the poetical garb, are not the pigment of his imagination. Secondly, the narrative refers to a large number of contemporary events, personages, kings, chiefs, poets, philosophers etc., who had attended the festival and had taken active part in the several functions of the celebration. Thirdly, the work is a fine Sanskrit

composition, approaching the effects of Bāṇa in the descriptive prose passages and simple style of Kāḷidāsa in the poetical portions. The language and sentiments flow spontaneously without the artificial attempt at imitation.

Author, Ahobala

As stated above, the poet Ahōbala the author of the *Champū* had personally attended the car-festival of god Virūpāksha at Hampi. He introduces himself as the poet who was acquainted with all the kings and chiefs that had assembled at the procession as can be seen from the verses :—

तत्रत्यास्तमपृच्छदेवमवनीदेवोत्तम त्वं कवे ।
भूपालानखिलानिहागतवतो जानासि कोऽयं वद ॥
सोयं प्रत्यवदत्स एष खलु तद्राजान्ववायोद्भवो ।
विद्यारण्ययतींद्रनिर्मितपुरश्रीचक्रवर्ती नृपः ॥ (p. 14)

The poet goes on narrating about the princes one after the other. He is further requested to describe the chiefs standing in the main road upto the car. इमानवनिपालकान् कथयभूसुरेंद्राऽऽरथम् ॥ (p.23). Since the first verse of the fourth chapter clearly states that the earlier narrative (श्री पम्पेश ! रथोत्सवाश्रितकथामेतांसपूर्वेक्षणां श्रुत्वा...(p.57) was made by the same author as the one who described the later events, the whole work is no doubt the composition of Ahōbala who is however introduced in several places as कश्चित कविः or विपश्चित्. It may not be wrong to think that the same Ahōbala accompanies the son of the Minister of the king of Śrīrāsidēśa in the forest rambles where they had to encounter a ferocious tiger but escaped from the clutches of that animal through the intervention of god Virūpāksha who appeared as Rājaśēkhara in a hunting dress. Thus, as given out in the *Champū*, the poet Ahōbala whose ancestry is unfortunately not disclosed to us was a person of great eminence known to the king of Vijaya-

nagara and his subordinate chiefs who appear to have held him in high esteem.

He seems to have been a scholar of no mean order being learned in the several sciences like काव्य, नाटक, अलंकार, व्याकरण, तर्क, वेदांत and मीमांसा etc. The simple but dignified verses and the high-flown alliterative and figurative prose passages in the champū (see e.g. pp. 14, 18) bear ample testimony to the command the author possesses over the Sanskrit language and literature. His description of the forests on p 60-62 in the Turīya Kāṇḍa is very graphic. The Virōdhābhāsa, Ślēsha, Upamā and Rūpaka are frequently employed and their effect in general is good though in some places the long compound and the imitation of Bāṇa mar the normal course of the story (eg. p. 66). The expressions like

१. एकदेशविकृतमनन्यवद्भवति (p. 43).

२. तत्पुरुषस्समानाधिकरणः एवास्तु न व्यधि
करणः बहुव्रीह्यादरस्तु प्रपंचानुसारीति
रीतिरियं रामेश्वरेऽपि विचार्यताम् । (p. 64).

३. गन्धवतीं पृथिवीमितस्ततो जिघ्रन्निव (p. 65).

४. स्पार्शनप्रमाणसिद्धस्पर्शन etc.

५. त्वमेव खलु मुख्यप्राणरूपेण निखिलप्राणिष्वन्तर्यामितया चरसीति ! (p. 45),

are indicative of his scholarship in *Nyāya*, *Vyākaraṇa* and *Mīmāṁsā*. He is a keen observer of the society and the humorous description of the worshipper's dealings with the pilgrims in the Virūpāksha temple when the latter had come with offerings for the god, and his feigned attitude assumed to avoid the rush of his relatives who were to be fed by him during the car festival and also the narration of the sub-story of the marriage of a miser's son with the daughter of his equal, another miser from Gauḍadēśa, in the forest are some of the master strokes of the author in the delineation of humour in the poem.

The poet Ahōbala is not known from any other source. From the references contained in the present work recorded by him as an eye witness to the car festival of the god Srī Virūpāksha, which Srī Vidyaraṇya with his pupils is stated to have graced by his presence, it is evident that the author was a contemporary of Srī Vidyāraṇya and lived in the beginning of the 14th century A.D. The Vijayanagara king who celebrated the festival under his personal attendance is called Dēvarāya which must be taken to be a general name for the honourable lord the king applied to Bukka or Harihara II. The expression श्रीविद्याकमलानवीनपुरतो भूयः समागच्छताम् showing that Vidyānagari and Kamalapura were newly built towns also shows that the author lived when the city was just constructed under the inspiration of Srī Vidyāraṇya after whom it was named (p. 14).

Historical importance of the Champu

There are very few works in Sanskrit that throw light on the political and social history of India in general and of Karnatak in particular. Works like Rājataraṅgiṇi, Navasāhasāṅka-charita, Vikramaṅkadēva-charita, Rāshṭrauḍhābhyudaya, Kumārapāla-charita etc. are only a few names in the vast mass of the Sanskrit literature that directly deal with historical events. For the history of Karnatak, there have been known to exist no doubt, some works of the Vijayanagara period as *e.g.* Madhurāvijaya by Gangādēvī, Amuktamalyadā by Krishṇadēvarāya, but the number is too small. The present work *Virūpāksha Vasantōtsava Champū,* is a welcome addition to the list. The description of the car festival has been made the subject matter of the work in which a good deal of historical material is furnished. It may be observed that no other epigraphical or literary evidence is forthcoming to corroborate the particulars given above and as such they have their own interest for the student of history and literature.

Ahōbala mentions the following kings and chiefs as being present at the car procession of the Spring Festival of Śrī Virūpāksha.

1. The first noteworthy person mentioned by the author is the king of Vijayanagara who is referred to as the lord of Vidyānagara or Vijayanagara. He belonged to the lunar race (सोमान्वयपयःपारावारसुधाकरः) and his capital city was constructed by the saint Vidyānagara-yati (विद्यारण्य यतींद्र निर्मितपुर श्रीचक्रवर्ती नृपः.) The king's name is not given, but there appears to be a veiled reference to Dēvarāya in the expression मदीयं वेत्याहर्निशमिममहो देव–नृपते । मया दत्तं सर्वं... (p. 5) but this does not agree to the time of Vidyāraṇya who happens to be present at the festival with his pupils. Neither Dēvarāya I nor Dēvarāya II could be contemporaries of Vidyāraṇya. So the expression देवनृपते is evidently only an honorific term referring to the king in general.

It is further stated that the king had not by the time of this car-festival, become the lord of Mahīśurapura (Mysore ?) and Chandra-śaila *i.e.*, Chandra-giri or Chandragutti. (pp. 14–15).

2. The next important chief is the king of Kashmir, lord of the Northern region who is referred to as *Aśvapati*. (p. 16).

3. The chief of Sirsi who apparently wore the Śivaliṅga (द्विजराजशेखरलिंगधरोऽपि) and was thus a Lingayat by caste.(p. 16).

4. The chief of Mōkshapura whose name was Dēvarāṭ or Dēvarāya. He is stated to be a favourite devotee of Mallēśvara and a patron of great poets (कवींद्रपरिवेष्टितः). Mōkshapura is probably the Mōkshaguṇḍam in the Kurnool District where the temple of Mallēśvara is still a famous shrine. (p. 17).

5. The chief of Ballāri-nagara (Bellary) who was a favourite of Brahmans the devotees of god Siddharāmēśvara. He was

highly praised by poets in their works, *ākhyāyikā, ākhyāna* and *itihāsa*. (p. 17)

6. The chief of Rājadurga-nagara (Rāyadurg) was the Sēnāpati of the lord of Vidyāpura *i e.* the king of Vijayanagara. (p. 17).

7. The chief of Chitraśilā-nagara who was a hunter by caste (वनेचरवंशसंभूतः). (p. 18 ;)

8. The chief of Harapura; perhaps the king of Harihara. He is described in the verse as :—

> तदीयसदनुप्रह्लादरिपुरांतकः शंकरः ।
> सहस्रशरणार्थिनां हरपुराधिपो वर्तते ॥ (p. 18).

9. The chief of Bhujaṅganagara (Hāvanūr in the Haveri Taluk of the Dharwar District) who was a devotee of Mallārigiri Mahādēva. Mallāri is the god Śiva who destroyed the demon Malla with the aid of his retinue numbering "Seven crores". Ēḷkōṭi, Ēḷkōṭi' (Seven crores, Seven crores) is the usual cry of the pilgrims who go to the god Mallāri (Śiva) at Dēvaraguḍḍa in the Ranebennur Taluk. This is hinted in the passage यात्रागत सप्तकोटि भक्तोद्धूत करदीपराजिनीराजितापादमस्तकनिरस्ततमस्तोमोपलक्षितसमस्त-वस्तुविस्तारितापणश्रेणीगणजटापटलमल्लारिगिरिमहादेवानुगृहीतः which states that the chief was favoured by the god at Mallārigiri who was hallowed by the lights waved by the Seven Crores of devotees. (p. 19).

10. The chief of Lakshmaṇēśvara purī *i. e.* Lakshmēśvara near Gadag. This place is called Lakshmaṇēśvara in an inscription of Lakshēśvara (*List of Bombay-Karnatak Inscriptions*–No. 47 of 1935–36). There is also a temple of Īśvara at the place which was known by the name Lakshmaṇēśvara. (p. 19).

11. The chief of Daṁbaḷa-pura-dēśa (Daṁbaḷ country) in the vicinity of Kapōtagiri known locally as Kappata-guḍḍa,

whose sway extended to the *agrahāra* village Gadādharapura (Gadag). He was the devotee of god Śrīnivāsa the lord of Veṅkaṭāchala which apparently refers to the god at Veṅkaṭāpūr near Gadag. His camp was pitched in the great hall in front of the palace of the king of Vijayānagara, at Hampi. (p. 19).

The lord of Dambaḷapuradēśa is credited with the authorship of several Sanskrit works on the Vedic, Smṛiti and Sāhitya subjects like Baudhāyana-Gṛihyasūtra, Śiva-nāṭaka, Vaidikāchāra-nirṇaya etc. He is said to be the pupil of Sadgurūpādhyāya and to have mastered the Advaitasiddhānta-Vēdāntādhikaraṇa Ratnamālikā. (p. 19).

12. Many other chiefs also had attended the car-festival. Of these, the chiefs of Vamśanāma-nagarī *i. e.* Vēṇugrāma (Belgaum or Baḷḷigāve) and Pāmuḍipaṭṭaṇa find a special mention. (p. 19).

The foremost among the witnesses of this sacred function was Śrī Vidyāraṇya who had ascended the car with his pupils (ततो विद्यारण्याभिधयतिवरे भूसुरगुरौ । समारूढे शिस्यस्सह रथमिमं हर्म्यसदृशं ॥ p. 21). He is mentioned with the highest respect in the work in the following words :— द्विजराजशेखरगुर्वनुज्ञया द्विजराजशेखर गुरुभूमण्डलाचार्य विद्यारण्यमुनिवर्य यतीश्वर चरणेषु शिष्यैः सह ततोऽवरुह्य पुरोगतेषु. The temple car was decorated with golden pinacles placed on the long central pillars, the door planks on the four sides of the central *maṇḍapa* being painted with paintings (चित्रकरचित्रित चतुर्द्वारफलकं). Beautiful portrait figures of Kāma (cupid) and his retinue had been placed in the front row. People congregated from far and near in hot haste to see the festival. The distant religious centres like Svētāśvattha etc., (श्वेताश्वत्थादि दूरतीर्थस्थल) are mentioned among the places from where the pilgrims came. After the car procession was over, the pilgrims—some of them–busied themselves in making purchases in the fair. The poet gives a graphic description

of the doings of the Brahmin pilgrims after the car-festival was over : feeding of Brahmins, purchasing of the vessels and clothes, meeting of the villagers and their departing for their respective places in their vehicle—horse, cart etc., from the newly founded towns Vidyānagara, and Kamalāpura (श्रीविद्याकमलानवीनपुरतो भूयः समागच्छताम्).

There was another car which had been constructed by the rich Śaiva merchant Pampārya and given away to the temple as a religious gift. This was also carrying the idols of Śiva and Pārvati, but different from the original ones which were seated in the central *maṇḍapa* of the old car. The car of Pampārya (पम्पार्यरथ) was being dragged by the merchant class and the Śūdras whereas the old car was dragged by the Brahmins only. The several ceremonies and customs that attended the procession are described in detail most of which have come down to the present day uninterruptedly.

General

The *Champū* discloses information on the society of the period. The details and ceremonies observed in the daily worship and on the occasion of the car festival in particular conform to the injunctions recorded in the Dharmaśāstra texts and are handed down to the present day in practically the same form. The gathering of the crowd consisting of all sorts of persons from the devotees to the thieves was collected from the neighbouring as well as distant regions. The people left their homes under lock and key to witness the God in procession (अयःकीलसंकीलित-कवाटतटपिनद्धद्वारान् पिधाय— p. 13, बध्द्वा कवाटमविलम्बितमागता ये ॥— p. 27). The crowd raised a huge shout as now, (नमः पार्वतीपते ते हरहर महादेव— p. 27) on seeing the decorated car and threw at it cocoanuts and dates in token of their respect and joy at the procession

(जनास्तस्मै (रथाय) फलान्यर्पयामासुः — p. 28, बभूवुश्च कचित्फलैर्लोकमुक्तै । विभिन्नोत्तमाङ्गा बुधैर्निन्दिताश्च ।— p. 22). The parapharnalia of the procession consisted of the Brahmins, who chanted the Vedic hymns, the songsters and musicians with their attendant drummers etc., the dancing girls who propitiated the deity by their dances (अंतरांतरा नटंतीषु वारवनितासु — p. 33), the worshippers, learned scholars with their pupils who were given a prominent seat on the car itself and lastly the kings and chiefs who stationed themselves in the front row and paid homage to the deity by their services. The Brahmins who were fatigued by heat and continued recitation of the *mantras*, were served at intervals by the devotees, sweet drinks and pulses etc., सगुडोदकचणकदल सदक्षिणतांबूल etc. (p. 35).

The occasion is availed of by the poet to describe the movements of the various kinds of pilgrims that had gathered. The religious people as now performed the feeding of Brahmins, the greedy begged of alms and thieves set their hands on others' goods. The usual custom of making purchases of vessel and garments on such occasions is also recorded. The young couples roamed in the car-street hand in hand and purchased fruits and flowers for the god (अत्रैव खलु यात्रागताअपि जनाः.... सप्रियाः सकुलटा विटा इव निर्लज्जास्सन्तो दिवाऽपि परस्परालम्बितकरा एव विनोदेन रथ्यायां चरंतः — p. 46). Some people witnessed the drama enacted in honour of the god by the best actors (हरिहरचरित्रं सुमहितं । परस्त्रीमोहार्थं सरसमभिनीतं नटविटैः । — p. 39). Whether *Harihara Charita* was then ame of the drama or only the subject matter cannot be said. In any case the drama should have been composed in Kannada to be intelligible to the congregation.

It is stated as a tradition current during the period that the huge boulder known as Vālibhaṇḍāra which still exists near

Kishkindhānagara (Ānegondi) was considered as a bolt placed against the cave containing vast masses of wealth and bore the mark indicative of the hidden treasures. The modern treasure-hunters are said to have tampered with the rock but with no success (अद्रिमूलावलो-कितबिलद्वारघटित ... सुग्रीवाग्रजभंडार ... स्थूलोपलास्सर्वेऽप्येते भवंति निधानगर्भाः —p. 64).

The following are some of the sayings which were in common currency and give a glimpse about the general belief among the people :—

१. कृतागरस्स्वपि ब्राह्मणेषु आग्रहो न कर्तव्यः । —p. 7.
२. मार्जालचेष्टितानीव मूषकस्य प्राणसंकटकराणि बभूवुः । —p. 88.
३. विवादश्च विवाहश्च समयोरेव शोभते । —p. 94.
४. पश्चाच्छब्दो नास्तिपर्यायः । —p. 106.
५. गरीयासी केवलमीश्वरेच्छा । —p. 91.
६. शुभस्य च शीघ्रमशुभस्य कालहरणं कर्तव्यमिति । —p. 95.
७. चक्षुः पश्यति नैवमन्यपुरुषं चन्द्रं चतुर्थ्यां यथा । —p. 41.
८. परसदननिविष्टः को लघुत्वं न याति । —p. 88.
९. अपुत्रस्य गतिर्नास्ति । —p. 89.

The topography of Hampi and the adjoining area can be made out by the references to the Guñjāmādhava, Pātāla Virūpākshadēva, Hēmakūtā, Maṭaṅgparvata, the lake called Hanumatsarōvara, Lakshmī-vṛiksha, Vāli-bhaṇḍāra, Gaṇḍaśaila etc.

The description of the movement of the car through the main gate to the destination and the hospitality shown to the *dvijas* (Brahmans) on the way, by the devotees by offering tiffin, and syrup (sweet cold drinks) to appease their thirst reminds one of the festival being celebrated in the modern times at Haṁpi. References to the main front gate as श्रीविष्टपेशगुरुगोपुर which is still known as *Vishṭapēśa gōpura* or *Bishṭappayyana gōpura* and describing it as a step to the heavens (दिवः सोपानं वा) *i.e.* so

high as to reach the skies, are noteworthy. The author mentions the coins current during his time as having the stamp of Varāha (कनकशकलं मुद्रित महावराहम्—p. 8) and bearing the legend Śrī Virūpākshadēva in Nāgarī lipi (रत्नांगुलीयकं श्रीविरूपाक्ष इति पञ्चाक्षरी स्फुरतीति p. 69) (श्रीविरूपाक्षदेवनामवर्णावलीस्फुरदंत: प्रभापुंजितरत्नांगुलीयकम् — p. 68). It is well known that the Vijayanagara kings had the boar as the distinctive mark of their family on their coinage and bore the legend Śrī Virūpāksha.

Since the author Ahōbala professes to be an eye-witness of the car-festival when Śrī Vidyāraṇya and the several kings and chiefs including the chief of Pāmuḍipaṭṭaṇa who was his patron, had personally attended the procession, one is driven to conclude that he lived in the second half of the 14th Century A.D., contemporaneous with Śrī Vidyāraṇya.

The poem is thus a very useful composition for the contemporary history of the Vijayanagara period throwing much new light on the political and religious conditions when the new Hindu empire of Vijayanagara was founded.

—R. S. Panchamukhi

विरूपाक्ष वसन्तोत्सव चम्पूः

(अहोबलकविकृता)

.... छादितातिशीतलकुल्या जलस्थलरमणीयोद्यानमास्थितेषु केषुचित् अस्मिन्नेवदिने [1]समासादितैर्द्वित्रैर्वा ब्राह्मणैस्सहस्राराधनफलमेति......... .... यैवतपनातपतप्तान्यपि सरिद्गतायतशिलातलान्यास्थितेषु केचन तीर्थद्विजालाभेऽपि पम्पापतिप्रीणनाय स्वावास एव स्वि........

...........विबुधा महाख्य-
यज्ञर्त्विजस्तु चपलं शिवलिङ्गमूर्तिम् ।
सम्पूज्य कुण्डनिहितेषु हुताशनेषु
हुत्वा हवींषि बलिदानविधौ प्रवृत्ताः ॥

तदनु कार्यकारि .... निबद्धशिवमहारथमुदञ्चितोदयशिखरिशिखराधिरूढपूर्णचंद्रमनीषावहमध्यमहोन्नतस्तम्भाग्रसंकलित कलधौतकलशोपशोभितं चित्रकरचित्रितचतुर्द्वारफलकं............पंचास्यपंचजनप्रपञ्चसुकुमारसुकुमाराङ्गानङ्गसेनायितसुन्दरसालभञ्जिकापुञ्जैरलङ्कृतं विधाय विरूपाक्षदेवसत्त्रोद्योतकपताकैरलंकर्तुमारभत्सु[2] केचिच्चिरन्तनफला .... रज्जून् सङ्घेन युगैश्च समूह्य शनैश्शनैः कथञ्चित् आनिन्युः ।

विप्रास्ते वरशाम्भवागमविदो रथ्यागतास्सत्वरं
पम्पाधीश रथाश्रितामरगणं तामातितृप्त्यै (?) तदा
........विधाय विधिवत्संस्थापितेऽग्नौ हवि·
हुत्वा भूतबलिं विधाय परितो यागस्थलीमाप्नुवन् ॥

---

1. क. समाराधितैः
2. Read आरभमाणेषु

तदनु— पुमर्थार्थालोक: ....

............कलितैस्साधनचयैः ।

अवाप्ताभीष्टार्थः पुनरपि च लोभे न निरतः

बभूव श्रीपम्पापतिरथदिने तत्र नितराम् ॥

तत्र— धमा ....कौतुकनिरीक्षणायेवान्तारिक्षान्तरक्ष्माभृच्छिखरोपगतेन भास्करेणानतिसन्निहितमहोत्सवमध्याह्नसमयः प्राप्त .... वीक्षयाऽऽपणान्तराले विक्रियमाणसाम्बशिवसमाराधनसत्रदीयमानमृष्टान्नाज्यप्राज्यभोज्यवस्तुसम्पूर्ण-भक्ष्यभक्षणक्षणातितिक्षाक्षीणातपसन्तापसं ....स्थापितार्द्रवसनच्छायायामुपभुक्तलधौतशकलदक्षिणावाप्त्ययभिवृद्धामोदभरभरितोदरभरेण शनैश्शनैरागता-नवनीसुरान् निजावास प्रपामण्टप.... कटास्तरणचन्दनविलेपनव्यजनपवन-पावनपानीयादिनाध्वश्रममपनोद्य कथञ्चिदुपचारैऽस्सन्तोषयन्त ईश्वराराधनापा-दितधर्मविशेषमल............

स....देवालयवलयसालान्तरगतं

स्थलं प्रत्यानीतं जलमखिललोकाय सरितः ।

ददन्नित्यं पम्पापतिरथदिनेऽन्नं गुडयुतं

दरिद्रोऽपि क्षोणीविबुधवरसङ्घा ... ॥

....नगरे जनेष्वनेकविधधर्मसंग्रहकरेषु द्विजेन्द्राः केचिदयाचितार्था-पेक्षिणः नृत्यकविरूपाक्षार्चनं विधायाग्निहोत्रादि वैदिकसत्कर्मनिरताः स्नावा-....भक्तयोगक्षेमधुरन्धर श्रीपरमेश्वरप्रचोदित भाग्यवत्समर्पितधनानि प्रति-गृह्य संतुष्टा बभूवुः ।

ये तत्र महिता विप्राः उञ्छवृत्त्युपजीविनः ।

तेऽपि तु......सार्थदानतः ॥

तदनु तत्रत्या देवार्थार्थे लोभिलोकाः क्षेत्रवासिकृत्योपायैस्सङ्गृहीत बह्वर्था अपि धर्मार्थिन इवातिलोभेन अनतिसन्तुष्टाः पुनः पुनः ... ... अभवन् ।

जनाश्रयगृहो महीसुरवरोऽधिकार्थातुरो
महेश्वरमहोत्सवादिमादिनात्प्रभृत्यन्वहम् ।
धनं बहु समार्जे.............................वान्
स्थितिं श्वशुरबान्धवान्निजगृहे व्यतन्वन्निति ॥

अपि तु द्विजोऽयं साङ्गोत्सवावलोकनेच्छया........नगरमागत्य "निरहङ्कृतिर्बान्धवरीतिरनाह्वानगमनादि" रिति "स्वत एव [1]जनकजन्युचितमपत्यसदनानुसरणमिति .... त्वपिजामातृगृहप्रवेशः कर्तव्य" इति वा प्रतिशरत्क्रियमाणचैत्रोत्सवसमयेऽन्यत्रैव निवसद्भिरस्माभिरस्यां शरदीह-जामातृगृहं प्रतिगन्तव्यमित्युपसृत्य तत्रैव-कृतावासैरेतैः श्वशुरबान्धवैरेतस्मिन्दिने पार्वतीपरमेश्वरप्रीणनाय क्रियमाणसकूर्पासादिशूर्पमृष्टान्नदानसत्राङ्गीकृतामन्त्रण .... भार्यात्वस्माकं अपत्यमित्यागमनदिन एव आगमनदिनादेकदैवामन्त्रितेत्यामन्त्रितस्सन् प्रातरेव गृहान्निर्गत्यानेकभाग्यवद्वणिग्जनादेकशो........अधिकारिपुरुषाज्ञातमेव पम्पेशाभिषेकं कारिष्यामीति बलाद्गृहीतवेतनाराधनसाधन मूल्यधनो निजमन्दिरमेत्य तत्रत्यनिवेदितपुरारामस्थल प्रवर्तित [2]निष्टन्न पानजनितया त्वरया कथञ्चिदेव देवालयान्तः प्रविश्य जगदीशाय जलमात्रमर्पयन् तत्समयसमागतेन श्वशुरशिष्येण सत्वरमागच्छेति समाहूतस्तो....द्वयः प्रसादकुसुमान्यदत्वैव कथं गन्तव्यमिति चिन्तां दुरन्तां परमवाप ।

ततस्तं प्रहीयाशु गच्छामि गच्छे-
त्ययं भूसुरो भासुरेशानपूजाम् ।
विधाय क्षणादेव निर्गत्य वैश्या-
नपश्यन्नृपं चापि पञ्चाननाभम् ॥

तत्र श्रीविरूपाक्षदेवाभिषेकार्थं अन्तःप्रेषितस्तीर्थवासी ब्राह्मणः म ....मा भाष्य स्थितेषु वैश्येषु मदीयो मदीय इत्युपसृत्य प्रसादकुसुमभिलाषेण प्रसारितकरेषु परस्परावेदनीय इति मत्कृतः शिवाभिषेकः कथमेतैर्युग....प्राज्ञेन राज्ञापि

---

1 जनकजनन्युचितं ?

2 Read मृष्टान्न

ज्ञात इति। कस्यवानये प्रसादकुसुमानि देयानीमानीति बहुषु याचकेषु लोभिनमिव अदत्वैव निर्विण्णमेनमवनीसुरमनवरताभिषेककारिताभूप····उवाच देवम्:—

ननु ब्रह्मन्नेतैः किमपि तव दत्तं किमथवा
भवानेवैतेभ्यो दिशति शिवलिङ्गार्चनफलम्।
मदीयं वेत्याहर्निशमिम महो देवनृपते
मया दत्तं सर्वं फलकुसुमपञ्चामृतकृते॥

अपि चानेन पम्पापुराधिकारि पुरुष गृह्यमाण पूजापणार्थपरिमितैव मत्कृताशिवार्चनवेतना भवद्देयावशिष्टार्थ लाभो भवत इति निर्बन्धनिबद्धान्मत्पूर्वमेव सा गृहीतेति पृथक् पृथक् [1]कथानावसर इव दैवादागतोऽधिकारिपुरुषोऽपि किमेतदित्येतावपृच्छत्।

ततस्तेऽब्रुवन्पूर्ववृत्तान्तमेत-
न्निशम्याधिकारी पुरस्स्थानुवाच।
भवद्भिः कियद्दत्तमस्येति तेऽमी
अवोचन्नही ···· यती वेतनेति॥

तत्र कश्चिदपारमार्थिकोऽल्पो वैश्यः समानकृतबलात्कारकारित पम्पाधिपाभिषेकोऽपि लोभेनात्मदत्तमपि शिवार्चनोपयुक्त फलकुसुमसलिलाक्षतपञ्चामृतमूल्यमि····वनेन गृहीतमित्यवोचत्।

एतन्निशम्य वचनं सपुराधिकारी
प्रोवाच भूसुरमिमं ननु दुष्टविप्र।
देवाभिषेचन कृते भवता गृहीता
या वेतना भवति सा पणसम्मितैव॥

किञ्च वञ्चनया पञ्चामृतादिमूल्यमप्यधिकं गृहीतमिति

ततो राजावोचत्परपातिमिमं भूसुरवरं
प्रभाते श्रीपम्पापतिपरमपूजार्थमनिशम्।

1 Read कथनावसर

धनं दत्वा यावत्तदभिलषितं ता........
तथार्घ्यार्थं चायं नगरमिममध्यासयति मे ॥

अनेन चास्मन्नगरमागत्य समाजे साक्षाद्विरूपाक्षदेवनगरदक्षिणकाशी-क्षेत्रे भवतां श्रेयःप्राप्तये प्राभातिकपम्पापतिपरिचर्यया सा....वदेवस्य नित्याभिषेकं करिष्यामि परन्त्वभिलषितामियद्वसु 'यस्यान्नं तस्य फल' मिति पौराणिकोक्तेः भवदीयमेव भोक्तव्यं भवितव्याधिक्य कुटुम्बेन मयेतिनिमन्त्रणा.... त्राणावाप्तमृष्टान्नमपि वराटिकाद्यासहस्रमपि दत्तं धनं अन्यतो न प्रतिगृह्णामिपरार्थमभिषेचनजपहोमादिकं च करिष्यामीति च प्रतिज्ञातम् ।

भृत्योऽत्रत्यो..योऽस्य वृत्तं नावोचदञ्जसा ।
कदाचिदेवपृष्टस्सन् सम्यागित्युक्तवानिति ॥

तदानीं एतद्गुरुशिष्यमविलम्बितमागत्यैव भवादृशो देवानां प्रियो न क्वापिदृष्ट...किमेतावता कालेन कृतवानस्यहमार्येषु दम्पतिपूजनाय क्रियमाणसंकल्पेष्वागतोऽस्म्यधुना वा चपलमागच्छेति समाहूय गच्छन्तं अवनीपतिरपृच्छत् ।

किमिदानीं त्वरयसे द्विजेयं पूर्वमेव हि ।
त्वरयेदद्य सत्कर्म सत्वरं क्रियतामिति ॥

ततोऽयं क्षणमवस्थायोत्तरमवोचदेवं—

अयं राजानार्यैरुषसि कृतमामन्त्रणमहो ।
समेहि श्रीपम्पापतिशिवसमाराधनविधौ ।
स्वकन्यासङ्गोऽपि प्रतिदिवसवन्नैव भवता
विधेयस्सङ्कोचस्त्वरितमिति जग्राह मतिमान् ॥

तदनु राज्ञाप्रतिदिवसमर्थव्यासङ्गोऽस्य कीदृश इति पुनः पृष्टो सावस्मदार्येष्वेतच्छ्वशुरेषु पुत्रीप्रेमातिशयेन अस्यां शरद्येव स्वयमेत्य सदनमास्थितेषु एतदुपचारेण कालो गमिष्यत्यर्थलेशोऽपि नास्तीति चिन्तया तूष्णीं भूतस्यास्यायं विज्ञायास्मद्गुरुभिर्यथेच्छं स्वार्थसाधन परो भवेत्यनुज्ञातः प्रातःस्नात इव ललाटपट्टधृतशुद्धभसिततत्रिपुण्ड्रो....[1]र्च्छमुष्टिरावासान्निर्गत्य क्षेत्रवासितया भाग्यवन्निम-

1 Read दर्भमुष्टि

न्त्रितोऽपि तीर्थेषु सञ्चरन् ब्राह्मणेभ्यः क्षत्रियेभ्यो विशेषतो वैश्येभ्यः शूद्रेभ्यो-ऽपि क्वचित्सङ्कल्पपूर्वक स्नानसूक्तपठनां....प्रोक्षणाम्बुकणयाञ्च।प्रतिग्रहादिना क्वचित्तात्कालिकपौरोहित्यकृत्याप्ताद्र्धर चेलादिविक्रयेण क्वचिन्निवापाञ्जलि-प्रदापनैः क्वचिदामश्राद्धाविधापनैः क्वचिद्बलाद्ग्रहणेन क्वचिद्धनव्ययकृतां द्विगुणलाभलोभेनर्णप्रदानेन क्वचिन्महायोगिवत् पद्मासनोपवेशेन, क्वचि-च्छिवलिङ्गाभिषेचनेन, क्वचिज्जनैस्साकमश्वत्थवास्तव्यमहापुरुषश्रीगुरुभट्टार्य-प्रदक्षिणाकरणेन क्वचि[त्त्वम्बा]त्रयमहिमातिशयवर्णनेन, क्वचिदतिरहस्य-निवसद्गुञ्जामाधवपाताळविरूपाक्षदेवादि महादेवायतनपुण्यस्थलप्रदर्शनेन, क्वचित् ब्रह्मकुण्डाधिदेवतायाः सुवर्णमूर्त्याः पम्पाम्बिकाया वृत्तकथनेन, क्वचित् पितृदिनमाश्रित्य गृहमास्थितैव मत्प्रतीत्यभिधाय सुवासिनी दीयमान सकूर्पा सादिशूर्पाद्युपादानेन, क्वचित्पम्पापुराधिपाभिषेक [1]कारयितर्पचारेण क्वचिदा-ढ्यनिवासोपसर्पणेन, बहुधनमार्जयन्नपि वयं कृतावासा आत्मभवन इति वा पुनरपर्याप्तधनाभिलाषेण वा नातिपृष्टो भवतीत्युक्त्वा त्वरितमागच्छेति समाहूय तमुद्यानमगमत् ।

राजाधिकारि पृष्टोऽथ मौनं सर्वार्थ साधकम् ।
मत्वायं कुशलो विप्रस्तूष्णीमेव स्थितोऽभवत् ॥

ततः—पुनरेतदाह्वानाय समागतोऽन्यो माणवकोऽधिकारिपुरुषे राजा-धिराजराजपरमेश्वर वीरप्रतापविद्यानगरेशनरपतिकोशद्रोहकारिणमिमं धन-दण्डनाय परपति चत्वरं प्रापयेति निजभृत्यमाज्ञापयति सति तद्वृत्तमात्म... निवेदयामास ।

विद्वान् सविद्यानगरेश[मा]न्यः
शिष्यैस्सहागत्य निशम्य सर्वम् ।
जामातृ कृत्यं वचनं बभाषे
राजानमेवं द्विजराजवर्यः ॥

राजन् श्रीविरूपाक्षदेवभक्ताग्रेसर श्रीराशिदेशाधिपते पम्पापतिप्रीणनाय

1 Read कारयितृपचारेण

नियमेन प्रातरामन्त्रितदम्पति समाराधन सत्रमन्तरायमन्तराऽस्माभिः कारयतु भवान् ।

अरे दुष्टं विप्रं चपलमिमास्थान सदनं
नयेति स्वं विप्रं पुनरपि दिशन्तं परपतिम् ।
तदा राजा चिन्ता कलितहृदयः प्राह वचनं
महेश श्रीपम्पापति परमसन्तर्पणकरम् ॥

ननु श्रीविरूपाक्षदेव सेवाकरण कृतादरणपरपते भवत्स्वामिराजाधिराज विद्यानगरेशनरपतिमान्यैः पण्डितैरेतैः पम्पापतिप्रीणनाय क्रियमाणदम्पति-समाराधनव्याघातो न कार्यः । कृतागस्स्वपि गोब्राह्मणेषु आग्रहो न कर्तव्यः । कथञ्चिद् ब्राह्मणगृहीतं धनं ब्रह्मस्वमपि न ग्राह्यं भवता .... महाक्षेत्रवासितया परिपालनीयोऽवनीसुरोऽयं इतःपरमेतादृशं कर्म जात्वपि नाचरिष्यति । महत एतान्यालक्ष्य .... दर्थमपि वा दयनीय[1]स्त्यजतामिति ।

ततस्तूष्णींभूतः परपतिरसौ विप्रमवद-
न्नृपोऽयं वैश्येभ्यो दिश सफलपुष्पाक्षतचयम् ।
प्रसादं देवस्येत्ययमविकृताय प्रथमतः
ततो राज्ञेऽपि ... तमदिशदथोवाच वचनम् ॥

अहो द्विजराजशेखर पुराधिकारिन् मया वक्तव्यमेव प्राज्ञेन राज्ञोक्तमिति गृहाण भवद्दयापात्रमस्मि । राजन् भवानपि महानार्यास्तिष्ठन्त्यवि .... चितमनुमतिर्देया भवद्भ्यामिति ।

ततो नृपतिशेखरः परपतिः शिवे भक्तिमान्
इतःप्रभृति मा कुरु द्विजवरेदृशं गच्छतात् ।
इति प्रमुदितो ददावनुमतिं द्विजायाथ ते
द्विजाश्शुभकराशिषो वचनमाहुराभ्यां मुदा ॥

तदनु पुरस्कृतजामातृके विदुषि शिष्यैस्सहोद्यानं प्रति गते सति पुर्व-

1 Read त्यज्यतामिति

स्मिन्नीदृशानि बहूनि कियन्तीति को वेद दृष्टमिति मयेदं विनोदेन विचारितमिति परपातिनोक्तं निशम्य राजाऽप्यवोचदिति ।

विचारितमिदं मया किमयमस्मदीयं फलं
ददाति धनकांक्षया किमुत तत्तदीयं फलं ।
इतीह शिवलिंगकेऽर्पितमनेन भव्यं जलं
समस्तदुरितापहं भवदलं मम श्रेयसे ॥

ततस्तद्वचनानन्दितेषु तत्रन्य जनेषु कथञ्चिद्विरूपाक्षदेवोद्देशेन विप्राय समर्पितं धनमस्माभिरप्यवाप्त शिवप्रसादोऽतः कृतार्था भवाम इति प्रमोदातिशयेन प्रसन्नाननान्विशोनिजावासगमनायानुज्ञाप्य राजाधिकारिणावेतौ परस्पराभिहितानतिवचनौ स्वस्वकार्यपरौ बभूवतुः ।

स उद्यानं बुधः प्राप्य सङ्कल्प्यार्यान्नव द्विजान् ।
संपूज्य पूजयामास जामातृदशमग्रहम् ॥

सोऽयं पत्न्या सह पूजितो दन्ताधरोष्ठपार्श्वनिस्सरदाज्यधारं घृतप्लुतभक्ष्याणामेवभक्षणं शनैश्चिरं कुर्वन् विरूपाक्षदेवरथक्षणे क्षणाय सत्वरमेव कृतभोजनैर्ब्राह्मणैस्त्वर्यमाणोऽपि हस्तेन पुनः पुनः भक्ष्याज्यानयनं सूचयामास ।

भूयो भूयस्समानीतभक्ष्याज्यप्रतिरोधनम् ।
न करोदयमत्यन्तं तयोः पात्रगयोरपि ॥

तदनु पात्रनिपातितभक्ष्याज्यराशिप्रत्राहतुष्टोऽयं शिथिलीकृताधराम्बरश्चित्रान्नादि यथेष्टमुपभुज्य····नुमत्या समुत्थितेषु सर्वेषु विप्रेषु स्वत एवोत्थातुमशक्तः समाहूतयात्मपत्न्या करक्षालनादासीनः समुत्थापितोऽभवत् ।

उपस्पृश्यातोयं जलमवनिदेवैस्सह शुभाः
श्रुतीराशीरर्थास्सपदि यजमानाय कवये ।
प्रशस्यैतद्दत्तं कनकशकलं मुद्रितमहा-
वराहं संगृह्य स्वगृहमगमन्मन्दगमनः ॥

तत्र विश्रान्तो....वनुसमागत्य पुरस्स्थितां पत्नीमवेक्ष्य शरद्यस्या भाग्यपरदाऽन्या गृहस्था कृतास्मदीयशरणकोणावतरणं वेतनाभावेऽपि भवदीय कृतोपकारो महान् भवदीय गुरुशिष्यो दुरात्मा मदीयमखिलमवनीपतयेऽवोचदतिकृच्छ्रार्जितार्थव्रयेण[1] कथञ्चिदेषामुपचारोऽपि कर्तव्यो मयेत्यवदत् ।

ततस्सा भर्तारं वचनमवदत्सन्ततमहो
धनं पम्पाक्षेत्रे महति भ....लभ्यत इह ।
तव ज्ञात्वा कृत्यं किमकृत पुरा भूपतिपुमान्
स्वयं दृष्ट्वा तच्चेऽवनिपतिरकार्षीत्किमपि नो ॥

मदीयाश्च निरतान्नदानपराः परान्नपराङ्मुखाः स्वत एव विशेषतः तीर्थयात्रासु तेषां बान्धवरीत्यो....रवाग्व्रय[2] एव कर्तव्यो भवता मदुक्तसमय इति चिन्तां विहाय सानन्दो भव महादेवमहोत्सवक्षण इति ।

स विप्रो हृदा चिन्तयन्नेवमेते
वदेयुस्तदानीं कृते वाग्व्येय किम् ।
..यान्तरं सम्यगालोच्य पम्पा–
पतेरुत्सवोत्साह्वानास तोषात् ॥

तदनु तत्र क्षत्रिया अपि निजवस्तुविनिमयेन यात्रागतेभ्यः संगृहीतात्माभीष्टदेशान्तरीयार्थाः महादेवरथोत्सवावलोकनोत्सुकाः सकुटुम्बाः स्वस्वसौधानारुह्य रथ्यायां निबिडवासितया परिपालनीयोऽवनीसुरोऽयमितः परमेतादृशं कर्म जात्वपि नाचरिष्यति महान्त एतानालोक्य वा....पि वारयणीयस्त्यज्यमिति तमजनतागत (?) गतकौतुकानिरीक्षणपरा बभूवुः ।

वणिग्जनस्तत्र समस्तवस्तु विक्रीय मूल्याधिकलाभतुष्टः ।
रथ्यान्तरस्थाखिल विस्तृतस्वपटापणोत्पाटन...क्रे ॥

तदनु तत्रत्यतुरीयवर्णादिरपि यात्रागतेभ्यो भाग्यवद्भ्यः सेवादिनोपार्जितार्थाः विरूपाक्षदेवरथोत्सवोत्सुकास्समुन्नतजनाश्रयमहीरुहगण्डशैलच्छायाश्रितो....

1. Read व्ययेन 2. Read वाग्व्ययः

वेश्याजनोऽपि तत्रत्यस्सम्पाद्यार्थं नवाद्रिटात् ।
तदानीमकरोत्तोषाच्चन्द्रशालावरोहणम् ॥

अथापत्यादिकामार्थिजनता पम्पापतिसम्प्रीणनाय पूर्वसंकल्पिता .... द्विजसमाराधनं पंचाननोत्सवदिनादारभ्य विधाय संपूर्णमनोरथा रथोत्सवोत्सुका सती सत्पुरुषवर्यश्रीविष्टपेशगुरुशिष्यानुमत्या प्राचीनमहागोपुरद्वितीयाभ्यन्तरमारुरोह ।

केचिद्युवानो नगरे शिवस्य
चैत्रोत्सवं द्रष्टुमिवागताभिः ।
संप्राप्य कामं निजसुन्दरीभिः
जनाश्रयं (यान्) प्रापुरलंकृताङ्गाः ॥

किञ्च पम्पानगरे प्रोषितभर्तृकाः जननभ....स्थिता युवतयोऽपि महादेवमाधवमहामहानातिक्रमसमय एव कथञ्चित् यत्नेन गन्तव्यमिति समागतात्मप्रियपरिपूरितकामार्थावाप्तिसन्तोषिताः पत्युपानीतनवमल्लिकाकुसुममालिकाकृतकबरीभाराः गुरुजनेन सह रथोत्सवं द्रष्टुमुत्का बभूवुः ।

परकीयानुरक्ता ये केचित्स्वार्थमवाप्य ते ।
साधवोनन्यभजनाः पम्पेशमभजन्सदा ॥

तत्र कश्चित्कामुकः पुरैव प्रियाविरहवेदनामसहमानः श्रीविरूपाक्षदेवमहोत्सवे समारब्धे सति तव प्रेयसी समागमिष्यतीति सखीवचनेन कथञ्चित् तदारम्भावधि...मपनीय तस्मिन्नारब्धे च सति पञ्चमुखोत्सवादिनमुख एव पत्या सह समायान्तीं ससखीं तामवलोक्य मुदितान्तरङ्गोऽभवत् ।

पुरावासे कोणे वसतिमचिरादेव कुशलः
पतिस्तस्याः क्व (त्वा)ऽगमदखिलवस्तुक्रयकृते ।
प्रतिज्ञा सत्याऽऽसीन्मम न किमितीयं निजसखी
मवोचद्व्याजेन प्रियमुपगतं प्रेक्ष्य चतुरा ॥

सोऽपि तदैव समागतं मित्रमवोचदिति—

भो मित्रास्ति म (यि) त्वदीयकरुणा कच्चित्तव स्वागतं
कच्चित्त्वं स्मरसि प्रियं समुचितं क्रीडाविहारेषु माम् ।
त्वामश्रान्तमनुस्मरन् इह महादेवोत्सवारम्भकः
कामो दूरगतः किमित्यपि मया पृष्टः सखा माधवः ॥

तेन परममित्रेण मदीयवृत्तान्तमाकर्ण्य नातिदूरगतो महोत्सवारम्भकः कालः परश्व एव यात्रालोकः समायास्यतीत्याश्वासितोऽहं पुनरुज्जीवितोऽस्मि ।

तं माधवं परमामित्रमहं त्वदीयं
मन्ये त्वदागमनतोऽद्य न चेदपि त्वम् ।
आयास्यसीह नितरामसुकं तथैव ।
वक्ष्यामि ते प्रियसखं ननु सूक्ष्मबुद्धे ॥

ततस्समागतेन (त)त्पतिनावनीसुरैस्सहामन्त्रितोऽयं कामुकः पूर्वसङ्गृहीतसुरतसाधनग्रहणायात्मगृहं गतो रमणीयपुरारामप्रवर्तितपाकक्रियायां जातायां पुनराहूतः क्रीडया ... डमेत्य तदालोकनजनितातिकामविषयशीघ्र घटनार्थमदनकृतशराघातजातपरिजिहीर्षयेव निजाङ्गविलेपित सुगन्धिचन्दन सरसपरागाङ्गरागकवचो गोघृतप्लुतपूर्णोदर .... दि भक्षणं विधाय सर्वेष्वपि द्विजेषु पुरीं प्रविष्टेषु ततइतस्सञ्चरन् भर्तरि महाजनसंमर्दे पौरदैवज्ञसद्मन्य-स्मदीयपदार्थजातं विचार्य पुनरागच्छामि । जग्ध्वा पात्राणि परिशोधयन्ती भवेति पत्नीमभिधाय आवासगृहं गते सति तूर्णमेव भुक्त्वा दाडिमशार्कर जम्बीरफलान्याहरामि, पात्रपरिशोधनाय दासीं वृद्धविश्वस्तां पक्त्रीं च नियोजयेति सख्ये निवेद्य ततश्चलितया तया (कामि)न्या कामकरिण्या अस्मदावासनिकटनिष्कुटनिकुञ्जगृह एव नक्तमायाहीति सङ्केतसमाभाषितस्तदा विलासविजितजगत्त्रयमकरध्वजमहाराजसाम्राज्यसारभूतमत्तेभसुरतोत्सवानन्दमप्रतिहतं अंगजक्षणक्षणदं प्रतिनक्तं अनुभूय सम्पूर्णकामोऽद्य पम्पापतिरथोत्सवविनोदानुभव एव श्रेयानिति सत्वरमुद्यानात्समागत्य अम्बरालंकृतो मित्रेण सह रथ्यायां जनाश्रयाश्रितोऽभवत् ।

यात्रागतेष्वपि जनेषु विटा युवानः
केऽपीदृशाः शिवमधूत्सवभव्यकाले ।

तत्रागतप्रियतमाप्तनिजेष्टतुष्टाः
वीथ्यां विचेरुरवतंसितपुष्पमालाः ॥

अथास्मिन्नुत्तरकाशीसदृशदक्षिणकाश्याख्यविरूपाक्षमहाक्षेत्रे साक्षाज्जगद्गुरुक्रियमाणप्राणिमात्रसाधारणतारकोपदेशेन करतलकलितप्रायमुक्तयोऽपि.... मुमुक्षवः केऽपि भिक्षुप्रभृतयो भिक्षाशिनस्सन्तो वसन्तो वसन्तोत्सवदिदृक्षयागतयुक्तेभ्यो योगिभ्यः प्रतिगृहीतभूतिगोलकरुद्राक्षमालिकेभ्यस्समभ्यस्य जीवब्रह्मैक्य धीपरं .... साधनं साष्टाङ्गयोगमन्तरात्मैक्यमालोक्याखण्डसच्चिदानन्देन युञ्जानै[1]स्तैस्सह विश्वविलासास्पदपरमेश्वरपंपापतिरथोत्सवावलोकनाय किंचिदास्थिता बभूवुः ।

(महा)देवसेवाधिकारी प्रवीणः
स्वयं वेत्रमादाय भक्त्या महेशे ।
चरन्नुत्सवारम्भभेरीनिनादं
मुदा कारयामास भृत्येन तूर्णम् ॥

तेन मुखरितदिङ्मुखेन महादेवमहाभेरिका(निनादेन) विद्यानगरकमलापुरादिलोकानामात्मेशरथोत्सवः समारब्ध इत्यबोधयदिव पंपाम्बिकानगरी ।

तत्रत्याः समुपागताः पुरमिदं धृत्वा दुकूलादिकं
भव्यं पुत्रकलत्रमित्रसहितास्सानंदभाभाषिणः ।
देवस्स्याद्बहिरागतो जनमहाकोलाहलं सत्वरं
याताहं प्रथमं पुरः पुनरहं यातेति लोकास्तदा ॥

तदैव सरिदन्तरतीरारामरामोन्नत वी....पकण्ठकलित श्रीगिरिभट्टार्याध्यासित पुरातनश्वेताश्वत्थादि दूरतीर्थस्थलगताश्च महाजनकोलाहलव्याजाव्युदात्तभेरिकानिनादाकर्णनेन संजातत्वराचरितधरणीसुरसमाराधनविधयः स्वयमपि कथंचिद् कृतभोजना जनाः केचिदलसा अपि अतिसंभ्रमेण सत्वरमेतत्पुरमाजग्मुः ।

---

1 क. युञ्जानास्तैस्सह....

केचित्तत्र कृतावासाः कृतकृत्या निजौकसाम् ।
रक्षणाय विनिर्दिश्य स्वीयं कंचिदिहागताः ॥

किंच — पंपानगरपरिगतजनपदेभ्यस्तदागतेषु तुरीयवर्णादिजनौघेषु रथ्यायामागन्तुमक्षमतया तपनातपतप्तान्यपि महोन्नतमहीरुहस्कंधजनाश्रय सौधोपरितनपटलसालभित्तिगण्डशैलाग्रोदग्रहेमकूटागिरिमतङ्गाद्रिशिलातला-न्यापादशिखरमास्थितेषु

भूयोऽप्यवादयद्भेरीं शैलानीतात्रिकूटके ।
पीठेऽलंकरणायासौ शिवमूर्त्योस्तदाज्ञया ॥

तदनूपकण्ठकलितपुरग्रामजनपदेभ्यः स्वस्वावासगोपनाय स्थितास्सर्वेऽपि पंपापतिसमायातावनीसुरकरसमाकृष्टगातिमन्महारथं क्षणमात्रमपि वाऽवलोक्य कृतार्थास्त्वरितमागमिष्याम इति निजगृहान् अयःकीलसंकीलितकवाटतट-पिनद्धद्वारान्पिधाय समागताः ।

महादेवोत्सवोदारकल्याणसमये जनाः
महीतलेऽतिलापातं मिलितास्तत्र कौतुकात् ॥

तदानीमियं खलु पंपानगरी श्रीविरूपाक्षदेवरथोत्सवावलोकनकुतूह-लात् अनन्ततलादचलातल . . . वतीर्णदेवपूर्वदेवसिद्धगन्धर्वविद्याधरोरगप्रज्ञा-वहपरिवारवरद्विजराजशेखराध्यासितविचित्रशालाभिः तत्तद्विमानपङ्क्तिभि-रलङ्कृता मथ्यमानपयःपारावारफेनपिण्डपाण्डुरद्युतिभिः सदागतिडोलायित सितध्वजैः प्रासादैरुपरि पतदाकाशगंगैस्तुंगैस्तुषारगिरिशृंगैरिव विराजिता समन्ततश्शैवजनसमुच्छ्रितोन्नतालम्बावलम्बिकानीनमुनिकरमकरध्वजारिवृषभ-केतुभिः प्रकाशितशिवसर्वोत्तमता व्यवहृताशेषदेशभाषाविशेषजनोपशोभिता सुरासुरकृतक्षीरसागरमथनवेलेव महाघोषमुखरिताशामुखा अमरावतीव समरत-विबुधेन्द्रानन्दानिलयाभ्यन्तरा निखिललोकललामभूता भगवता महादेवेन ता(?) निजनित्यनिवासोचितभूकैलासतयोत्पादितेवोत्प्रे (प्रै) क्षि प्रेक्षावद्भिः ।

तस्यां तत्समये सतो(?) ऽपि च जनास्सानन्दमासन्भवे
निश्चिन्ताश्च रथोत्सवेच्छव उमानाथस्य पंपापतेः

भक्त्यैतेषु वदान्यतादिसुगुणाः सर्वे निनासं (दं?) तदा
कृत्वा शैवमहामहेच्छव इवालक्ष्यन्त लक्ष्मीकराः ॥

किंच हीनत्वकाठिन्यकौटिल्यानि कान्तात्रलग्नकुचतटकान्तालकान्तेषु, दानविच्छेदो वृद्धवारणेषु, आत्तगन्धता मलयाचलागतमन्दानिलेषु, मित्रविद्वेषः कुमुदाकरेषु, कर्णेजपत्वं अहीनगन्धबन्धुरगण्डस्थलभ्रमद्भ्रमरेषु, अवलेपो विष्ट-पेशगुरुगोपुरप्रास(प्रासाद?)सौधजनाश्रयेषु, निषादाडम्बरोऽपि वीणानिनादेषु, मदविकाराः मत्तकरिकलभेषु, जालमार्गगवाक्षेषु विधवोपसेवनं, जातिसांकर्यं आराममहीरुहेषु, भृगुपातो निर्झरेषु, कनकदण्डाशुछत्रेषु, प्रकम्पाः पताकेषु, अन्तस्तरलता हारेषु, अन्योन्यविमर्दः कामिनीपीनपयोधरकलशेषु, बन्धन स्थितिः कुसुमेषु, मुखरागः शुकेषु, चक्षूरागः कोकिलेषु, कंठग्रहः कमण्डलुषु, पक्षपातो महीधरेषु विरूपाक्षदेवरथोत्सवावलोकनेच्छयेव चिरमवस्थाय स्वस्या-श्रयालंकाराय भवन्ति दुर्गुणा दोषाश्चैते चित्रमिति कश्चिद्विपाश्चिदवोचत् ।

तत्रत्यास्तमपृच्छदेवमवनीदेवोत्तम त्वं कवे
भूपालानखिलानिहागतवतो जानासि कोऽयंवद ।
सोऽयं प्रत्यवदत् स एष खलु तद्राजान्ववायोद्भवो
विद्यारण्ययतीन्द्रनिर्मितपुरश्रीचक्रवर्ती नृपः ॥

किंच क्षीरसागरमथनदक्षैरपि सुररक्षोभिरक्षोभ्यसोमान्वयपयःपारावार-सुधाकरः कुवलयोल्लासकरोदरीसुन्दरीशरणागतीकृतनिखिलारातितिमिरनिकरो निरर्गलविक्रमोद्भूतकीर्तिचन्द्रिकाविशदीकृतदिगन्तरो याचकचकोरानुभूतनि-त्यसंपूर्णश्रीविलासो मानिनीमनःकठिनोपलद्रवापादको निरन्तरोपगतकवि-गुरुमित्रबुधमङ्गलवचनानुमोदितो मुखकलंकशंकावहमृगमदातिलकं परित्यज्य सकलसाम्राज्यलक्ष्मीपदश्रौतस्मार्तशैवागमासिद्धशुद्धविभूतिकृततिर्यक्पुण्ड्राङ्कित-ललाटपट्टो विरूपाक्षदेवानुगृहीतोऽपि तदीयपादपद्माराधको रथोत्सवाव-लोकनेच्छेयेव धृतात्मीयराजद्राजरूपः कलानिधिरद्य दिवैव अत्र सौधोदय-गिरिमासाद्य आत्मकलाभिवर्धितसंगीतसाहित्यसमुद्रामृत .... तरङ्गपरम्परायि-तकुशलकुशीलवमाण[1] पूर्वपूर्वस्वीयकथायुतगानविनादब्रह्मनिष्ठानन्दनिनाद-

१. कुशीलवमाणवक ?

भरभरितो भरतं विलोकयन् वर्ततेऽस्मदीश इति स्रत एव हारलतीभूतया नक्षत्रमालयालंकृतोऽयमेव नरपतिराजपदभाजनम् ।

रंजनात्सर्वलोकानामनुरागाश्रयत्वतः ।
सदैकरीतिमत्वाच्च सन्मार्गाश्रयणादिति ॥

नन्विन्दुरपि राजेति कथमयमेव राजपदभाजनं इत्युक्तोऽयमुत्तरमवोचदेवम्—

दोषाकरत्वकुटिलत्वकलंकितत्व-
मित्रावसानसमयागतिमानपीन्दुः ।
राजा किमत्र भवति द्विजराजता तु
विप्रोत्तमेऽपि विनतातनयेऽपि नास्ति ॥

अपि च— **महीसुरपुरेशत्वं चन्द्रशैलाधिरोहणम् ।**
नलब्धवानसाविन्दुः कथं राजेति मन्यसे ॥

इदमिदानीं श्रुणु तुषारकिरणोऽसौ भक्तभावेन **कल्याणाचल**चापमहादेवमाश्रित्यापि **कल्याणनगर्या**स्सोदरभावेन, कमलाश्रितोऽपि **कमलापुर**स्यवानधिपतिः **कृष्णपक्ष**प्रविष्टोऽपि अदृष्टहीन इव क्रमेण क्षीण एवादृष्टो, लज्जित इव क्वापि निलीनः तदा मित्रशरणं गतोऽनुचर एव तदानुगतः पुनर्जात इव लब्धकिंचिदभ्युदयो ब्रह्मचारी वह्नयादि गुरुदेवतानुग्रहेण कतिपयैर्दिनैः कदाचिदवाप्तपरिपूर्णकलोऽपि सरसकवित्वमूढ इव गृहीतविबुधपद्यो याचक इव सकलमहीभृदग्रप्रसादितकरः सदा संचरन्नपि नैकस्मादपि करग्राहीति कथंचिदपि क(न) राजाक्षत्रेशार्यतिसन्तापकरो वसुधैकभोगी दीनसन्तोषकोऽलीकाप्रियश्चायमेव भवति राजा परमतएवात्र विश्वेश्वरदेवविरूपाक्षमहोत्सवसमयमिलित सकलभूपालसमक्षमेव अस्य सर्वोपकार्योपरितनाधिकादिमसौधनिवास इति ।

विद्वन्समर्थोऽसि शिवस्य यावत्
त्रिकूटपीठं बहिरेति तावत् ।
निरूपयैतानित एहि भूपान्
कोऽयं वदेन्नं नृपमत्युदारम् ॥

इति पुनस्तेन पृष्टोऽयं श्रीमदखंडप्रचण्डमार्तण्डकुलान्तमंडलमंडनं मणिरुदंडः पुंडरीकाडम्बरकरविक्रमाङ्कप्रतापातपप्रवेशापगतवैरिनिकरतमस्तोमाखिलमहीधरकन्दरविहरत्सिन्धुरगन्धर्वकिन्नरविद्याधरजेगीयमानयशोविलासो रात्रिकालरात्र्यपेतनिर्णिशोधविसरप्रकाशधारापादितानवरतनिर्मलताम्बरमहादेवमहानुग्रहकृतबलवदरातिराहुग्रहनिग्रहाभिवृद्धनिस्सापत्न्यसाम्राज्यश्रीनिवासो-विविधवर्णविचित्रानेकसुलक्षणोत्तमाश्वपतिः शत्रुमात्रसन्तापकरोऽन्वर्थमित्रनामा निजकुलदैवतश्रीविरूपाक्षदेवमहोत्सवावलोकनाय समागतोऽयं राजराजदिगङ्गनाभुजङ्गः काश्मीरभूपालः ।

ततोऽग्रे गत्वायं पुनरपि च तेनेति महितो
नृपःकोऽयं विद्वन् वद सुगुणमेनं क्षितिपतिम् ।
समापृष्टो हृष्टः सपदि निजगादेति सुमते
शृणु श्रीमत्पम्पापतिचरणभक्तस्य वचनम् ॥

अयमेव निजभुजबलार्जितवैरिभूमण्डलराज्यभारभरपारावारविहारकर्णधारमहामात्यफलितशक्तित्रयो दक्षिणः शरणागतधरणीपतिसहस्रपरिवेष्टितो भिदुरभयागतनिखिलमहामहीधरमध्यवर्तीव कल्याणशिखरिपतदाकाशधुनीपृथक्प्रवाहमत्याहवोद्धत[1]श्वेतातपत्राधस्तलोभयपार्श्वोद्धूयमानविशुद्धचामरपरिष्कृतो निखिलभूपतिभुक्तयाप्यनितरसाधारणयेव साम्राज्यलक्ष्म्याऽलिंगितोरस्थलालिंगितो विश्वंभर इव करकमलतटोपलक्ष्यमानशङ्खचक्रगदापद्मादिलाञ्छनो लोकेश इव विमानाहितराजहंसोपसेवितो महादेवप्रसादितदुर्गो जलनिधिरिव महासत्त्वः, अनेकपरिवारोऽप्यद्वितीयः, चतुरङ्गबलसाधनोऽपि खड्गैकसाधनः, सिंहासनगतोऽपि धनुष्यासक्तः, भस्मीकृतारिपुरीन्धनोऽपि ज्वलत्प्रतापानलो, विशालाक्षोऽपि सूक्ष्मदर्शी, निरन्तरप्रवहद्दानोदकोऽपि मदविकाररहितः, अतिविशदस्वभावोऽपि एकपत्नीव्रतोऽपिच कृष्णचरित्रो, द्विजराजशेखरलिंगधरोऽपि सकलद्विजचरणारविंदवंदनामोदभरभरितहृदयकमलः, कमलाविहारस्थलश्रीराशिदेशाधिपतिः आत्मीयपंपापतिभक्ताग्रेसरत्वसूचनायेव अत्र रथ्यायां अग्रिमप्रासादनिवासो भवति ।

---

1. क. मत्यावहोद्धत.

स एनमवदत्पुनस्तत इतो निवर्त्याऽदरात्
इमानवनिपालकान् कथय भूसुरेंद्राऽऽरथम् ।
स्थितानुभयतो महामहदिदृक्षयात्रैत्य यं
ततः प्रचलितः शनैस्तमिति वाचमूचे मुदा ॥

ननु—गन्तव्यं शनकैरितः किमिति चेत्पीठे त्रिकूटे बहिः
द्वारान्निर्गत एव सत्वरमहं गन्तुं न शक्तो जनैः ।
गच्छन्नेव वदामि ते सपदि तत्तन्नृपालानिह
श्रीपम्पापतिपादपद्ममनिशं ध्यायन्नपि श्रीनिधे ॥

ततोऽयं परावृत्य शिवरथं प्रति शनैश्शनैः गच्छन्नेवमवोचत् ।
स मोक्षपुरदेवराड् विजयते समल्लेश्वर-
प्रसादमहिमानुगावनिसुरोत्तमाशीस्ततः ।
अवाप्तमहिताहितप्रबलभूपराज्यश्रिया
कवीन्द्रपरिवेष्टितः शिवरथं समालोकयन् ॥

अयं पुनर्निखिलवरवीरनृपाग्रग्रण्यः सकलगुणाभिरामः श्रीसिद्धरामेश्वर प्रसादानुगुणमहीसुरमहानुग्रहवज्रकवचो जैत्रयात्रारंभकभेरिकानिनादनिर्भिन्नहृदयारातिपुरेन्धनज्वलितप्रतापानलो ... नानुसरणागतप्रणतसामन्तसमुद्धरणकृतदयार्द्रहृदयो मुखचन्द्रोल्लसदमृतबिन्दुसन्दोहबुध्यावहस्वेदजलकणिकालङ्क्रियमाणो मृगमदकर्पूरागरुकुंकुमरसवासनासुरभिचंदनानुलिप्तांगवारांगनाकरधृतचामरव्यजनवीजितो निस्सापत्न्यतयाऽमात्यनिर्वाहितराज्यभारः समानविद्यावयोविनयसंपन्नैः अतिनिपुणैः कविभिः आख्याताख्यायिकाख्यानेतिहासपुराणविदग्धमंडलमंडनसत्काव्यपरमार्थसाधकशास्त्रविचारसमुपजातपरमानन्दभरामृतास्वादसंतृप्तमानसो धरायामपि देवेन्द्रभोगशाली, बलारिनगराधीश्वरः शिवरथोत्सवोत्सुको वर्तते ।

राजाधिराजपरमेश्वरसार्वभौम-
विद्यापुरेश्वरमहानरदेवमौलेः ।
सेनापतित्वबिरुदांकित एष भूपः
श्रीराजदुर्गनगराधिपतिप्रवीरः ॥

अयं तु महाकुंभिकुंभनिर्मुक्तमुक्ताफलसोपायनकरैः कैश्चित् सामन्तपातिभिः दूरागतागतश्रमविवृतमुखस्पष्टदृष्टदंष्ट्रांतराललत्पाटलजिह्वाविद्यमानखेटैः अनेकविधवर्णलोमभिः श्वभिः अनुगम्यमानैः धूमयोनिमलिनैः शबरभटैः कैश्चित्करधृतचमरवालदन्तावलदन्तदण्डैः, कैश्चित्पुण्यजनैरिव गृहीतपिशितभारैः, कैश्चित्प्रमथगणैरिव गजव्याघ्राजिनधारिभिः, क्षपणकैरिव मयूरपिञ्छधरैः परिवारैः परिवृतो नीलोत्पलदलश्यामलकोमलात्मकान्तिप्रवाहेन यमुनाजलेनेव सौधान्तरं परिपूरयन् मत्तेभ इवोद्भिद्यमानश्मश्रुराजिमदरेखालंकृतगण्डस्थलो गरुत्मानिव उद्धृतानेकमहानागदशनो, ग्रीष्माहसमय इव उद्भूतमृगतृष्णा(णः), कृष्णोऽपि असुदर्शनः, स्वच्छंदगमनोऽपि, शिवार्चनपरोऽपि दुर्गैकशरणः, महीभृत्पादानुवर्त्यपि राजसेवाऽनभिज्ञः, शमनस्यांशावतार इव अञ्जनमहीधरस्यापत्यमिव, कविराजस्य सखेव, अहितप्रतिभयः, शरणागतानां अभयप्रदोऽद्यापि परिदृश्यमानहिडिम्बासुरदन्तोदन्तमहिमविचित्रचित्रशिलानगराधीश्वरो निरन्तरदृढभक्तिपूतपदव्यावर्तितोपानकूर्चाचरितनिर्माल्याविसर्जनगण्डूषजलाभिषेको[1] किंचिद्भक्षितशेषमांसोपचार[2] समर्पणाद्यल्पोपचारसंकल्पसंतोषितसाम्बशिवभक्ताग्रगण्यवनेचरवंशसंभूतो भूपालमणिः पम्पेशरथावलोकन[3] कौतुकेन समागतो वर्तते ।

> सतावदवनीपतिः शिवशरण्यगण्याधिक-
> प्रभाववृषभेश्वरादिकमहाप्रभुस्वामिकः ।
> तदीयसदनुग्रहादरिपुरान्तकः शंकरः
> समस्तशरणार्थिनां हरपुराधिपो वर्तते ॥

अयं तु निजखड्गोद्वाहिताहितभूपालपालितानन्तकन्यासपत्नीकृतैकपत्नीरितवक्रोक्तिविनोदितमानसो विश्वंभराभरणैकधुरन्धरभुजोन्नतो विक्रमोष्मफूत्कारपलायितशरणागतनरेंद्रकनत्कोटीरकोटिस्फुटघटितनूत्नरत्नमरीचिमंजरीपुंजरंजितचरणोच्चलनरणन्मणिनूपुरादिवरवीरबिरुदाङ्कितो निजाङ्गनासहित एव आत्माराातिमहीपतिप्राणवायूनाहर्तुमिव तत्तदीयोद्यानसीमसु विहारविशारदो

---

1. क. जलाभिषेचन
2. क. मांसोपहार
3. क. रथोत्सवावलोकन

यात्रागतसप्तकोटिभक्तोद्धृतकरदीपराजिनीराजितापादमस्तकानिरस्ततमस्तोमोपलक्षितसमस्तवस्तुविस्तारितापणश्रेणीगणजटापटलमल्लारिगिरिमहादेवानुगृहीतो गुरुदेवद्विजाराधनपरो भुजंङ्गनगराधिपो भूदेवः ।

श्रीरामेण समुद्ररोधसि शिवप्रीत्या अघध्वंसके
नाम्ना तेन समन्वितेश्वरपदे रामेश्वरे स्थापिते ।
तद्भ्रात्रापि च लक्ष्मणेन निजतन्तुत्त्यै पथि स्वोल्लसन्-
नाम्ना स्थापितलक्ष्मणेश्वरपुरीवेशाधिपोऽयं नृपः ॥

अयं तावन्निजकुलदैवतवेंकटाचलपति [क] श्रीनिवासमूर्तिचरणसरोरुहपरिचर्याचरणसमासादितात्मैकभोग्यसकलस्थिरवृत्तिकलितगदाधरपुराग्रहारदेशाधिपत्यसाम्राज्यलक्ष्मीप्रसन्नवाग्देवताकरुणाकटाक्षवीक्षणावाप्तसद्गुरूपाध्यायाध्यापितसलक्षणसांगस्वाध्यायसत्काव्यरूपकालंकारशास्त्रजातार्णवविचारमथनसमुदीर्णार्थानुभवामृतानिरन्तरास्वादजनितपरमानंदभरभरितस्वान्तनितान्तचिन्तनोपस्थिताद्वैतसिद्धान्तवेदान्ताधिकरणरत्नमालिकालङ्कृतवाक्खद्योतप्रकाशनिराकृताराातिदुर्मतातिमिरनिकरो भगवद्बोधायनमहर्षिदृष्टस्वगृह्यसूत्रबोधितस्मार्तानुगतश्रौताग्निष्टोमादिक्रतुशतानुष्ठाननिर्मलीकृतान्तःकरणदीक्षितश्रोत्रियात्मीयपूर्वपरंपरागतभूदेवश्रीनिवासान्वयसंभवोऽवरोधवधूजनावशेषसंरक्षितसमरभयागतसामन्तमहीपतिकृतसाप्तपदीनो दीनोद्धरणपरो नित्यात्याज्यपार्थिवशिवपूजावसरप्रणीतशिवनाटकादिप्रबन्धो वैदिकाचारनिर्णयादिसमस्तसुग्रंथकोशसंग्रहलालसो मित्रानुवर्तनेन पूर्वप्रवृत्तदोषोपगतध्वान्तजातप्रभातसमयो भास्कर इव सत्कर्मप्रवर्तितमहीसुरोत्तमो विद्वत्प्रभुर्वदान्याशिरोमणिः कपोतगिरिसन्निहितदम्बलपुरदेशाधिपतिर्विद्यानगरेश्वरराजाधिराजनरपतिसमधिष्ठितप्रासादाभिमुखत एव पंपापुराधिकारिणा विनिर्दिष्टमहासौधोपरि विजयतेतराम् ।

सन्त्यन्येऽपि च वंशनामनगरीनाथप्रमुख्या नृपाः
वक्तव्यास्तदपीह देवनिलये भूयोऽपि सन्ताड्यते ।
भेरी निर्गमनाय साम्बशिवकश्रीमूर्तिपीठस्य यत्
गन्तव्यं तदलं पुनः पुनरिमानुक्त्वा प्रसिद्धानहो ॥

तदनु तस्मिन्नस्मै विबुधाय भूविबुधाय मुदा तदागतवदान्यतया रत्नाङ्गु-लीयं पारितोषिकं दत्वा निजान् (गृहान्) प्रतिगते सति अयं कालंविलंबाशंकिपरपतिक्रियमाणत्वरया देवालयप्रदक्षिणकृत्यं प्राचीनमहागोपुरात् निर्गमय्याऽऽनीतेन शैवजनोऽथ सांबाशिविकाधिष्ठितत्रिकूटपीठेन सह बर्हिबर्हचामरव्यजन-करपुरस्सरदेवार्चनानुसरणेन वेत्राहतिभीतिरहितो महारथं त्रिवारं प्रदक्षिणीकृत्य तदर्चनानन्तरं दक्षिणतो मुहुर्मुहुरवलोक्यार्तिक्यनीराजितशिवमूर्ती कृता-र्थोऽहमित्यादृतमत्योत्पादितानन्दबाष्पजलनिर्मलीकृतलोचनस्समाधिष्ठत् ।

तत्राधिकारिपुरुषप्रमुखैरनेकैः
भक्तैस्सदाहृतफलानि शिवार्चकोसौ ।
तिष्ठन्समर्प्य शिवयोः प्रददौ प्रसाद-
पुष्पाणि सैव सकलानि करेषु तेषाम् ॥

तदनु तदनुज्ञया शैवास्त्रिकूटपीठमवन्यामवतारयामासुः ।

देवार्चकस्सपदि तत्र विधाय पूजां
श्रीसांबशंकरसदाशिवभव्यमूर्त्योः ।
भूयोऽपि भूरि सगुडोदकचाणकादि
दानं च भूसुरगणाय ददौ प्रसादम् ॥

अथासौ देवार्चकः शिवमूर्ती समासिकफलकया सह त्रिकूटपीठादुद्धृत्य महाबलाढ्येन यूनाऽस्मीयेन संवाह्यात्मनोऽपि तत्संबधलाभायेव मुक्तिजनकं निरन्तरब्रह्मानुसंधानसूत्रं स्वहस्तगतं साक्षात्प्रदर्शयन्नेव वा करतलकलि-तमहादेवभक्तिरज्जुभिरेव वेदाश्वब्रह्मरथारोहणं विधेयमिति वा परमपुरुषार्थसाध-कानामावलम्बितसंसृतिरज्जूनामपि गौरीरमणचरणारविन्दयुगलमेव लक्ष्यमिति वा महायोगीश्वरदुर्लभोऽपि महेश्वरो भक्तिरज्ज्वैव समाकर्षणीय इति सूचयि-तुमपि वा स्वयमारोढुं पतनभयेन गृहीतशिवपीठावलम्बिदीर्घसूत्रसारथिरिव प्रथमतः समारुह्य द्वारमधिष्ठाय शनैश्शनैरश्म्याकुंचनमाचरन् सावधानेन महारथमारोहयामास ।

तदानीं लोकोऽयं करकमलबद्धांजलिपुटः
समारोहत्पंपापतिकमवलोक्यावदादिति ।

दृढं धृत्वा विप्रं कलितजगदीशान शनकैः
समारोह स्वामिन् रथमखिललोकावनकृते ॥

तदनु तदुपनीतशिवमूर्तौ देवार्चकस्तत्रैव समादाय रथान्तरालस्थापितमणिपीठे सोपधानचित्रास्तरणरमणीये निवेशयामास ।

ततो विद्यारण्याभिधयतिवरे भूसुरगुरौ
समारूढे शिष्यैस्सह रथमिमं हर्म्यसदृशम् ।
विधायाऽसौ पूजां परमशिवमूर्त्योः पुनरपि
द्विजोऽधस्तात्तत्र व्यजनकर आस्ताऽतिमतिमान् ॥

ततः सर्वेषु भूसुरेषु रथस्थितशिवमूर्तिसन्दर्शनेन कृतार्थाः भवाम इति भक्तिभरेण प्रणम्य समाकर्षणाय गृहीतरज्जुषु शिवमूर्त्याधिष्ठितमहारथमेव महादेवं मन्यमानाः जनाः तस्मै परितः फलान्यर्पयामासुः ।

जनाभिधबलाहकप्रकरमुक्तमुक्ताफल-
प्रवालमणिभासुरैस्सजलनारिकेलादिभिः ।
प्रणोदनकरैरिव त्वरितमागतैः केवलं
फलैः शकलतां गतैस्सपदि सिक्त आसीद्रथः ॥

तदानीमयं शिवरथः स्वाश्रितभूतगणैः शकलीकृतामितफलबलिदानसन्तोषितैः लघुकृतोऽपि परपतिप्रार्थितसकलभूसुरकरसमाकृष्टोऽपि निजाभीष्टसिद्धये महेंद्रप्रमुखनिखिलादितिसुतैः विष्णुसहायरहितैः समाकृष्टो मन्थाद्रिरिव ईषदपि न चचाल ।

ततः परपतिस्स्वयं नरपतेस्तु गत्वाऽन्तिकं
व्यजिज्ञपदिति प्रभो न चलतीव शैवो रथः ।
भवानपि समेहि तद्रथभुवि प्रणम्याऽऽदरात्
समर्पयसि चेत्फलं प्रचलितो भवेत्सत्यतः ॥

ततो नरपतिरसौ प्रासादादवरुह्य प्रदक्षिणगत्या रथ्यायां पुरो भुवि साष्टांगं प्रणम्य वेत्रपुटिकानीतफलानि समर्प्य आत्महस्तेन रथरज्जुग्रहणाद्विष्णुसहायेन सुमनः क्रियमाणसमाकर्षणान्मन्दरमहीधर इव प्राचलिते सति महारथे तथैव अनिवार्यजननिवहकृतगमननिरोधसकललोकाक्रियमाणमहा-

देवनामोच्चारणस्वस्वकरकमलयुगलतालास्फालनशैवजनोद्भूतानेकबृहत्काहली-पूरणमहेभोढमहाभेरिकावादनाद्युत्पादितकोलाहलविभिन्नमतङ्गहेमकूटादिगिरिगह्वरोपलमहाप्रतिध्वनिमुखरितेषु हरिन्मुखेषु परिभ्रान्तनयनान्तोपान्तानि-स्सेनन्मदा[1]स्वादलोभपरिभ्रमद्भ्रमरवारनिवारणार्थचलितविपुलशूर्पकर्णावलम्बिमुक्ताफलपुंजमंजरीघटितमृदुदुकूलाच्छादितकुंभद्वयान्तरनिहितकनत्कनकांकु-शोपशोभितं चतुस्तंभसमुद्भूतशातकुंभकलशमाणिपटलप्रभाभासमानडोलाल-ङ्कृतं हस्तिपकानीतं हस्तिनमारुरोह ।

शिवद्रोहिणो ये स्थितास्तत्र तेऽमी
गजाश्वादिपादाहतैः पेषिताङ्गाः
बभूवुश्च केचित्फलैर्लोकैर्मुक्तैः
विभिन्नोत्तमाङ्गा बुधैर्निन्दिताश्च ।

पुरा खलु केनचित् धनाढ्येन शिवभक्ताग्रगण्येन पंपार्याख्यवणिजा नि-जार्जितार्थसार्थक्याय स्वनाम्ना निर्माय समर्पिते महोन्नतरथे सांबशिवमूर्त्यन्तर-समारोहणानन्तरं वणिगादिजनौघसमाकृष्टेऽपि शैवागमविधिविधानपूतधरणी-सुरनीयमानशिवरथे पुरतो गत एव प्रचालिते सति जनाः पार्वतीरथं पुरस्कृत्य पंपापतिराऽत्मीयरथं अचालयदित्यमन्यन्त ।

रथं शूद्राकृष्टं चलितमवनीदेवनिकरः
समीक्ष्य श्रीपम्पारमण करुणासागर विभो ।
द्विजानां प्राबल्यं प्रकटय समेत्येति नितरां
वदन्तस्स्वं भव्यं धृतमथ चकर्षुः शिवरथम् ॥

तदानीं प्रधावज्जनपादाहतोद्गताद्भुतप्रतोलिधूलीपटलसंचारितेषु रथाक-र्षकावनीसुरेष्वाराद्वर्तिनो जनाः पश्य रथो धावति स्वयमेवेति स्वान् प्रत्यवदन् ।

भूदेवा रथरज्जुपाणय उमानाथस्य नामध्वनिं
कुर्वन्तश्शिवशंकरेश्वरमहादेवेति भक्त्या तदा ।
धावन्तो मुखसंप्रविष्टरजसः श्रान्ता अपि प्राभवन्
न स्थातुं स्वत एव कार्यजनता (?) संस्थापितुं वा रथम् ॥

1. Read निस्सरन्मदा

ततस्तत्रात्मोपरि रथापातभयेन धावद्भिस्सर्वैरपि उर्वीसुपर्वभिरस्माभिर्गृहीतरज्जुमात्रकैः निस्सत्वबाहुभिरनाकृष्टोऽपि शिवरथस्स्वत एवाधुना धावत्याश्चर्यमिति विस्मितैः महारथवेगविनोदितस्वान्तपार्वतीकान्तनितान्तश्रान्ता भवामः करुणां कुरु विश्रान्त्या इति संप्रार्थितः पंपापतीरथमस्थापयत् ।

तेऽमी भूमिसुरास्तदैव सहसा सन्त्यज्य रज्जून्भुवि
श्रान्तास्तस्थुरथागतेह जनता धर्मार्थिनी संभ्रमात् ।
आनीयोदकपूरितान्नवघटान् विप्रैस्स्वकीयैस्स्वयं
प्रीत्यै श्रीपरमेश्वरस्य तददात्तेभ्यो जलं निर्मलं ॥

तत्र केचिद्द्विजाः क्रतुशताधिकमहादेवरथोत्सवावलोकनजनितानंद समुल्लसितोष्णाकरातपसन्तापजनितातितृष्णया कैश्चिदर्धपीतमेवान्यैरीषत्पीतमेवापरैश्च स्पृष्टमात्रमेव बलाद्गृहीत्वोदपानमाध्वरसोमपानचमसमृत्विज इवाऽपिबन् ।

ततः केचित्तेषां श्रमजलनिवृत्तिं विदधिरे
स्वयं संवीज्याशु व्यजननिजवासोऽञ्चलदलैः ।
द्विजास्ते विश्रान्ताः श्रुतिवचनपारायणपराः
बभूवुः केचित्तु स्वसमविबुधैर्वादकुशलाः ॥

तत्र विश्रान्तास्सर्वेऽपि द्विजाः भूयोऽपि विष्णुवल्लभरथाकर्षणाय प्रयतमानाः धर्मार्थितदत्तैः स्वपरिभ्रमणेन परतापापहारितया सुमनसां सुजनबुद्ध्यावहैर्व्यजनैः गरुत्मन्त इवाभवन् ।

तेषां द्विजानां सुजनप्रदत्त-
कल्यालसेवाचरणेन कण्ठः ।
आर्द्रोऽन्तरासीद्गतधूलिरङ्ग-
रागस्त्वनार्द्रो व्यजनैर्बभूव ॥

तदा तत्र खलु तुरीयवर्णाकृष्यमाणपंपार्यमहारथे शनैश्शनैरागच्छति सति त एवोत्पन्नात्मीयप्रथमवर्णातिशयाभिमानेन सत्वरमेव भूयोऽपि शिवरथाकर्षणाय चलद्व्यजनगरुद्द्विजराजहंसावलीप्रविष्टाःवैष्णवा अपि विरूपाक्षदेव-

सेवाचरणायेव मन्दमन्दविसरन्मलयानिलापनीतस्वेदजलार्द्रतापादितमालिन्य सर्वाङ्गसंलग्नस्फुटपरिदृश्यमानप्रतोलिधवलधूलिभस्मोद्धूलनाः कृतशैवदीक्षा इवा लक्ष्यन्त ।

ततः परपतिर्द्विजान् कनकवेत्रपाणिश्चरन्
उवाच नयतेत्यथ द्विजकृतात्समाकर्षणात् ।
प्रधावति रथे पुनः पुनरपीह शैवा जनाः
पुरोगमनकांक्षया चपलया चकर्षू रथम् ॥

तदनु रथोऽसावतिधावन्नपि निकृष्टवर्णाकृष्टतयोत्कृष्टविशिष्टभूदेवतानीयमानामिमं रथं नातिचक्राम ।

भूदेवास्तूर्णमैशं रथमखिलजनानन्दसन्धायकं तैः
प्राचीं नीत्वा मतङ्गक्षितिधरनिकरोद्वृत्तगण्डाश्मजातं ।
द्रष्टुं पंपाधिनाथाद्भुतरथमिव तं नंदिनं वीक्ष्य हृष्टाः
त्यक्त्वा रज्जुं नमस्ते त्रिपुरहर महादेवदेवेत्यवोचन् ॥

तत्र केचित्पंपापतिरथमहानान्दिनं नन्दिनं दृष्ट्वा अतिहृष्टाः साष्टाङ्गमष्टाकृतिनुतिनतिततीर्विधायाध्याय कृतार्था भवाम इति वंदतस्स्फुटघटित मूर्धांजलयोऽभवन् ।

विद्वान् कश्चिदवोचदेवमवनीदेवाः शृणुध्वं शिवं
साम्बं श्रीपरमेश्वरं रथगतेर्वेगात्पुरस्तादपि ।
गच्छन्तं निजभक्तरक्षणकृते दैत्यान्निहन्तुं तदा
नन्दी भक्तगणोऽत्र वर्तत इति ज्ञात्वा रुरोधादरात् ।

दैत्याश्च कपटकिटिगजव्याघ्रादिरूपमूकासुरप्रभृतयः पूर्वमेव मृगयाविनोदेन भवता निहताः प्रद्वेषेण पुनः कलावतीर्यकलिकालानुकूलभगवद्बौद्धावतारकृत्यश्रौतस्मार्तादियागदूषणकार्यसाधका दुरात्मनिशाचरध्वान्तपरिकल्पितदुर्मतमहामोहाः मोहानुवर्तिनोऽपि स्वकीयकर्मानुसारिबुद्ध्यापादितशिवनिन्दयैव नष्टा भविष्यन्तीत्यतः पुरतो न गन्तव्यमिति प्रमथगणाध्यक्षेण महोक्षेण विज्ञापित इव सर्वज्ञः श्रीविरूपाक्षदेवो रथमस्थापयत् ।

तेऽमी भूमिसुरास्तदीयवचनं श्रुत्वाऽब्रुवन् पंडितं
सानन्दाः शिवभक्तवर्य भवता विद्वन् यदुक्तं हि तत् ।
सत्यं दुर्मतवर्तिनो ननु भवन्त्येते कलौ राक्षसाः
श्रौतस्मार्तविदूषणात्सुमनसां द्रोहाय दुष्टा भुवि ॥

त एते निजसमार्जितकर्मानुसारिमत्यापादितशिवनिन्दयैव नष्टा भविष्यंतीति वदन्तं प्रमथगणाध्यक्षं महोक्षमिव दिवि देवा भूदेवा वयमित्य महान्तं ! भवन्तं सत्यमस्तु वचस्तवेत्यनुमोदायामः ।

तत्रत्यास्सकलास्तूर्णं तथास्त्वित्यवदन् द्विजाः ।
कामं निशाचरध्वान्तविनाशाय कृतस्पृहाः ॥

तदानीमेव सर्वे जना एतद्वचनानुमोदनायेवेति हर्षेण स्वस्वकरकमलतलतालयुगलास्फालनमकुर्वन् ।

कशाघातप्रभूतेन ताडिता इव कर्णयोः ।
तच्छब्देन दुरात्मानः स्थेमानं न दधुस्तदा ॥

तत्र केचित् दुर्मदध्वान्तानुवर्तिनो निशाचरा मदान्धा दिवान्धा इवाज्ञातसहस्रभानुप्रकाशा अपि खरदूषणादिवन्निजनक्तञ्चरताचरितपरदूषणा विबुधैस्सह विवादयुद्धाय समुद्धतास्समेत्य निरीश्वरवादनिराकरणपूर्वकसेश्वरवादवेदप्रामाण्यादिसंस्थापनपरभा .... प्राभाकरादि महाग्रन्थानुबद्धपूर्वमीमांसाप्रसंगावसरसंगत्युपन्यस्तोत्तरमीमांसाशास्त्रसारभूतपर शिवैवाद्वैत सिद्धान्ताखिलवेदान्तमुख्यतात्पर्यविषयाद्वितीयब्रह्मपरमार्थप्रकाशकाधिकरणरत्नानुगतकानीनसूत्रमालिकालंकृतश्रीशंकरभगवत्पादसमुद्भूतशारीरकभाष्याब्धितरंगपरंपरायितवचस्ततिसमुज्जृंभद्द्विजराजतेजस्तिरस्कृताः पलायिता नष्टा इव बभूवुः ।

सदा केचिद्दुष्टाः कृतपरमशिवद्रोहमतयो
बभूवुस्ते पंपापतिरथमहे क्षत्रियवरैः ।
कथञ्चिद्व्याजेन प्रहृतनिजसर्वांगकलितक्षतेभ्यस्तत्काले च्युतरुधिरपूराक्तवसनाः ॥

किंच दुर्मतानुसारिणः केचिद् वैश्या अपि निजकुलाग्रदैवतशिव-द्वेषेण नष्टसन्ततयोऽप्यवशिष्टा अर्थार्जनकांक्षयैव विरूपाक्षदेवमहोत्सवयात्रागतरथोत्सवसमय एव चोरवणिग्व्यवहारवंचिताः हतभाग्या भिन्ना बभूवुः ।

तुरीयवर्णादिषु केचिदेव
निकृष्टजातीयमतप्रवृत्ताः ।
शिवद्विषः पातकिनो विनष्टाः
परस्पराजिक्षतभिन्नगात्राः ॥

ततोऽवशिष्टा ये ते तदानीं भयभक्तियुताः दुष्टनिग्रहशिष्टपरिपालनार्थ-धृतलीलाविग्रहोत्तमाङ्गवक्राकृतिदोषाकरेन्दुधरणप्रकटिताखिलमुनिमानसमधुक-रोल्लासकरचरणसरोरुहस्मरणपरिचरणाचरणपरायणान्तःकरणषट्चरणप्रेरण-शरणागतभरणादरणकरुणार्द्रहृदयकलितभक्तिवात्सल्यकृतकालमृत्युहननमृक-ण्डुमुनिकुमारसंरक्षणादिचतुराननाद्यघटितार्थघटनानुकूलसामर्थ्यादिमहामहिम-दूषणविध्वस्ताध्वरदुरात्मदक्षप्रजाप्रतिशिरः .... हतशासनाधीनसकलसुरासुर-क्रियमाणसाष्टाङ्गप्रणामनिवेदनव्यापारितानेकप्रमथगणाध्यक्षमहोक्षवाहनश्रीवि-रूपाक्षदेवास्मान् पाहीति भूयो भूयोऽपि वदन्तस्सांबशिवं शरणमा-जग्मुः ।

कृपानिधिरतश्शिवः शरणमागतान्सागसोऽ-
प्यमूननुगृहीतुमागत इह प्रसन्नः परम् ।
इतीह जनताऽवदत्प्रमुदिता तथैवागता
रथे महति तं शिवं मनसि मन्यमाना सती ॥

तदनु सुमनसः पार्वतीपरमेश्वराविव सावधानेन समानदेशेऽतिसन्निहितौ शिवरथाववलोक्य प्रमुदितान्तरङ्गकलितभूतदयासमुद्रसंभूतवाक्सुधारसधारा-स्वादसन्तोषिताखिलजनं सापराधा अपि त्वद्भक्तास्सर्वेजनाः सुखिनो भव-न्त्विति साम्बशिवं प्रार्थयामासुः ।

महोन्नतरथद्वारदेशात्कुसुममालिका ।
ततो दैवविमुक्तेव पपात जनमूर्धसु ॥

तदनु सर्वेऽपि प्रमुदिता धरणीसुरा नमः पार्वतीपतये ते हर हर महादेवेत्युच्चैर्वदन्तः प्रदक्षिणगत्या महादेवरथस्य पश्चाद्देशमगमन् ।

कार्यकारिजनस्तत्र रथरज्जुप्रसारणम् ।
अकरोत्तूर्णमाज्ञप्तो देवसर्वाधिकारिणा ॥

तदैव देवार्चकेऽपि भव्यशिवमूर्तौ द्विजराजशेखरगुर्वनुज्ञया पूर्वमहागोपुराभिमुखे कुर्वति सति रथोऽपि विश्वतोमुखपंचमुखाधिष्ठिततया पश्चाद्भागस्थितजनाभिमुखो बभूव ।

केचित्तदैव शिवभव्यरथं प्रणम्य
गन्तुं निजान्प्रतिगृहानिह येतिरे ते ।
पम्पाधिनाथरथदर्शनकौतुकेन
बध्वा कवाटमविलंबितमागता ये ॥

तदनु सहस्रभानुः भानुरपि विरूपाक्षदेवरथोत्सवावलोकनानन्दितमनाः स्वमातुः प्राच्या एतद्वृत्तान्तकथनाय सत्वरमेव गन्तुकामः सर्ववेदक्रतुतीर्थयात्राचरणफलाधिकफलप्रदमहारथस्थितशिवमूर्तिमुखारविन्दसन्दर्शनग्रहणाभिलाषेण रथद्वारसमाम्बरप्रदेशावतीर्णोऽभवत् ।

कश्चित्पण्डित एवमाह गिरिजानाथस्य पंपापतेः
आदर्शं रविबिंबमेव सकला देवा मुदाऽकल्पयन् ।
स्वामिन् पश्य सुदर्शनं तव विभोरादर्शमत्यद्भुतं
दिव्यं त्वत्प्रतिबिम्बसान्निधिवशादस्य प्रभा स्यादिति ॥

तत्रत्यधरणीसुरास्तद्वचनचातुरीचमत्कृतहृदयास्तमभिनन्द्य परपतिक्रियमाणप्रार्थनया रथरज्जुपाणयोऽभवन् ।

विरूपाक्षो देवः कृतदनुजसंहारजनित-
प्रमोदादित्युच्चैर्धृतजयपताकानिव रवेः ।
करानुत्पश्यद्भिस्सपदि विबुधैर्भूमिविबुधैः
समाकृष्टं स्वीयं रथमथ मुदाऽचालयदिमम् ॥

तथैव तास्मिन्नपि रथे सत्वरमेव शैवतुरीयवर्णादिक्रियमाणसमाकर्षणात्प्रचलिते सति धरणीसुराःशनैस्सहैव समागमनमायातौ शिवरथावालोक्य किमेतौ मेरुमन्दरौ, किमुतेन्द्रमहेन्द्रौ, किमु रामलक्ष्मणौ, किमथवा रामकृष्णौ विरूपाक्षदर्शनाय समागच्छतो, विलासेन हरिहरौ संचरतो वा निजभक्तलोकपरामर्शाय गृहीतमन्दगमनौ प्रसन्नौ पार्वतीपरमेश्वरावेवोत्पश्य पश्येत्युपगतबुधानभिधाय पंपामनोहर हर महादेव नमस्तेऽस्त्विति शिवनमोवाकमुच्चैरुच्चरन्तः पुरत एव गन्तव्यमित्यतिसंभ्रमेणात्मीयरथं द्रुतमाकृष्य मध्यप्रतोलिधूलिपटलाच्छादितगात्राःपरिश्रान्ता विश्रान्त्यै परित्यक्तरथरज्जवोऽभवन् ।

तथापि श्रीपंपापतिरथगतिस्तत्र सजवा
न विश्रान्ताऽत्यन्तं प्रकटयितुमीशाधिकबलम् ।
पतन्नग्रे दैवाद्रथचरणभग्नोरुरभवत्
महादेवं द्वेषाच्छरणमगतः कश्चन तदा ॥

तदानीमेव कार्यकारिणोऽतिकुशला रथचरणचतुष्टयान्तरालगतयोऽपि पतितं तं जीवन्तमेव तस्मात्प्रदेशान्निष्कासयामासुः ।

पंपापतिः पुनरपीह पुरःप्रधाव-
दुर्वीसुपर्वगणमध्यगतं वदन्तम् ।
स्वामिन् पराकृतमनोऽत्र निधेहि पाही-
त्यस्थापयद्रथमवेक्ष्य तदात्मभक्तः ॥

ततस्सर्वेष्वपि धरणीसुरेषु प्रमोदातिशयेन साम्बशिवं प्रणम्य आत्मीयरथस्य पुरतस्सावधानेनैकत्रावस्थितेष्वन्यत्र पंपार्यरथागतिवेगं प्रधावितेषु जननिवहेषु क्वचिन्निश्चलबलात् क्वचिच्च परिसरद्वारपूरभरभरिता सरिदिव रराज राजशिरोमणिराजधानीप्रतोलिः ।

अत एव विरूपाक्षदेवस्तत्तीरवासिनाम् ।
मुक्तिप्रदो मुमुक्षूणां यतो मोक्षगुरुश्शिवः ॥

अत एव च,

तत्र रथ्यापगायां श्रीपंपेशः पार्वतीयुतः ।
रथनावं समारुह्य विजहारेव मूर्तिमान् ॥

किंचात्र परमेश्वरो राजशेखरोऽपि सकलव्यवहारप्रवर्तकोदारवणिगिवा-नितरसाधारणोत्तमवाणिज्यवृत्त्याऽर्थोपार्जनाय रथनावमारूह्य मूलायतन-समुद्राद्रथ्यापगायामागत्य तत्तटमण्टपश्रेणिस्थितात्मभक्तेभ्यः पुण्यपण्यदाने-नानेकविधधनान्यर्जयन्नर्थार्थिभ्यः तत्तदपेक्षितचतुर्विधपुरुषार्थान् प्रददौ ।

अपि चादिकिरातोऽत्र दुष्टनक्रजिघांसया ।
पिनाकी खण्डपरशुः अवर्तत रथस्थले ॥

अन्यच्चायं महापूर्वातिचतुरनाविक इव परतीरसुखलिप्सयैव समर्पितात्ममानसान्तराननवरतानुष्ठितशैवव्रतादितपःक्षीणपापान् शान्तान् वीतरागानन्यभजनान् जनान् स्वाधिष्ठितरथनावा प्रदर्शि····संसृतिसरित-मताराभियाता ? ।

त एते त एवात्र संसारिणोऽपि स्थिता वीतरागाः प्रशान्ता महान्तः ।
रथालोकनात्प्राप्तसंसारपारा इवाखण्डसच्चित्परानन्दपूर्णाः ।

तदैवासौ लोकबान्धवो विरूपाक्षदेवरथोत्सवावलोकनमुदिताखिलजनान-म्बुधिनिमग्न इव शीतांशुश्चरमगिरिगिरीशचूडामणिः विरक्तमपि लोकमत्रा-नुरक्तं विधातुमिव रक्तो मतङ्गहेमकूटादिशिखरेभ्योऽवरुह्य स्वाश्रयान्प्रतिगतेषु केषुचिज्जनेषु स्वयमपि महादेवरथप्रकाशनायेव निजतेजः प्रसारितकरैः करदी-पिकानलज्वालासु निधायाऽऽत्ममातृपुरुहूतसदनं प्रति पारावारवर्त्मन इव गन्तु-मस्ताद्रिशिखरादवरुरोह ।

सन्ध्यामुपासितुमसौ किमहस्करोऽब्धि-
तीरं महीध्रशिखरादवरोहतीह ।
मत्वेति विष्टपगुरोर्गुरुगोपुरेण
पम्पाम्भोऽन्तरित एव किमत्र कुर्वे ॥

इत्येवमुत्प्रेक्षमाणे प्रेक्षावत्येकस्मिन्नन्योऽपि कश्चिदसौ दिवाकरो दिवै-

वानुष्ठितदुष्टरजांभोजिनीसंगमक्रीडावाप्तदुरितप्रायश्चित्तभूतं भृगुपतनमाचरन्निव चरमगिरिमवरोहतीत्यवोचत् ।

तत्रान्यो विबुधः प्राह तमेनं ननु दुर्मते ।
दुरुत्प्रेक्षाद्वयीदानीं कलिता मूर्खसम्मता ॥

अयं खलु निखिलकर्मसाक्षी जगच्चक्षुः त्रयीमूर्तिः विश्वपवित्रपादो दिनमणिस्समुदयन्नेव निजरथसारथीभूतानूरुरुगाकिरणप्रसारणादेव रोदसीव्याप्ततमोमंडलं निवार्य दोषाकरचरणस्पर्शखिन्नां पद्मिनीं प्रसन्नाब्जमुखीं विधाय तत्र मधुकरद्विजार्थिव्रजमनोरथपूरणाय कमलासविलासनिवासाभिवर्धमानमकरन्दरसार्थमापाद्य दुरात्मघूकेतरसकलप्राणिनामभयप्रदः समुदितोऽवनीसुरोत्तमैर्देवेभ्यो हविः प्रदापायिताऽहस्करो नमस्कारप्रियः प्रणतार्तिहरो हरिगुरुविरूपाक्षदेवरथोत्सवमालोक्य मुदितांतरंगोऽद्य दिवागतिरहितनिशाकरोऽपि शिवमहोत्सवं पश्यत्विति कृपयेव चरमाचलशिखरादवरोहतीति मन्ये ।

अन्योऽपि कश्चिदिति वाचमुवाच विद्वान्
प्रद्योतनो भुवनमेतदिह प्रकाश्य ।
मेरोरुदक्स्थितमपि स्वयमेव सर्वं
लोकं प्रकाशयितुमेति गिरेश्च पश्चात् ॥

तदनु सर्वेऽप्यवनीसुरास्सन्ध्यावन्दनसमयातिक्रमोपगतदोषापादितदोषनिवारकविरूपाक्षदेवरथं यथास्थलं प्रापय्यैव सन्ध्योपास्येति निश्चित्य भूयोऽपि गृहीतरज्जवो रथाकर्षणपरा बभूवुः ।

दिग्दन्तावलकर्णताडनसमुत्क्षिप्तालिसंघभ्रमं
सर्वेषां विदुषामपीह जनयत्संभूय भूमीरथान् ।
आक्रम्यापि समन्ततः पुरमिदं प्राप्तं तमोमण्डलं
शैवं द्रष्टुमिवाद्भुतं रथमहो पाणिप्रदीपोज्वलं ॥

तदनु विरूपाक्षदेवसेवककार्यकारिजनोत्क्षिप्तानन्तबाणं यत्र विनिर्मुक्तस्फुलिङ्गा इवान्तरिक्षान्तराले ऋक्षान्यदृश्यन्त ।

चन्द्रज्योतिषि तत्र सर्वसुजनानन्दावहे भास्वरे
भूदेवैस्स्वरितैस्तदा लघु समाकृष्टं रथं भासुरं ।
देवश्चन्द्रशिरोमणिस्स भगवान् चन्द्रागमाकांक्षया
मन्दं मन्दमचालयद् गुरुतरं कृत्वान्तरा स्थापयन् ॥

तदनु तमोमण्डले पूषाणि तुषारकरभयेनेव प्राचीं विहाय दूरतः प्रतीचीयमवलंब्य स्थिते सति जगदिदं कोकचकोरशोकप्रमोदम्लानप्रसन्नकटाक्षवीक्षितमिवावर्तत ।

कश्चिद्द्विजचकोरोऽत्र तदैवं प्राह बुद्धिमान् ।
द्विजराजोदयाशंकी ध्वान्तौघोऽप्यपलायत ॥

तदनु पुनरन्योऽपि समुद्गतचन्द्रानना पुरुहूतदिगङ्गना निजवैभवमवलोकितुमसहमानामिव ईर्ष्यया तदानीमीषदवशिष्टतमःपटलनीलपटावगुंठितमुखीं वरुणदिग्भामिनीमपहसतीवेत्यवदत् ।

भस्मोद्धूलितविग्रहश्च भगवान् देवो भवनीपतिः
दृष्ट्वेन्दुं शरणागतं करुणया पूर्णोऽनुजग्राह किम् ।
तेजस्स्वस्य निधाय तत्र नितरां नोचेदयं भासुरः
शुभ्रांशुश्च कलानिधिः कथमभूज्जातस्सुवर्णोपमः ॥

इत्येवमभिदधानं शिवभक्ताग्रेसरं किंचित्कविमन्यं द्विजराजं मत्वा सुमनश्चकोरेषु तदीयगवामृतास्वादनपरवशेषु चिरमवस्थातुमशक्तेन विरहिजनेनेवात्मप्रियविरूपाक्षदेवमयं जगदीक्षमाणेन शिवरथस्य यथास्थलस्थापनमवनीसुरैः क्रियमाणमदृष्ट्वैवान्यत्र न गन्तव्यमिति मानसनियमनिर्वाहाय स्थितेन केनचिद्वृद्धेन निखिललोकाध्यक्षमहोक्षवाहनदुरात्मदक्षरक्षोगणदमनदक्षकृपाकटाक्षवीक्षणाभिरक्षितसुजनात्मभक्तयोगक्षेमधुरंधरसर्वस्वतन्त्रत्वख्यापनयेव स्वीकृतास्वीकृतपरमपवित्रवेदराशेः स्त्रीकृतास्त्रीकृतपुरुषोत्तमदानवारेः सकलभुवनभयभङ्गायोपात्तगरलश्लाघ्यनीलकंठतारूपविकारपरिपालितबाह्याभ्यन्तरानेककोटिब्रह्माण्डमण्डलनागेन्द्रकुण्डलोद्दण्डपुण्डरीकासुरादिनिशाचरतिमिरप्रचण्डमार्ता–

ण्डसताण्डवपाण्डित्यविनोदितपार्वतीमनोहर हर महादेव सत्वरमायाहि मां पाहीति संप्रार्थितः पंपापतिरथमवलम्बितमचालयत् ।

ततस्सर्वे विप्राश्चलितमवलोक्येश्वररथं
स्तुवन्तः श्रीपम्पापतिमखिललोकावनपरम् ।
महादेव स्वामिन् परमकृपया पाहि सततं
त्वदीयानस्मानित्यभिमतमुदीयन्प्रचलिताः ॥

त एते केचिद्धरणीसुराः परमहर्षेण रथाकर्षणपराः महाद्वारान्तरालगतेषु पुरोगतेषु शनैश्शनैरागत्य यथास्थानस्थितमपि महारथं पुनःपुनराकृष्यास्मिन् अचालिते सति स्वस्थलावस्थितो रथ इति परित्यक्तरज्जवो वयमिदानीमिह कृतकृत्या भवाम इति मुदितान्तरङ्गाः साष्टांगं प्रणम्योत्थितास्तथैव विरूपाक्ष-देवमूलमूर्तिसन्दर्शनग्रहणाय संभूय धावत्सु केषुचिद्द्विजेषु सन्ध्यामुपास्यैव शिवदर्शनं ग्राह्यमिति सरितमुपसरत्स्वन्येषु स्वस्यावासमुपागमन् ।

श्रीपंपार्यरथेऽपि तुर्यजनताकृष्टे स्वकीयस्थलं
प्राप्ते तत्र वणिग्जनोऽपि सपदि स्वस्वापणान्निर्ममे ।
रथ्यायामथ खाद्यवस्तुनिचयं क्रीत्वा जनौघास्स्वकान्
ग्रामान्गतुमुपाक्रमन्त मुदिताः पंपोपकण्ठस्थिताः ॥

तथैव राजाधिराजनरपतिमहाराजभूमीन्द्रोऽपि सर्वाङ्गरजतकवचविराजमानैरावततुलितमत्तेभारूढ एव रथद्वारागतदेवार्चकाद्गृहीतशिवप्रसादफलकुसुम-मालिको महादेवरथं प्रदक्षिणीकृत्य रथ्योभयपार्श्वगतसौधावलीसमभ्युत्थित-सकलभूपालवन्दितो वसुन्धरामरावतीं निजां श्रीविद्यानगरीमगात् ।

ततः परपतिस्स्वयं रथसमीपवर्ती पुरः
प्रनर्तितसुराङ्गनातुलितपौरवाराङ्गनाः ।
शिवं मनसि संस्मरन् प्रकृतकार्यनिर्वाहकं
मुहुर्मुहुरुमापतेः किल चकार सेवां मुदा ॥

तथैव देवार्चकोऽसौ रथद्वारदेश एव स्वस्वावासजिगमिषयोपागत-जनांजलिषु शिवप्रसादकुसुमानि विनिक्षिपन् चिरमवस्थाय परपतिकृतप्रार्थ-

नया साम्बशिवमूर्ती सावधानेन बलाढ्येन यूनाऽऽत्मीयेन महारथादवरोहयामास ।

देवार्चकस्स्वयमपीह ततोऽवरुह्य
तस्मात्स पार्वतिसदाशिवभव्यमूर्ती ।
आदाय शैवजनतात्वरितोपनीत-
पीठे न्यवेशयदपूजयदेवमाशु ॥

ततो द्विजराजशेखरगुरुभूमण्डलाचार्यवर्यविद्यारण्यमुनिवर्ययतीश्वरचरणेषु शिष्यैस्सह ततोऽवरुह्य पुरोगतेषु शैवाः परपातिप्रेरितास्त्रिकूटपीठं संवाह्य पुरस्सरोस्सरादि (?) वाद्यवादकैः महाजनस्सहान्तरान्तरौ नटन्तीषु वारवनितासु देवालयमहाद्वारमाभिजग्मुः ।

महाद्वारमध्ये मुदा विष्टपेश-
प्रशिष्योऽवनीदेवसद्ब्रह्मचारी ।
समानीय पात्रेण पुष्पाणि चैवं
फलार्तिक्यमाला ददौ शङ्कराय ॥

तेन देवार्चकेन तत्पात्रं परिगृह्य शिवयोस्समर्प्य सप्रसादकुसुमं महाजनाभिनन्दितं तद्धस्ते निधाय शनैस्त्रिकूटपीठे महावलयाङ्गणमानीते सति केनचिद्धनाढ्येन वणिजा कामं ऋष्यमूकमतङ्गहेमकूटाचलदेवालयसालान्तरालमहागोपुरशिखरस्थलेषु प्रवर्तितविरूपाक्षदेवमहोत्सवदिदृक्षया क्ष्मातलागतनक्षत्रपंक्ति विभ्रमावहदेदीप्यमानदीपावलिक्षणेक्षणविनोदितमानसोल्लासातिशयेन सन्ध्यामुपास्य तदैव समागतेषु भूविबुधेषु कथाविशेषवित् काश्चिद्विपश्चित् सांबशिवमूर्तिहसन्मुखारविन्दमवलोक्य जगदीश्वरोऽयं महादेवोऽपि कृतकृत्यतयाऽप्यसंप्राप्तहर्ष इव प्रकाशत इत्यवोचत् ।

अन्योऽप्येवमुवाच तत्र विबुधो देवो विचार्य स्वयं
सान्द्रानन्दघनः परात्परचिदाकाशः परं ब्रह्म यः ।
यो वेदान्तवचोभिरस्य विदितः सोऽहं त्वया सङ्गतः
संसारी विहरामि चेति हसतीवोद्वीक्ष्य पंपाम्बिकाम् ॥

अन्योऽपि कश्चिदयं विरुपाक्षदेवो रथोत्सवानंदितमानसोल्लासक्रियमाण-सरससल्लापसंतोषितसमयपार्वतीप्रदर्शितात्मभक्तेभ्योऽभीष्टार्थं प्रदातुमिव हसन्मुखः प्रसन्नो भवतीत्यवोचत् ।

देवार्चकः करधृतव्यजनो महेश-
सेवापरोऽपि सुजनांजलिषु प्रसादम् ।
देवस्य पुष्पनिचयं मुदितः क्षिपंश्च
द्वारं द्वितीयमपि पीठमुपानिनाय ॥

तदनु तत्रैव परिचारककृतचरणक्षालनोऽयं त्रिकूटपीठमायतनप्रदक्षिणगत्यैव यागशालाङ्गणमानीय तिष्ठन्नेव कुंभार्तिक्येन जनदृष्टिदोषमपवार्याऽप्सरस्त्रीमनीषावहपौरवारयोषाकरकमलकलितकनत्कनकपात्रमध्यकर्णिकादेदीप्यमाननीराजनार्तिक्यसेवानन्तरमवन्यामवतारिते सति पीठे भक्तजनार्पितफलकुसुममालाभिः पुनः पूजां विधायान्तःप्रवेशरहितान् प्राप्तप्रसादसन्तुष्टान् संभाव्य भव्यसितमूर्तीर्गृहीत्वा यज्ञसदनान्तर्गतमणिमंचतले निवेशयामास ।

ततः कृत्वा पूजां पुनरपि च तेनात्र विधिवत्
तयोः प्रीत्यै भक्त्या गुरुचरणमुख्यावनिसुरान् ।
स्वयं संपूज्यार्थान् फलकुसुममन्त्राक्षतचयान्
प्रदत्तानेवैते सपदि परिगृह्याऽऽश्रयगताः ॥

तदनु ऋत्विगवनीसुरा अपि रथोत्सवोत्तराङ्गजपहोमादिबलिहरणान्तं महामहयज्ञकर्म विहाय ईषदवशिष्टयागकृत्याऽपि निर्वर्तितमहोत्सवतया कृतकृत्यप्राया भवाम इति प्रमोदातिशयेन सांबशिवं प्रणम्याधिकारिपुरुषानुमत्या स्वस्वावासमागमन् ।

ततोऽधिकारी स्वयमेव सम्यक्
विचार्य भक्तार्पितवस्तुजातम् ।
देवस्य गोपैर्महयज्ञशालां
संरक्षितामाश्रयमाप कृत्वा ॥

तत्राऽयं द्विजानाकार्य पंपापतिप्रीणनाय सरससुगन्धिचन्दनविलेपनमत-

ल्लिकामल्लिकाप्रसूनमालाभिस्सगुडोदकचणकदलसदक्षिणातांबूलादिदानैस्स-
मर्चयत् ।

तत्र पंपापुरे सर्वे गुरुप्रभृतयो द्विजाः ।
स्वस्वावासेऽर्चयामासुश्शिवप्रीत्यै महीसुरान् ॥

तथैव यात्रागता अपि पुण्यपरिपाकवशाद् भाग्यवन्तो विकीर्णविशुद्ध-तण्डुलचूर्णशंकावहवासन्तचन्द्रचन्द्रिकासम्भतेषु नदीमध्यपुलिनस्थलेषु समागतद्विजेन्द्रान् विरूपाक्षदेवप्रीणनाय चन्दनविलेपनचित्रविचित्रायतव्यजनवीजनप्रशस्तप्रसूनमालाभिरभिपूज्य नानाविधदानाद्यनेकोपहारसमर्पणाद्युपचारैस्सन्तोषयामासुः ।

तुतुषुस्ते वसन्तोष्मरथाकर्षप्रधावनैः ।
तप्तास्तदोपचारैस्तैः बहिरन्तश्च शीतलाः ॥

तत्र विबुधाः केचिदत्रैव निषण्णा विनोदेन चन्द्रमवर्णयन् ।

कश्चित्तत्र विपश्चिदेवमवदद्वाक्यं मनोरंजकं
मन्ये चन्द्रमसं निशायुवतिकालालाटिक स्थानकं ।
शुद्धं चन्दनरेणुजातकलितं स्रष्ट्रा तदन्तः पुरा
निक्षिप्तो मृगनाभिबिन्दुरधुना प्रत्यक्षतो दृश्यते ॥

तदनु पुनरन्योऽप्येवमवर्णयत्—

अयं क्षीराम्बोधेरजनि रजनीनाथ इति हि
प्रवादो नो युक्तो भवति मम भात्येवमुचितम् ।
परं मन्दाकिन्याश्चलति जलजं भास्वरमतो
मरन्दासक्त्याऽस्मिन् मधुकरकदम्बो विलसति ॥

ततोऽन्योऽपि मन्येऽहमिमं देवासुरमथ्यमानपयःपारावारान्तरादपि समुद्भूताद्भुतनवनीतगोलकमुतः (मन्तः) कलितकालकूटलवस्पर्शापादितमालिन्यमत एवास्य कृष्णपक्षगतस्याप्यर्ककरसंपर्कादद्रवीभूय क्षीणमप्यङ्गं विशुद्धपक्षमहादेवानुवर्तनेन पुनः परिपूर्णं भवतीत्यवोचत् ।

चन्द्रश्चन्दनशीतलो यदि भवेदुक्तं तया सङ्गतं
नैवं सर्वजनस्य चेद्विरहिणामुष्णांशुरुज्जृंभते ।
रात्रौ नवै दिवाकरोऽपि तु भवत्यौर्वाग्निरेषोऽबुधे-
रुद्दामद्युतिरुद्गतोऽन्तरमिलद्धूमस्तपत्यम्बरे ॥

इति वदन्तं महान्तं कविं पान्थं मन्यमानोऽन्यः कविर्विना नारीं निष्फला लोकयात्रेति वचनप्रामाण्यज्ञानवान् सकान्त एव पंपाक्षेत्रयात्रागत एवमवोचत् ।

तुषारपिण्ड एवायं सच्छिद्रो भासतेऽम्बरे ।
तपनातपतप्तानां तापं हर्तुं हरोर्जितः ॥

ततोऽपरेण विबुधेन महामहिमपरमप्रकाशनित्वा? सबाह्यध्वान्तानुगुण-दोषानुबद्धशून्यवादिपयानन्तनामकबौद्धदतं सच्छिद्रवर्तुलपुण्ड्रमनवलोकनीयं सन्मार्गगतैरेतद्गोलकमित्युक्तमाकर्ण्यान्योऽपि विद्वान् सर्वैरप्यवलोकनीय एवाय मित्यवोचत् ।

वियल्लक्ष्म्या देव्याः श्रुतिकलितताटङ्कमतुलं
विशुद्धच्छत्रं वा मदननृपतेर्जेतुरखिलं ।
विरोधिच्छेदायाद्भुतमहिमचक्रायुधमिमं
नभः प्रासादाग्रे कलशमपि वाऽहं तु कलये ॥

तदनु तत्समान एव विद्वानन्योऽप्येवमवदत् ।

मन्ये स्फाटिकमन्दिरं मनसिजक्षोणीपतेर्भामिनी
कामिन्या मधुसीधुपात्रमपि वा संराजितं राजितम् ।
देव्याश्चामरमन्तरिक्षविहरल्लक्ष्म्या विशुद्धं विभुं
श्रीगङ्गाधरदेवमूर्धजजपावली प्रसूनं परं ॥

किंच– सुधाकुंभं मन्ये ननु सुमनसां वा मृगपतिं
तुराषाड्दिग्दयां गगनगहनं प्राप्य शनकैः ।
चरन्तं हन्तुं वा तिमिरकरिणः शङ्करशिरः
किरीटं वा विश्वप्रसृमरमहो हंसमपि वा ॥

अपि च महादेवस्य द्वितीयनयनमत एवास्य सहजनिमेषोन्मेषावुत-नित्ययोगकृतनिमीलनोन्मीलने पक्ष्मणीवोभयपक्षावत एव चानेन सुधांशुबिं-बेन चक्षुषा सदैवपरिपूर्णकरुणार्द्रशीतलकटाक्षवीक्षणचन्द्रिकाप्रसरणामृतरस-निषेचनेन सकलमपि चराचरात्मकं जगत्परिपालयति सांबशिव इति ।

ततोऽब्रवीत्पल्लविको बुधोऽन्यः
प्रियानुरागादिति चन्द्र एषः ।
हिमांशुरेवात्र सुधांशुबिंबं
कांतं मुखं निर्जरसुन्दरीणाम् ॥

अत एवायं पयःपारावारसंभूतात्मभगिनीभूतकमलाविहारस्थलकमल-विलासविरोधिनिजतुषारकरप्रसारणकृतकामुकलोकातिशयितकामपुरुषार्थसाध-नप्रवृत्तभुजङ्गशेखरप्रियतमाभिसरणप्रयतमानमानिनीमणिस्वैरिणीवदनारविन्द-सङ्कोचसमासादितदुरितमालिन्यकलङ्कितो भवति ।

पद्मानि नैव मुकुलीकुरुते सुधांशु-
बिंबं मुखं तु कमलाक्षितयाङ्गनानाम् ।
निर्दोषमेव खलु निर्जरपीयमान-
बिंबाधरामृतरसं परिपूर्णमस्ति ॥

ततस्तादृश एवान्यः कविः सत्यमेवेदमनवद्यपद्यमुक्तं त्वया तुषारकरस्तु परप्रकाशभीत्येव परित्यक्तात्मानुकूलसङ्केतस्थलस्थितपल्लविकचरणप्रियतमा-भिसरणप्रयत्नजातविरहाग्निसन्तप्तकामुकीकटाक्षोल्कापातव्रणमलिनकिणांकितो भवतीति वक्तव्यमित्यवोचत् ।

नायं किणः किन्तु तमोऽत्र नीलः
तत्तामसीसङ्गतमोगुणस्य ।
शुभ्रांशुनानेन निशि प्रपीत-
मन्तःस्थितं वा तम एव लक्ष्यते ॥

इत्येवमभिदधानमेकमन्यः कविरवोचदिति ।

नेदं तमः किन्तु समुद्रपङ्कं मन्येऽथवा व्याधमिमं शशाङ्कम् ।
नभोवने बाधितुमत्र पान्थान् चरन्तमृक्षादिविलीनहेतुम् ॥

ततोऽन्यस्तु कविरुवाच दुर्गेशशिरस्स्थितजटापटलाटवीनिवासी सकलजनमनोहरश्चोरः किरात एवायं किन्तु मृगयाविनोदेन गगनगहनागतमेनं मृगाङ्कमेवं मन्य इति ।

भूच्छाया प्रतिभाति तद्धिमकरे यस्मादिमं पंडिताः
आदर्शं प्रवदन्ति केचन भुवो देव्याः परे तां विदुः ॥
इन्दौ चन्द्रशिरोमणेर्भगवतो भूषाहिराट्फूत्कृति-
स्पर्शापादितनीलमाकलयते कश्चिच्चकोराङ्गनाम् ॥

इत्येवमापादयन्तं महान्तं पण्डितं प्रत्यन्योऽप्यवोचदयं खलु निखिलदेवासुरमथ्यमानपयःपाथोनिधेर्मन्थदंडीकृतमन्दरमहीधरमूलेन्द्रनीलोपलशकलसंकलनावाप्तश्यामरेखांकित एव संभूत इति कविभिरुपमोत्प्रेक्षारूपकदीपकातिशयोक्त्यादिसंसृष्ट्युल्लेखालङ्कृत्यलंकृतवचोभिर्बहुभिर्बहुधोल्लिख्यते ।

परन्त्वसावेव महेशमौलेर्विभूषणं जीवनमौषधीनाम् ।
विशेषतो देवगणस्य चैवं ज्योतिर्जगत्तापकरं विचित्रम् ॥

किंच महामुनीश्वरात्रिनेत्राविर्भूतत्रिपुरारिमहारुद्रनेत्रमपि शीतांशुः लोकमातृसोदरतया लोकमातुलोऽपि वाहिनीपतितनयोऽयमेव राजपदाभिधेयोऽत एव पंचजनमानिनीजनमनोरंजनकरात्मकरप्रसारणत्याजितमानसतीपतिस्त्रीपुरुषघटननैपुण्यशाली निखिलजीवराशिभोगायतननिर्माणपरब्रह्मसहायभूतमकरध्वजमहाराजसाम्राज्याखिलजगद्विजयव्यापारनिर्वाहकाधिकतेजःप्रकाशविहरद्भुजङ्गनिर्जरजेगीयमानयशोविलासो राजाधिराजविद्यानगरेशनरपतिमहाराजवंशमूलभूतोऽपि सर्वोपरि विराजमानकुवलयोल्लासकरचरणप्रसरणो महोन्नतिपदवीमास्थितोप्यनितरयाचकचकोरामोदाविधायकसुधारसानिषेचनेन सकलप्राणिनां नेत्राणि शीतलयन् परमानन्दकरो भवति ।

नवोनवोऽद्यापि च जायमानो
भवत्ययं नित्यमहो सुरेभ्यः ।

अग्न्यादिकेभ्यो विदधाति भाग-
मायन् ददातीह जनाय चाहुः (युः ?) ॥

इत्येतदाकर्ण्य मुदितान्तरङ्गास्सर्वेऽपि विबुधास्समुत्थाय सोमोऽस्माकं ब्रह्मणानां राजेति याजुषस्संहितावचनं 'तस्मात्सोमराजानो ब्राह्मणा' इति ब्राह्मणं चोदीरयन्तस्तमेनं द्विजराजं प्रणम्य स्वस्वावासमगमन् ।

तदैव मदनस्स्वयं प्रभुरपि त्रिलोकी जये
निशाकरसखो बली मलयमारुताश्वस्थितः ।
जिगाय सकलं जगज्जयरमा परं शूरम-
प्युपैति ससहायकं पुरुषमेव नान्यं यतः ॥

एतेषु मृगाङ्कमन्मथमलयानिलेषु त्रिष्वपि समुदितेषु विधिना पृथक्कृतमपि द्वन्द्वमेकं कर्तुमिवारात्संचरमाणेषु

वृषस्यन्ती काचित्पुलिननिकटे तत्र नालिनी
विनिश्वस्येदानीं हरिहरचरित्रं सुमहितम्
परस्त्रीमोहार्थं सरसमभिनीतं नटविटैः
प्रियस्तेषां द्रष्टुं गत इति सखीमाह वचनम् ॥

ततस्साऽपि चतुराकारतर्कितपरोङ्गिता सखी तां(?) तत्प्रियान्वेषणाय रथ्यां प्रतिगन्तुमुद्युक्ताऽभवत् ।

ततस्सैषा कान्ता नयनपराचिन्तां प्रियसखीं
प्रहीयापि स्वीयप्रियविरहसन्तापकलिका ।
क्षणादेव म्लानं सपदि भजमाना हिमरुचेः
स्मरार्ता निर्मोहान्मलयपवनेनैव लालिता ।

तदनु कथंचिदाश्वासितालिभिरेषा पद्मिनी संज्ञामवाप्य निजावासाङ्गणपुलिनस्थलं गता सती चन्द्रमेवमदूषयदनन्तरं प्रार्थयतेति ।

चन्द्र त्वं ननु पातकी भवसि किं राजीवनेत्रास्स्त्रियः
बाधित्वाऽपि च केवलं सरसिजान्यावासभूतान्यपि ।

पद्माया मुकुलीकृतानि भवता किं पान्थलोकान्तक
स्थित्वा कामरिपोः शिरस्यपि कथं कामस्य मित्रं भवान् ॥

किं च निरतिशयातितीक्ष्णतेज....रस्तवस्तु तत्रात्रिनेत्राविर्भूततया–

शीतांशुर्नभवस्यहो हिमरुचे घर्मांशुरेवास्यतः
त्वां धृत्वा शिरसा शिवोऽमरधुनीं सन्तापहृत्यै दधौ ।
क्षीरांबोधिरतश्च तेन निहतं धत्ते त एव स्वयं
पीत्वाग्निः प्रथमां कलां तव सुधाभ्रान्त्योष्णतामाप्तवान् ॥

पुरा खलु पुराणपुरुषेणात्यन्तस्सन्तापकारिणं त्वामन्तरंगाद्बहिर्निष्कास्य परमप्रेमास्पदरमास्नेहेन जीवन्मुक्तिं प्रापितेऽपि त्वय्येव भगिनीपतिविधुसोम-नामधेयात्मीयताभिमानसापराधे दुरात्मनि प्रयोक्तुमुचितं रथांगं निरपराधेऽपि राहौ नवग्रहसंग्रहायैव प्रयुक्तमासीत् ।

किं सृष्टवान्विधिरपीह भवन्तमब्ज-
जैवातृकत्वमपि किं त्वयि दत्तवांश्च ।
पापी चिरायुरिति सत्यमभूदनेन
दैवं विनिन्द्यमधुना न भवान्विनिन्द्यः ॥

रे रे निशाचर सुमनस्त्रीबाधजनितामितदुष्कृतपरिपाकेन कदाचिदपि ते हि दंशो भवेत्तव कला षोडशधा शकलीकृता स्यादिदानीन्तनविजृंभणा-हंकारेण पुरो भाविनीमवस्थां न जानासि । किं बहुनाऽब्जोऽप्यब्जवैरीति विषम-मेव तत् । अथवा विषराशौ विषेण सह जातस्य बाल्य एव प्रकटितकौटि-ल्यस्य भवतो दोषाकरस्येदं विषमं न भवति ।

चन्द्र त्वं यदि मन्यसे पुनरिमां योक्ष्यामि भर्त्रेति चेत्
मामश्रान्तमपि प्रियानुसरणं ज्ञात्वाऽपि किं बाधसे ।
किन्तु त्वां मलयाचलानिलमपि स्वान्तस्थितं मन्मथं
मां चैतन्नगरे नहि प्रियपुमान् लक्ष्यीकरोति स्वयम् ॥

ननु विद्वानपि स एष मत्प्रियोऽस्मान्नगरे निरतिशयीकृतकामपुरुषार्थ इव कामुकः पारावत इव तत इतः प्रयोजनाय गत्वाऽऽगत्य दिवैव मदाश्लेषचुम्बन-

लम्पटोऽपि कुलटाविट इव परित्यक्तमन्दाक्षस्सन्मित्रसन्निधानेऽपि पटुचटुल-चाटूत्तरवक्रोक्तिविनोदितमानसोऽप्यतिकामुकः काम इव प्रतिरात्रिनिरन्तरा-नुभूतमत्तेभसुरतोत्सवानन्दोऽप्यप्रतिहतशासनाधीनसकलजगज्जेगीयमानयशः कर्पूरवासनावासितदिङ्मण्डलेश्वरमकरध्वजमहाराजाज्ञापित इव भवानपि भृत्य इव मद्वचनानुसार्यपि साम्प्रतमेतद्विरूपाक्षदेवमहाक्षेत्रमागत्य तपस्वीव त्रिषवणस्नायी महायोगीव योगासनोपवेशेन मन्त्रजपैकनिष्ठो देवार्चक इव शिवलिंगार्चनपरो महानपि हीन इव निजोत्तमत्वबुद्धया चारितमाणवकाद्यवनी सुरसमाराधनो महादेवरथोत्सवावलोकनप्रमुदितान्तरङ्गोऽपि विनोदेना .. दाननिजध्रुकंकणा सुब्रह्मण्यानिवासप्रदेशस्वस्थलस्थितचिन्तामणिकल्पितानेक-विधभोज्यामृतवस्तुभोजनसंतृप्तसकलद्विजराजविराजमानपम्पानगररथ्यायां हरि-हरभक्ताग्रगण्यागण्यमहिमशरण्यसत्पुरुषवरेण्यपुण्यचरितकथाश्रवणाय वयस्यै-राहूतो निर्मोहानामपि मोहोत्पादनाय मलयाचलानिलाश्वासमारूढे मन्मथे भव-त्सहायेन शनैश्चरत्यपि निष्काम इव मां विहायैव गतो वर्तते ॥

यदि त्वं समर्थोऽसि चन्द्र त्वयाऽहं
प्रियं प्रापणीयाऽधुना त्वां नमामि
मदीयान् प्रभो देव सर्वापराधान्
क्षमस्वेह सौभाग्यमायुश्च देहि ॥

तदनु सैषा योषाजनभूषणमपि कामुका[का*]ममदूषयदभूषयच्चैवम्-

रे रे मन्मथ दुर्मते मयि वृथा बाणः प्रयुक्तस्त्वया
नु ज्ञातं मम मानसं स्मर कदाप्यन्यं नहि ध्यायति ।
चक्षुः पश्यति नैवमन्यपुरुषं चन्द्रं चतुर्थ्यां यथा ।
श्रोत्रद्वंद्वमपि श्रुणोति न परं प्राणेशकान्तादृते ॥

ननु पंचशर दुरात्मन् अनाथाबलाजनोपरि जैत्रयात्रामारभ्य सदागति रथमारुह्य प्रान्तविर(क?) सचापे षट्चरणावलीज्यानमिते कुसुमेषुसन्धानेन विद्यारतोस्य(?) शौरिकुमारस्य मारस्य तत्किं पौरुषं तत्किमारोहणम् स को धर्मस्सकोगुणः तत्किमनुसन्धानमिति द्विजराजोऽपि भवन्तमपहसतीव ।

लज्जाऽपि तव नास्त्येव न भयं दुष्कृतादपि ।
अरेऽनंगपिशाचात्र क्षेत्रे चरसि शूलिनः ॥

किं च मनोजातोऽपि मनसोऽतिव्यथादायी सन् इह जनमोहनाय प्रयतमानस्य भवतस्सहायभूतासु वनितासु निजसेनास्वपि द्रोही भवसि ।

पित्रोराधिकरस्त्वं हि किमुतान्यशरीरिणाम् ।
पुराहतो दैत्य एव भवान् जातो हरे रुषा ॥

अत एव कांश्चिद्दिवा संचरन् कांश्चिन्निशाचरो भूत्वा स्वयमेक एवाखिलप्राणिनो निद्राहारविवर्जितान् निस्त्रपांश्च विधाय बाधसे ।

एतादृशे त्वयि सुतेऽप्यत एव पुरारिणा
प्रयुज्यमाने नेत्राग्नौ तूष्णीमास हरिः पुरा ॥

परन्तु भगवान् चन्द्रशेखरः स्वयमेव दयालुतया महतामपि चन्द्रेन्द्रादीनां पराभवजनितमयशः सम्पाद्य तद्विकारकारणं विश्वामित्रपराशरादिमुनिजनानां वाताम्बुपर्णाशनानामपि निजशासनाधीनतोत्पादितात्सुरस्त्रीनाविककन्यादिकामिनीभूतमुखपंकजलालित्यमत्यापादितकृत्याचरणपरत्वविधायकमात्मनोऽपि चित्तचांचल्यकारणं त्वामनङ्गीकृत्याप्यङ्गीचकार पुनरिति बाधसे जगदिदम् ।

विवेकस्तावदेवात्र विदुषामपि वर्तते ।
यावत्पतन्ति ते बाणाः शरीरे न हि मन्मथ ॥

यदि तु निर्मोहानामपि मोहोत्पादको भवानधुनैव विधाय समोहं प्रियमिहानयेत् ।

स्तौमि त्वामिह भव्यकामपुरुषार्थाधिक्यसम्पादकं
लक्ष्मीपुत्र वसन्तमित्र विविधस्तोत्रस्य पात्र प्रभो ।
येनते भवतो विधीश हरयोऽप्याज्ञाधराः केवलं
वाणी हैमवती समुद्रतनया श्लेषानुरक्तास्सदा ॥

अतोऽहं त्वामिह प्रार्थये मदीयापराधान्क्षमस्व सुधाकरस्नेहोर्जितस्वाभाविकभूतदयापरतोपात्तातिमृदुलारविन्दादिकुसुमबाणपञ्चकचलच्चञ्चरीकप्रपंचावलिज्येषदाकर्षणत्र्यम्बदिक्षुदंडकोदंडदंडिताखंडिताखंडलाद्यनेककोटिब्रह्माण्ड–मंडलाखिलपिंडाण्डनिर्माणनिदानमहामहिमविलासास्पदशालिवाहनजननीवृत्तान्तविस्मितमानसपरित्यक्ताहंकारशरणागतपरित्राणबिरुदांक मीनकेतन पाहि मां कृपयाऽनिशं प्रियसंनिहितां विधेहीति ।

सैषाऽदूषयदत्यन्तमस्तौषीच्चैव मारुतम् ।
विद्धा तदंकुरैस्सूचीमुखैरिव पतिव्रता ॥

रे रे निराकार मरुत्त्वमपि बाधसे माम् ।

अरे मलयमारुत त्वयि समागते केवलं
पदं चलति तद्विधेर्भुवनभंगकारी भवान् ।
चरन्निह शनैरपि व्यथयति स्म चेतस्सतां
दुरासद यतो गिरौ विषधरैस्सहाऽऽस्ते सदा ॥

किंच दुरात्मन् एकदेशविकृतमनन्यवद्भवतीति तन्त्रात्साकारमध्यवर्णानलपदविकृतानन्यानिलशब्दवाच्यतयाऽतिसन्तापकरो भवानिह दैवेन जगत्पालनायाग्निकोणाद्दूरत एव कोणान्तरविनिपातितोऽपि चपलचित्तो मर्कट इव बहिर्निर्गत्याऽऽत्तगेधाऽपि समुद्धतस्सुमनसां जातमा..तेन पृथिव्यामपनोद्य परश्रेयोऽसहिष्णुरिव जिष्णुसदृशानामपि जनानां नयनारविन्देषु परागपरंपरामुत्पात्य तीर्थेष्वपि धूर्तकामुक इव संचरन् दिवापि धृतचेलोत्क्षेपणेन पतिव्रतानामप्यंगनानामभिमानधनापहारी यष्टुमिव सरित्तीररमणीयवनं गतो वसन्तसमयसमुज्जृम्भमाणतपनातपस्मातानलार्धानिष्टप्तशमीगर्भशाखिशाखारणिषु संचालनसंघर्षणाभ्यामग्निमुत्पाद्य मन्दानिलफूत्कारेण दृढं गत्वोत्क्षिप्तपलाशेन्धनं समिधं निधाय संवर्धितं विधाय समुत्थायानुग्रहीतेन पुरोहितेनाऽऽत्मीयेन परिसरतावर्तवायुनोपस्थापितकुशदर्भपुंजीलपरिस्तरणसहितेन पुण्यायतनाहितेन तार्णपार्णसमुदयप्रज्वलितेन तेन हुताशनेन परमेश्वरोत्पादितसकलजीवराशिजीवनाधारसुजीवनपावनपल्वलपांकिलशाद्वलस्थलकमलपारिभ्रमद्भ्रमरवारझंकामुखरितसहकारकिसलयसुहितपरभृतकुलकलकलकलाकलनकलितललि–

लागरुगुतश्रृंगाररसप्रधानपरिवर्तमानमकरध्वजमहाराजविलासास्पदसुरभिदेवदारुकालागरुचंदनादिमहीरुहसहितेऽपि विपिने परितो दंदह्यमाने सति कृतप्रायप्रायणीयादिप्रवर्ग्यदीक्षान्तहोम इवातिसंभ्रमयुतो दावदहनदाहभयादेकत्र पुंजीभूतानहिंसायै पर्यग्निकृतानुत्सर्जनीयानप्यारण्यान् सप्रसूतिहरिण्यादीन् सान्तर्वर्त्नीनपि यागीयेतरानपि मृगान् परोपद्रवमनाचरतोऽपि क्षीरादींश्च तत्रत्यान् प्राणिनः स्वमात्मन इवापश्यन् निर्दयो हन्तुकामस्तदैव दैवप्रेरणयासमुद्भूताद्भुतधूमस्तोमविभ्रमावहाभ्रश्रेणीगगनधुनीवेणीनिर्मुक्तमुक्ताफलमालिकासारशराकारनिरवकाशधारापतदम्बुवर्षप्रशमितेऽनुगते सति वह्नौ विध्वस्ताध्वरो दुष्कृती सन्ननूपमिदं यजनसदनं जातमेतेषामायुष्यमाधिक्यमश्विरेच्छैवगरीयसीति ज्ञात्वाऽपि पुनरहंकारेण दुष्टस्वभावान्निशाचरोऽपि भूत्वाऽतीत परिभ्रष्टः किरात इव पान्थान्दुर्गतिवर्गानपि प्रालेयकाले हिमानीसहायेन कठोरकुठारधारयेव परिपीडयता भवता पापाय परपीडनमिति शास्त्रात् बहुपापमेव कृतमिति पापिनं त्वामतिबलाढ्यमपि संहरिष्यति हरिस्स्वयमेव दशाधिकानन्तावतारो भगवानखिलांडकोटिब्रह्माण्डनायकः ।

इदानीं वा वायो कुरु सुकृतमस्मिन् शिवपुरे
महाक्षेत्रे नित्यं सुमतिरित आरभ्य भव ते ।
भवेदायुर्वृद्धिर्मलयमरुदाकल्पमखिल-
प्रपंचे संचारस्सततमपि च स्यादविहतः ॥

सुकृतं तु परोपकारः पुण्यायेति नयात् सुजनैरात्मेतरलोकोपकारकरणेनैव लभ्यं भवति ।

सद्यस्त्वया मह्यमिहोपकारः कर्तव्य इत्येतदवोचदेवम् ।
सर्वापराधान् पवन क्षमस्व महेशमूर्त्यष्टकसंप्रविष्ट ॥

स चोपकार इयानेव मम प्रेयानिहानेयो भवति भवतेति ।

नमस्ते वायो त्वं महितपरमब्रह्मपदवी-
मधिष्ठातुं निष्ठासमधिकगरिष्ठोऽत्र चरसे ।

वदिष्यामि ब्रह्म त्वामिति पवनस्सत्यमिति च
प्रभो वक्तारं मामवतु कृपया मारुत भवान् ॥

श्वसन सदैव त्वमेव खलु मुख्यप्राणरूपेण निखिलप्राणिष्वन्तर्यामितया चरसीति जगत्प्राण त्वदभावे तृणमपि वा न चलत्येवातस्त्वामेव जगद्व्यवहारासाधारणकारणं मन्ये ।

प्रियं मे घटय स्वामिन् तूर्णं मलयमारुत ।
आमोदमिवदूरस्थमिह चन्दनशाखिनाम् ॥

सदय सुजनश्रमनिवारणायैव सदागते स्पार्शनप्रमाणसिद्धस्पर्शन महात्मन् जगत्परिपालनायैव तिर्यग्गमनशालिन् प्रकम्पनेन पतितपावनपवनाधुनैव विधेहि दयां मयीति प्रार्थये ।

इत्येतद्वचनानुमोदकलितो वायुस्तदैव स्वयं
नीत्वा मन्मथमप्यनेन विबुधं कामातुरं तत्पतिं ।
चक्रेऽसौ मदनेन ताडित इव स्पृष्टोऽपि तेनाभवत्[1]
कामं तत्र नटेरितं चरितमाश्रृण्वन् हरेः कौतुकात् ॥

तदनु सोऽयं कविर्निशाकरोद्बोधितमारशरप्रहारजनितसन्तापवेगभरातिशयितविरहानलज्वालनानुकूलमलयानिलोत्पादितमहाज्वालावलीढहृदयाश्मनिदमनसेचनायेव कथंचिद्विनिक्षिप्ते मोक्षकारणविरूपाक्षदेवमहाक्षेत्रयात्राचरणसमयानुचितनिकृष्टकामपुरुषार्थसम्पादनसाधनोन्नतमरुर्वी[2]विमुखविद्याविनयसंपत्तिनिम्नावनिसराणिसरणप्राप्य सत्कर्मसमुद्रानुसारिसुबुद्धिनदीविवेकजलेऽविलंबितमेव विलीने सति चन्द्रातपमसहमानो मानसप्रविष्टदुरात्मकामप्रयुक्तशिलीमुखपरंपरामेव मन्यमानस्तदैव केनाचित् सुकृतिना विनिहितां निजकंठावलंबिनीं नवमल्लिकाकुसुममालिकां मानाविषयविषवायुमनीषावहमन्दमारुतानीताम्रवर्णरजःकणनिकरमात्मोपरि पतितं मुर्मुरचूर्णजातमिव कलयन् अहो द्विजराजमदनश्वसनदेवाः कथमवनीसुरं मां चन्द्रशेखरकामारिशेषाभरणशंकरचरण सरोरुहषट्चरणायितान्तःकरणमपि बाधध्व इति वदन् भ्रान्तिपरिकल्पितनिजप्रेयसीसंलापसमालिंगनलालसोऽतिभ्रान्तःश्रान्त इव समतिष्ठत ।

---

1. क. स्पृष्टोऽनिलेनाऽभवत् 2. मरुत्व ?

तदैवागता सा सखी प्राह वाक्यं ।
तमेनं बुधेन्द्राधुना याहि तूर्णम् ।
तव प्रेयसी काममायाति तापम् ।
हिमांशोः प्रसूनादहो शीतवातात् ॥

किंच— सेदानीं तु सुगंधिचंदनमहो शीतांशुमप्यब्धिजं
चन्द्रं निंदति विन्दति प्रतिकलं स्वेदं च तेनाश्रुणी ।
मुंचत्यार्य भवद्वियोगसमयच्छद्मोरुणा राहुणा
संदष्टाननचन्द्रमण्डलगलत्पीयूषधारावहे[1] ॥

अपि च— आलीभिस्तनुतापशान्तिकरणोद्युक्ताभिरत्यादरात्
पुष्पाणामपि मालिकां विनिहितां हृत्कर्तरीं मन्यते ।
सेयं तं मलयाचलानिलमपि व्यालाश्रयादागतम्
मत्वाऽहो कलयत्यमन्दविषवक्रान्ता भवत्प्रेयसी ॥

इदमिदानीं शृणु—

ध्यानेन तत्र परिकल्प्य भवन्तमेषा
भ्रान्ता परिभ्रमति हन्त गृहीतुकामा ।
लब्ध्वाऽऽलपत्यपि हसत्यपि रोदिति स्व-
दैवं विनिन्दति विवेकवती विचार्य ॥

पुनरिदम्— त्वां भाषते प्रिय पुराऽमलकामुकस्त्वं
संमोहितस्सुमुख एव परंत्विदानीम् ।
निष्कामवृत्तिरिवं भासि किमत्र चित्रं
क्षेत्रं पवित्रमिति वा शिवयात्रया वा ॥

अत्रैव खलु यात्रागता अपि जनाः सत्पात्रविनियुक्तार्थोर्जितधर्मार्था अपि कामं कामार्थसाधनपराः सप्रियाः सकुलटाविटा इव निर्लज्जास्सन्तो दिवाऽपि परस्परालम्बितकरा एव विनोदेन रथ्यायां चरन्तस्तत्र तत्र कलत्रपुत्रापेक्षित फलपुष्पादिपदार्थजातं मूल्येन परिगृह्य मतल्लिकानवमल्लिकाकुसुममालिकालंकृतान्विधायात्मदाराणां कबरीभारान् पुनः पुनः प्रेमातिशयेन पश्यत्स्वपि

---

1. ग. पीयूषधारावहा.

लोकेषु परामृश्य देवालयसालान्तरालेऽपि जनाश्रयशालाचितविशालशीतल-शिलातलान्यास्थाय मन्दपवनापनीततपनातपश्रमजलाः फलान्युपभुज्यान्योन्य-तांबूलचर्वणा यथेष्टालापसमये विरूपेशगोपुरकूटकोटिसमाचारितकापेयकृत्या-वलोकनजनितातिकामा अपि मोक्षसाधनसंपादनायैव हेमकूटाध्यक्षविरूपाक्ष-देवमहोत्सवानवलोक्य मुदितान्तरंगास्स्वस्वावासस्थलेषु परोपकारनिरतसुधाकर-मृदुप्रसूनशरस्मरमलयाचलानिलत्वरिताः प्रतिरात्रिसंसारसारसुरतसुखमनुभ-वन्ति पुण्यात्मानः ।

अत्रत्याश्च जनास्सर्वे मोक्षापेक्षिण एव हि ।
तेऽपि सांसारिकं कर्म नाचरन्ति किमीश्वर ॥

किमुत साक्षाद्विरूपाक्षदेव एव नित्यमुक्ताखण्डसच्चिदानन्दरूपोऽपि निजमायाविलासेन जगन्निर्मायापरिच्छिन्नोऽपि परिच्छिन्न इव सांबशिवमूर्ति-रात्मनस्सन्ततनिवासोचितस्थलीकृतातिपवित्राखिलप्राणिमोक्षप्रदपंपानगरक्षेत्रेऽ-त्र सकलाभीष्टार्थदोऽपि निखिलभक्ताग्रगण्यागण्यपुण्यशालिराजाधिराजाविद्यान-गरेशनरपतिकल्पितमहोत्सवोत्साहवान् संसारीव विहरति ॥

अयं त्वमीशो देवश्च सौभाग्यं मम जीवनं ।
सुमुखे त्वयि देवाश्च सुमुखास्सर्व एव च ॥

यत इदानीमेवमपि सुमुखे त्वयि सुधानिधिरपि तनोति तनुतापम् ।

सौख्यं मे ननु तावदेव हि भवान् साक्षात्पुरो वर्तते ।
यावत्त्वं निजकार्यसाधनकृते देशान्तरे वर्तसे ।
नाभ्यंगं न च गंधलेपनमहो नो मालिका भूषणे
नाहारोऽपि च पूर्ण ईश्वर धृतस्सिन्दूरबिन्दुर्मया ॥

तदानीं खलु त्वत्सन्निधानेऽपि समागन्तुमुचिततया सुसखी मम परम-प्रेमास्पदाऽपि निद्रा मयि द्वेषिणीव दृष्टिपथं न गता भवति ।

वैवाहिकेषु कार्येषु समाहूतापि बान्धवैः ।
गन्तुं नोत्सहते देव तवेयं प्रियकामिनी ॥

देशान्तरात्त्वागमनदिनं तु प्राथमिकं संसारसारोत्सवसुखानुभावक-शुभदिनादधिकं मन्यते मे चेतः ।

उपेक्ष्यमाणाः सर्वेऽपि दयां कुर्वन्ति सादरं ।
प्रियबान्धवरत्यैव तव प्रेमास्पदे मयि ॥

किंबहुना पुनः पुनरवचनीयातिरहस्यवचन प्रवचनेन जीवनमपि त्व-ज्जीवनानुसार्येवमेव भवतीति ।

सख्याऽऽनीतं सजलममलं पत्रजालं नलिन्याः ।
कान्ता सैषा स्मरशरभयादात्मवक्षोऽन्तराले ।
विद्धान्नित्यं मनसि वसतस्तेऽवनायैव तूर्णं
कृत्वा वर्म स्वयमिह महातापमायाति चित्रम् ॥

सैषा योषामणिश्चन्द्रिकेव चन्द्रमसः चन्द्ररेखेव धूर्जटिजटाजूटपटलस्य चन्दनवनश्रेणीव मलयाचलस्य कलहंसपंक्तिरिव मानसस्य कुसुमश्रीरिव सुरभि-मासस्य कौस्तुभप्रभेव मधुसूदनवक्षस्थलस्य भूषणं भवतोऽनुरागवत्यपि विन-यवती पितृश्वशुरोभयकुलानन्दनन्दनीयगुणशालिनी भवद्विरहे सति सांप्रत-मरण्यायमानसरिदन्तरावासे जायमानप्रसूनमालिकामयशय्यां परित्यज्य दूर-स्थिताऽपि किरातवदाचरन्मारशरवेधचकितविशालाक्षमलयाचलोर्जितदावान-लज्वालायमानसन्तापाग्निपरीताऽपि विपरीता दैवसृष्टिरिति मन्यमानापि त्वदेक-शरणा तरुणी हरिणी कारुण्यजलधरेण भवताऽधुनैव सत्वरमेव समीपमागत्य कृपाकटाक्षवीक्षणाम्बुधारासारवर्षेण तनुतापविरहगहनदहनं प्रशमय्य संर-क्षणीया भवति ।

प्रियं त्वामुपेत्याशु दुर्गेशरूपं
भवेन्निर्भया सा मृगाक्षी किरातात् ।
प्रसूनायुधात् भूसुरेन्द्र त्वमात्म-
प्रियाश्लेषसौख्यं लभस्व प्रयाहि ॥

यदि तु छान्दसबुद्ध्या भवताऽद्य पूर्णे मासि शिवरथोत्सवोचितैव सुर-तोत्सवानुचितेति मन्यते विशिष्टपर्वण एव रथोत्सवकालतया सापि दिवैव

गताऽधुना प्रतिपदेव वर्तेत इति द्विजराजोऽपि निजपरमप्रेमास्पदरोहिण्यादि-ताराङ्गनागणाप्रविष्टचिन्तानन्तरितक्रमागतस्वातीसतीसंगमुदितो ऽप्यतिकामः पल्लविकशेखर इव परकीयामपि वरुणदिगंगनामनुभोक्तुमिव गच्छतीति विचारयन् तामहमिह संघटनाय समागताऽपि यामिनी कामिनीव गन्तुकामाऽस्मि सत्वरमेव समायाहि ।

यदा कदापि वाऽऽत्मीयधर्मपत्न्या यदीप्सितम् ।
तत्पूरणीयं भर्त्रेति धर्मशास्त्रं हि वर्तते ॥

विद्वन्नुद्वाहसमय एव नवोढां तामभिलक्ष्य भवताऽऽवाभ्यां कर्माणि कर्तव्यानि प्रजाश्चोत्पादयितव्या इति च प्रतिज्ञातमात्रमेव सत्कर्माचरणपरस्याप्यनपत्यस्य भवत इतःपरमवश्यमेवाखिलजगत्कर्तृविरूपाक्षदेवमहानुग्रहवत्कुमारप्रभवो भविताद्यैवान्तर्वत्नी भवतीति ।

ततोऽयं प्राहैनां सखि किमपि कर्तुं मृगयते ।
तया साकं चेतो मम सपदि कामं न सहते ।
विलम्ब कालस्य क्षणमपि च वाक्योपवचनैः
त्वयैवैतावत्किं कृतमिह महालस्यमबले ॥

अधुना वा चपलमायाहीति पुरतो गच्छन्क्लेशयिताऽहमेव निन्द्यो न चन्द्रो न कामो न वा मलयाचलानिलः सखि तव प्रियसखी मयि सागस्यपि दयेत किमिति वदन्निजावासमुपगम्य पुरस्थितपुलिने चन्द्रातपपरिक्लिन्नां स्मरार्तां स्थलकमलिनीमिव मलयपवनेन लुलितां तां कान्तामवलोक्य लज्जित इव पटकुटीरान्तस्थितो मद्वचनेन प्रियामनुनयेहानयेथा इति सखीमवोचत् ।

ततस्सा सखीनामुपेत्याऽह वाक्यं
प्रियस्ते सखि त्वामिमां वाचमूचे ।
दुरात्माऽहमेवेदृशीं त्वां प्रियेऽद्य
स्थितो ज्ञानतोऽज्ञानतो वा विहाय ॥

प्रिये तत एव द्विजराजकरशिक्षितमपि मां मकरध्वजमहाराजाज्ञयेव कुसुमपरागपरंपरापाशनिबद्धं विधाय मलयानिलेन कशाघातमिव

मधुपझंकारहुंकारेण क्रियमाणसन्ताडनमहानपयोधरालिङ्गनाच्छादनेन निवार्य मोचयतु भवती

अयस्तेहं कान्ते यदि सकलमागः किल मम
त्वयैव क्षन्तव्यं मदवनमपि क्षिप्रमनघे ।
इदानीं कर्तव्यं सततमित आरभ्य न मया
कदाप्येवं कर्म क्रियत इति मत्वा कुरु दयाम् ॥

प्रिये मदीयापराधो न प्रेक्षणीयोऽस्मद्धिताचरणप्रवृत्तायाः प्रियसख्या वचनजातमाकर्ण्य सहजप्रेमरसार्द्रान्तःकरणातिशयितकरुणया तूर्णमायाहीति ।

सखि त्वं विश्वस्य प्रियपुरुष ईशानचरितं
स्वयं श्रोतुं रथ्यां प्रतिगत इति प्रौढवचनम् ।
अवोचोहं बुध्वा त्वदभिलषितं कान्तमबले
कथंचिद्वा तूर्णं समुपगतमत्राप्यकरवम् ॥

ननु मत्कृत्यं तु जातप्रायमेव प्रियसखि प्रियोपकण्ठकलनायोत्तिष्ठ पुरः कार्यभारभरो भवत्या भवत्यामेव भवत्यावासपटकुटीरान्तरास्ते तवागमनमनुपालयन् प्रियः ।

सोऽयं सद्मानि थास्त्वया सह पुरा संपादिताः सिद्धयः ।
प्रद्युम्नादिह पुत्रलाभसफलाः कर्तुं पुनर्वाञ्छति ।
कान्ते ताः सुमतिप्रयाहि चपलं भर्तुस्समीपं तव
श्रीपंपापतिदेवदेवकृपया भूयादपत्यं ध्रुवम् ॥

सखि मानिनि कथंचिदनकूले भर्तरि मानार्हेऽवमानेन मानेन कलहान्तरिता मा भूः ।

सखि तालफलादिकं क्रमात् कुचयुग्मं प्रियपाणिपीडनात् ।
सफली कुरुते पतिव्रते सरसं बालनिपीतमस्तु तत् ॥

अन्यथा सति विमुखे सति प्रिये तव कुचद्वयं मकरध्वजमहाराज विहारस्थलकुलशैलद्वयायमानमहीग्रामवदद्रवमेव काठिनतरं विरसं विफलं च

भवेदनुभवरसिकास्त्वस्मदीयदुर्गुणजातं कवितायाः परिपाकमिव वनिताया अधरमात्र एव माधुर्यमुरोजयोः काठिण्यमक्ष्णोरूपमेव स्वाभाविकमेवेति जानन्त्येव तत्रापि कश्चिद्विपश्चिदालोकेन वह्निमिव हृदयजातकाठिन्येन कार्येण काठिन्यं कारणमनुमिनोति ।

प्रियस्ते कान्तोऽयं पुनरपि कदाचित्कुचयुगं
स्वयं स्पृष्ट्वा विद्वांस्तदनुमिनुयादेवमणि.. ।
बिधेहि त्वं नित्यं सुरतमित एतन्मृदुभवेत् ।
यतश्शोभन्तेऽमूस्सुरतमुदिता एव वनिताः ॥

अतोऽपि प्रिये मा कुरु मानमसतीस्वाभाविकमपांसुलानां कुतश्चित् कदाचित्कोपिमानसां (सानां ?) सुमन एव निमज्जति ।

लज्जा सखी सखि तवास्ति तवान्तरङ्गे
तां दूरतः कुरु विरोधिजनप्रविष्टम् ।
दुष्ट प्रियस्य तव चापि रतिक्रियासु ।
सद्यस्त्वदागमनमेव विरोधतेऽसौ ॥

अतः सखि तामेतां परित्यज्य विलम्बितमेवानुसरावः पटकुटीरस्थितं प्राणेशं सरसमिति ।

अत्रान्तरे पतिरुपेत्य वचो बभाषे
पत्नीमुदारचरितां सदृशोज्झितां सः ।
लज्जाभरानतमुखीमपि मानिनीं तां
सत्यक्रमानहृदयामतिदीनवृत्या ॥[1]

प्रिये! उत्कल्लोलुपलोचनीमपि पयःशुद्धे भवे स्नीततिं (?)
सर्वांगं मम मन्मथानलमहाज्वालावलीढं पुनः
कारुण्यामृतपूर्णकुंभयुगुलप्रज्ञा (ख्या ?) वहोरोजयोः
संस्पर्शादपि मामिहाद्य मधुरं बिंबाधरं पायय ॥

किंच कलंकिचन्द्रातिरिक्तास्त्वन्मुखचन्द्रसन्तोषवचनप्रवचनस्पन्दप्रसृतयाऽधरमात्रविश्रान्तपासिस्मितासितद्युतिचन्द्रिकान्तःस्थितमपि कामान्धकारं नि-

1. संत्यक्तमान ?

वार्य हृदयकुमुदं विकास्यानन्यभजनतया निरपराधमनन्यगतिकमवश्यमेव-दयनीयदीनेदंजनचकोरमधरीकृतमधुमाधुर्यातिमधुराधरामृतपिपासया शरणा-गतमानन्दयतु भवती ।

नोचेत्कामिनि सत्कृपां मयि मुदा कर्तुं मनो रोचते
सद्यस्ते कुटिलालकावलिरियं श्यामात्मिका बाधतां ।
चेतो मेऽनुरतं करोतु नितरां रक्ताधरोऽपि स्वयं
सद्वृत्तः कुचमण्डलो गुरुरपि त्वन्तर्विधत्ते व्यथाम् ॥

प्रिये तव दयापात्रं चेदमिदानीमेव त एते त्वदीयाः पुनरुपलालन-चुम्बनपरिरंभणादिना मम परमानन्दकरा भवेयुः ॥

प्रसीद प्रिये देहि साफल्यमेतत् कराम्भोजयुग्मस्य वक्षोजयुग्मम् ।
समर्प्यातितालांकलद्वन्द्वमद्य[1] त्वदीयं पुरस्ते फलानि स्युराशु ॥

यदि तु मामत्र निष्कारणविरहकारिणमाशंक्य मयि कोपिनी त्वमधुनैव कथं चित्सख्यापनीतं सापराधमिमं भ्रूचापनिहितदरदलितनेत्रान्तगलितदृक्कोण-बाणपरंपरयाघात्य भुजलतानिबद्धं विधायाधो निपात्य गुरुकुचमर्दितोरस्कमा-स्कन्दयन्ती विरचितखरनखरदक्षताद्दृतकोपा भव भवेत्ततोऽपि सुखं मम तवापि च ।

कान्तेऽन्या मयि जात्वपीह कलुषा शंका न कार्या त्वया
ज्ञातं मे हृदयं खलु त्वयि सदा सक्तोऽहमत्राधुना ।
किं वक्तव्यमयि प्रिये मम पुनस्त्वं जीवनं भूषणं
संसारांबुधिरत्नमित्यनुदिनं पश्यामि हृष्यामि च ॥

तवापि मयि निरन्तरसहजप्रेमरसभावोऽनुबन्धोज्वलं हृदयमहं जाने ।

परन्तु श्रीपम्पापतिचरणभक्त्यैवानितरां
महायात्राकालेऽनुचितमिदमित्येव रमणि ।
मया तूष्णीं स्थित्वा कृतविरहमेतावदबले
कथंचित् त्वं प्रेम्णा मयि सुकृतमत्याऽप्यसहथाः ॥

---

1. संमर्प्यातिताल करद्वंद्वमद्य ?

इदानीं तु परमेश्वराज्ञयैव मानसाविर्भूतेन सुधाकरमित्रेण कोमल-मलयानिलसहायेन मदनविबुधेन बाधितो बोधितोऽहमृतुकालो गमिष्यत्यस्त्येव षोडशी रात्रिरिति ॥

प्रियेऽन्तर्वर्त्यस्यां यदि भवसि दैवात्तव महान्
सुपुत्रो जायेत श्रुतिसकलशास्त्रेषु निपुणः ।
इतीदं कान्ता सा पतिवचनमाकर्ण्य सफलं
प्रमोदादुत्तुंगस्तनभरनतोवाच वचनम् ॥

श्रीमन्नार्यपुत्रवशंवदैव सदैयमहं किंतु एतावत्कालाविलम्बात् नूतनसमागम इव लज्जान्तरितैवासमेषा द्योषाजनभूषणमपि सुरतोत्सुकसती पतिसन्निधाने न स्थातुमुचितमन्यासामिति मन्यमाना मत्प्रियसखीव (?) करमपससार ।

इदानीं प्रार्थये स्वामिन् इत्येवभित एव वा ।
मयि चे..मकुरु..मां नीत्वा तत्पादसेविनीम् ॥

ततः सोऽयमुपसृत्य करुणयाऽश्रूणि प्रमृज्याऽश्लिष्य प्रिये यदुक्तं त्वया तत्तथैव करिष्यामीत्यभिधाय दरहसितप्रसन्नवदनायास्तस्या हस्तं गृहीत्वा निजावासपटकुटीरमाससाद ।

तत्र आह सती पतिं प्रति तदा शय्योपसंवेशिता
तेनेति प्रियसंन्निधावपि समायात्येव निद्रा सखी ।
सोऽयं प्राह ततः प्रिये जहि निजं मानं दिनं प्राप्तमि-
त्याहैनं पुनरंगनेति वचनं नन्दीशदेवालये ॥

ततस्स एष तद्वक्रोक्तिविनोदितमानसमानिनीकामिनीनां सहजमेव सुरतवैयात्यमहं जाग्रत् कदाचिदपि तव निद्रासखीं नापश्यमधुना कथमायाति सा परं त्वनारतसंनिहितां लज्जासखीमेव पश्यामीत्यवोचत् ।

ततः सैषाऽवोचत्प्रियमुपगतं वीक्ष्य चतुरा
त्वयि स्वामिन् व्यापारयति करमत्र स्मरगृहे ।
गताऽसौ मे लज्जास्त्वमपि च लज्जापरवशा
निधेह्यतौ पाणी गुरुकचयुगे तावद[न] वे ॥

यावत्प्रिय तव सुगन्धिसरसचन्दनरेणुविलेपनं विधाय कंठे निधाय नवमल्लिकाकुसुममालिकां वीळिकामर्पयामीति ।

सोयं तदेव नितरामनुरागवेगात्
कामातुरो वचनमाह ममांक एव ।
स्थित्वाऽर्पय त्वरितमेव सकामबुध्या
मां प्रेयसीति निजगाद पुनश्च कान्ता ॥

स्वामिन् किमुच्यते भार्याऽहमारोढुमसमर्था भवानेवोरू समारोहत्विति ।

सत्यं प्रिये तिष्ठति गर्भ एवं
स्त्रीणामिति प्राह चमत्कृतोऽसौ ।
पतिव्रता साऽपि मुदैव पत्युः
मनोऽनुसारात् प्रियमेव चक्रे ॥

तावेतौ दम्पती इत्थमिष्टालापपुष्टान्योन्यसहजप्रेमसरसमीश्वरेच्छानुसारि-मकरध्वजमहाराजमहानुग्रहात् संसारसुखसारभूतपरमानन्दसन्तानसफलसुरत-सत्कर्मानुष्ठाननिष्ठागरिष्ठौ बभूवतुः ।

तयोर्जनानामन्यत्र रथोत्सव इवाञ्जसा ।
रथोत्सवे महानन्दकण्ठनादः श्रुतो बहिः ॥

ततोऽनतिचिरकालेन निशान्त इव बभूव तयोः सुरतोत्सवान्तः ।

मुक्तालंकृति चन्द्रबिम्बमभवन्नीलोत्पले मुद्रिते
व्याकीर्णोडु वियद्बभूव नितरां चापं स्मरस्यापि च-
चाञ्चल्यं विरहेत्तदैव तिमिरं बद्धं किलोर्ध्वं लता-
निष्पन्दाकलकण्ठकूजितमभून्मन्दानिलैर्मन्दितम् ॥

तदनु तस्मिन् समये केतकीदलाग्रलीलायितस्मितरुचिरमुखीं कान्तामव-लोक्य दृश्यमानतेजोविशेषेणानुमीयांतरस्यां गर्भ रतिप्रमोदेन प्राभातिकसत्क-र्माद्यभूतं प्रातःस्नानं विधातुमुत्थाय सरिज्जलमुपगतवति करौद्विजराजोऽपि वरुणादिगंगनाकुचयुगायमानचरमाद्रितदुपगतशिखरिशिखरद्वयाभोगकरविन्य-सनमात्रादलितविडो वधूरिव गतौजाः जरठ इव पाण्डुरमुखो .... स्वच्चरणः

स्वयं प्रातः स्नातुमिव शनैः शनैर्गच्छन् स्वमातुः श्रीविरूपाक्षदेवरथोत्सव-वृत्तान्तकथायेव समुदितं जगन्नेत्रं मित्रमवलोक्य पूर्वसमुद्ररोधस्थलनिर्वर्तिताद्य-सन्ध्याकालकर्तव्यकर्मानुष्ठाननिष्ठापादितप्रभाविशेषदेदीप्यमानत्रयीमूर्तिदृष्टोह-मधुनाप्यकृतसन्ध्यावन्दनतया निस्तेजस्को जात इत्यात्मानमाशंक्य तदनुष्ठातु-मिव सत्वरं पश्चिमाम्बुधितीरमुपागमत् ॥

सखी तदाऽऽगत्य सतीं बभाषे
सम्प्रार्थकामार्थहसन्मुखीं ताम् ।
भूयः किमाशास्यमिह त्वया तत्
वक्तव्यमीशः सकलार्थदोऽस्ति ॥

तदनु सेयं पतिव्रता श्रीविरूपाक्षदेवं ध्यायन्त्येवमवक्ति ।

पुत्रो मे भवतु प्रिये सखि पुनः काले सुवृष्टिर्भवेत् ।
स्यात्सस्यादिसमृद्धिरप्यतिफलान्यापादयन्ते जनाः ।
सर्वे सन्तु मुदा नृपा अपि कवीन्सन्तोषयन्तु स्वयं
श्रुत्वैतन्मुखनिर्गतां शिवकथां वाणीप्रसादोर्जिताम् ॥

किंच— विरूपाक्षदेवस्य ये भक्तियुक्ताः
त्रिवारं वसन्तोत्सवोत्साहवन्तः ।
महाक्षेत्रमेतद्विशेयुस्त एते
क्षितौ सर्वयात्राफलं प्राप्नुवन्तु ॥

अपिच— बुधाः श्रीविरूपाक्षदेवस्य भक्ताः
प्रमोदेन विस्तीर्य ये वर्णयन्ति ।
वसन्तोत्सवीयां कथां देवदेवः
ददात्वत्र तेषामभीष्टार्थजातम् ॥

तथैव— दूरस्था अपि सर्व एव सुजनाः शृण्वन्ति ये सादरं
श्रीपंपानगरप्रवर्तितमहादेवोत्सवीयां कथाम् ।
ते यात्राफलमश्नुवंतु सततं सत्कर्मनिष्ठा द्विजाः
भूयासुः परिपालयन्तु जगतीं भूपाः शिवानुज्ञया ॥

तदनु तस्यामस्यां पतिव्रतायाः सत्यमस्तु वचस्तवेति वदन्तमेव स विद्वा-नाचरितश्रुतिमंत्रजपः सूर्यमुपस्थायाभिवाद्य च पंपापतिसुप्रीतयेऽद्यानेकमही-सुरसमाराधनं विधेयमिति बुध्याऽवधार्य त्वरितमागच्छन् कश्चिदारादेतद्वसन्त त्यागोत्सवेऽत्र विद्यानगरीशदर्शने सति छान्दसानामप्यस्माकं फलमस्ति नवेति पृष्टवन्तं प्रति दैवज्ञसमीरितमवश्यमेव फलं भवतीत्युत्तरवचनमाकर्ण्य निरन्तर-चिन्त्यमाननिजाभीष्टपुत्रावाप्तिनिश्चायकसदुपश्रुतिश्रुत्यापादितातिहर्षणः स्वावा-सपटकुटीरसमीपत एव तथास्त्वित्यवोचत् ।

तदा पटकुटीरान्तः समुत्थाय पतेः करे ।
सुखोपश्रुतिवाक्येन सन्तुष्टे ते बभूवतुः ॥

तदनु तस्मिन् द्विजेन्द्रे निजावासमासाद्य पत्न्याः पुरतः स्वाभिमतमभि-धाय महीसुरानामंत्र्य तदाराधनसाधनपदार्थानयनपरे सति सतीयं सत्वरमेव गृहकार्यकरणोत्साहवती स्वयमेव शुचिर्भूता जलाहरणादिकार्यजातं निष्पाद्य प्रकृतानुसारीष्टालापानि समागतपतिवचनान्याकर्णयन्ती सती परमानन्दभरि-ताऽभवत् ।

विरूपाक्षदेवस्य चम्पूप्रबन्धे वसन्तोत्सवाख्यानसर्वार्तिहृद्ये ।
सदा शृण्वतां पुण्यसम्पत्प्रदेऽस्मिन् रथोत्साहकाण्डस्तृतीयश्च पूर्णः ॥

॥ श्रीविरूपाक्षदेवार्पणमस्तु ॥

॥ अथ उत्तरतुर्यकाण्डः ॥

श्रीपंपेशरथोत्सवाश्रितकथामेतां सपूर्वेक्षणां
श्रुत्वा पामुडिपट्टणाधिपमहाभोगीश्वरस्सादरम् ।
सुप्रीतः पुनरादिदेश तामिमं विप्रं ततः किं परम्
ब्रूहीति स्वयमेवमुत्तरमयं प्राह द्विजोऽहोबलः ॥

श्रीपंपानगरे ततः प्रतिपदि श्रीहेमकूटाचल-
स्वामी वाहसुवाहनः प्रमुदितो गौरीं विहाय स्वयं ।
सायाह्ने मृगयामहोत्सवभवानन्दोऽद्य गंगाधरो
द्रष्टव्यो भवतीति संभ्रमयुताः केचिद्बभूवुर्जनाः ॥

तत्र तत्सतीपतित्रिबुधादयो भूविबुधास्संकल्पितपंपापतिसंतर्पणविधाना अपि सांगोत्सवावलोकनोत्सुकास्सन्तस्सत्वरमेव परिक्रीतानीतपदार्थपाकं विधातुमात्मदारान्नियुज्य देवार्चकानुसरणेन प्राभातिकपरिचर्यया साकमेव विरूपाक्षदेवलिंगाभिषेचनं विधाय निजावासमासाद्य समाहूय महीसुरानाराधयामासुः ।

केचित्तत्र समुत्सुका विपणिषु क्रेतुं पदार्थान् प्रियान्
संभूयाऽपणवर्तिनं स्फुटतरं पश्यन्त्यवश्यं स्वयम् ।
पांचालादिवणिग्जना जगृहिरे दत्वा धनं मूल्यकं
प्रीतिर्यत्र भवत्यपूर्वमपि तत्पात्रं सुवस्त्रादिकं ॥

केचित्तु पंपापतेरसमोत्सवानां समोत्सवो रथोत्सव एव प्रधानोऽस्माभिर्दृष्टोऽभवदद्यैव गंतव्यमिति निश्चित्य सत्वरमेव कृतभोजना जनाः श्रीविरूपाक्षदेवप्रसादग्रहणाय फलपुष्पहस्तास्सप्रदक्षिणमेव देवालयं प्रविश्य निबिडतमजननिवहकृतगमननिरोधा अपि कथंचिदग्रे गत्वा महादेवशिवलिंगमूर्तिसंदर्शनात् कृतार्था भवाम इत्यादृतमत्या स्फुटघटितमूर्धांजलिपुटाः परमेश्वर “ पुनर्दर्शनं देहीति ” गलदानन्दबाष्पजलनिर्मलीकृतलोचनास्सम्प्रार्थ्य परिचारकदत्तानि

शिवप्रसादफलकुसुमानि गृहीत्वा प्रमुदितान्तरंगा बहिर्निर्गत्य भवानीभुवनेश्वरीवाग्देवताः प्रणम्यापि भक्तिरसार्द्रान्तःकरणभरेण तूर्णं सन्त्यज्य गन्तुमसमर्थाः ... राजशिरोमणिभवनमहांगण एव परिचक्रमुः ।

अन्ये तु केचन जना नगरीं प्रति स्वां
स्वामीश्वरस्य नगरात् परितोयनीषु[1] ।
रथ्यापगाः क्रयिकलोकचयोदकौघ-
तूर्णा अपि त्वरितमेव गता विलंघ्य ॥

केचित्तु निजग्रामान् प्रति गन्तुकामाः देशीयान् सर्वानाहूय सम्भूय गन्तु मक्षमतया एकश एवाविच्छिन्नलेखाक्रातिगत्याध्वगापणवीथ्यापगारथाश्वान्दोलिकादियानतरीस्थिता अपि शनैश्शनैस्तीत्वार्तमियिजनमेलनायैकत्रावस्थाय पुरो गता बभूवुः ।

अन्ये पुनः पुनरपीह विलोकयन्तः
श्रीविष्टपेशगुरुगोपुरशेखराग्रम् ।
पंपापते हर हरेति वदन्त एव
दूरात्प्रणम्य निजमार्गगता बभूवुः ॥

एवमनेकेषु लोकेषु शिवरथचरणावर्तनसमयात्प्रभृति परितोऽप्याराप्राप्य निजपल्लीजनपदग्रामनगरनिकरान् प्रति गतेष्वपि पंपापुरीनारीमाणित्रिशिखाशिखान्तरालयल्लकमतिनिबिडास्थितजनताधृतधौतोष्णीव भूषणगणश्रेणीघटितमुक्ताफलमालिकालंकृतमशोभत ॥

श्रीविद्याकमलानवीनपुरतो भूयः समागच्छतां
गच्छत्स्वेव जनेषु तेष्वपि पथिष्वन्योन्यसंघट्टनम् ।
रथ्यायामिव जातमद्भुतमतः शालीक्षुकेदारवान्
देशस्तत्र यतो बभूव सततं कुल्या कुतोऽप्यान्ततम्[2] ॥

तदनु कथंचिदागतास्त एते पंपानगरप्रतोल्यां चतुरन्तयाननिवेशितत्रिशूलायुधदेवताधिष्ठितमाध्यन्दिनभूतबलिदानसत्कर्मार्हवाद्यवादकपुरस्सरानुभावदात्मानुचरोद्धृतसितातपत्रच्छायान्तर्विराजमानेन माधवनवरात्रोत्सवक्रतुप्र-

1. क. परितोयनेपु. 2. क. कुतम्ल्याकुलोयां ततं ।

वर्तकशैवागमदीक्षितद्विजेन क्रियमाणमवलोक्य मुदितान्तरंगाः श्रीविरुपाक्ष-देवस्य वाहवाहनारूढस्य रथोत्सवोत्तरांगमृगयामहोत्सवावलोकनोत्सुकाः प्रपासृ-तिशीतपावनपानीयादिनाऽध्वश्रममपनोद्य समासत ।

श्रीमद्भिः पुरुषैः सतीपतिमुखैः पुण्यात्मभिः शंकर-
प्रीत्यायाचरितावनीसुरमहासत्रान्नदानोत्सवे ।
भुक्त्वा ब्राह्मणपुंगवास्सपदि तद्रथ्याप्रपायां प्रियैः
इष्टालापविनोदितास्समभवन् पश्यन्त एतेऽखिलान् ॥

तत्र कश्चिद्विपश्चिद् विरूपाक्षदेवमृगयामहोत्सवोपक्रमादाधिक्समया-पनयनाय परिसरिद्विनोदास्पदमस्ति यद्विचित्रमवलोकयावस्तदधुनैव समेहीति सादरमात्ममित्रेण श्रीराशिदेशाधिपामात्यपुत्रेण समाहूतस्तदैव समुत्थाय तेन सह विधिवदाचरिताश्वमेधादिशतक्रतुफलाधिकपुण्यफलप्रापकपंचक्रोशात्मका-ध्वपरिमाणपरिमितशिवक्षेत्रयात्रालाभबुध्यैव पद्भ्यां गमनमार्गेण नदीमुत्ती-र्योत्तरं तीरमारुरोह ।

अरण्यानीमारादयमवनिदेवः कविवरः
स्वयं दृष्ट्वा भीतस्सपदि निजगादेति वचनम् ।
इतोऽग्रे गत्वाऽलं वनमखिलदुस्सत्वानिलयं
सखेदं भूदेवं तदनु स हसन्नेवमवदत् ॥

नन्वहं भवानि भवानिव न भवामि केवलमवनीसुरमात्रधर्मावलम्बी किंत्व-मात्यपुत्रो राजन्यसहचरः खड्गधरः शूरो निर्भयः भवेत्येतद्वचनमाकर्ण्या-यमुर्वीसुपर्वेन्द्रस्सर्वभयापहां शरणागतपरित्राणपारायणान्तःकरणकरुणोर्जित-भक्तवात्सल्यपालितमृकंडुमुनिकुमारं विरूपाक्षदेवमारण्यकदुस्सत्वसमुदायादभयं प्रार्थयितुं महादेवालयाभिमुखोऽभवत् ।

तदाऽयं श्रीपंपापतिसदनभव्यांगणकनद्-
ध्वजस्तम्भं दृष्ट्वा हरहरमहादेववचनम् ।
वदन् भक्त्या बद्धांजलिकरपुटो विष्टपगुरोः
दिवस्सोपानं वेत्यमनुतमहागोपुरगिरिम् ॥

तदनु तदुपरि विराजमानं परमशिवलीलास्पदमखिलदेवतायतनमतिसूक्ष्ममतिदृश्याग्रमग्र्यं हेमकूटमवलोक्य कैलासाचलविलसदीशानतेजःपुंजसाक्षात्कारवानहमित्यनुव्यवसायजनितामोदभरभारितान्तरंगोत्सारितातपश्रान्तिरुत्तरं गोपुरमनुलक्ष्य लक्ष्मीकलालीलायितकलधौतरेखाकृतिशिखरानुसारीकृतदृष्टिदृष्टाष्टमूर्त्यानन्दनिलयभास्वदष्टापदश्रृंगदीपप्रभाप्रत्यक्षानुभवोहितनिखिलज्यौतिषाधिकमहामहेशावासस्थलविशेषः श्रीविरूपाक्षादेवादिऽऽकिरात पाहीह महारण्य आवामिति पंपापतिं प्रार्थयामास ।

ततः परावृत्य कविः पदे पदे
वदन्नयं पाहि महेश मामिति ।
तथैव शैवं कवचं स्मरन् वनं
जगाम मित्रानुगतः शनैश्शनैः ॥

तत्र तरणिकिरणप्रकाशिताऽपि सरणिररण्यमवलोक्य तद्गतदस्युभयादिव क्रमेण वर्तनीभूताऽपि तत्रैवावस्थितेति कथमावाभ्यामग्रे गन्तव्यमिति चिन्तया किंचिदेव गत्वा तूर्ष्णीमिव स्थितोऽयं पुरोगतेन तेन मित्रेण धीरेण सधैर्यमेव मा कातरो भवाहं भवामि शूरः सत्वरमेव समायाहीति समाहूतः पुनः शनैश्शनैरेव गच्छन्नतिदूरतः पुरःस्थितां क्वचिद्बालिकामिव वैयाघ्रनखरेखाभरणां क्वचित्सिंहनादचकितामिव कंटकपुलकांकुरां क्वचित्प्रलयवेलामिव महावराहदंष्ट्रोत्खातभूमंडलां क्वचिद्रावणनगरीमिवोऽत्पतत्प्लवगसन्दोहभज्यमानोत्तुंगसालां क्वचित् शमनपुरीमिव सन्निहितमहामहिषां क्वचित् महिषासुरमर्दिनीमिव प्रचलितखड्गभयंकरां क्वचिद्राज्यश्रियमिव चमरवालव्यजनालंकृतां क्वचित्प्रदोषसंध्यामिव नृत्यन्नीलकण्ठां क्वचिद्दिवमिव तरलतारकां क्वचिन्मृगांकमूर्तिमिव हरिणाध्यासितां क्वचिदुन्मत्तामिव कोकिलकुलकलकलालापिनीं क्वचित् विराटपृथिवीमिव कीचकान्वितां क्वचित् महाराजद्वारमिव वेत्रसहस्रदुष्प्रवेशां क्वचित विवाहशुभवेदिकामिव हरितपलाशसमित्कुशप्रसूनहारिद्रपरागकरंभितां क्वचित् वारवनितामिव परिसरदगरुचन्दनमृगमदगन्धपरिमलां क्वचित् जानकीमिव प्रसूतकुशलवां क्वचित् विरूपाक्षदेवसाक्षात्काराय गृहीतव्रतां पंपाम्बिकामिव जटावल्कलधारिणीं क्वचित् वनगजमदजलसेकाभिवर्धितैः महोन्नतशाखाशिखाग्रसंलग्नतारकानिकरशंकावहविकचधवलकुसुमैः नानाविधमहीरुहैरुपशोभिता

क्वचित् करिपोतकरत्रुटितारुणकिसलयजालाच्छादितशाड्वलायमानमरुस्थलां क्वचित् शुकपाकमुखदलितदाडिमफलबीजप्रसरदाम्रमधुरामृतरसार्द्रीकृततलां क्वचित् कपिसमूहकंपिततत्कोलबिल्वामलकरसालकपित्थादिविटपिच्युतपरिपक्वफलां क्वचित् वासन्तिकादिपुष्परजःपरंपराधवलितभ्रमरवारझंकारमुखरितां क्वचित् मरीचिलतावनद्धनागवल्लीसंगतपुन्नागषण्डमण्डितां क्वचिदपरिमितनवपलाशपलाशामपि मकरध्वजमहाराजसेनानिवेशप्रदेशनिर्मितविचित्रपटकुटीरमत्यापादकानेकनिकुंजकुंजांतरालपरिदृश्यमानोन्नतपलाशायमानसप्तपर्णोल्लसितां क्वचित् राजहंसविहारोचितसरोवरविराजितां पश्यन्नरण्यानीमविशत् ।

ततो निर्भयोऽयं महारण्य एव
प्रविष्टोऽहमत्रेश्वरो रक्षिता मे ।
भवेदन्यदेतः किमन्योऽस्त्युपायः
विनिश्चित्य धीमानिति प्राह मित्रम् ॥

ननु सखे ! पश्येदं सरसं सरोवरयुगं सन्मित्रयुग्मं मुदा
लीलोत्क्षिप्ततरंगबाहुकलनादन्योन्यमालोकते ।
संफुल्लाम्बुजनेत्रगोलकचलद्रोलम्बसत्तारका-
पुंजैरालपतीव वारिशकुनप्रेमोक्तिभिस्सादरम् ॥

अत्रैव हि राजहंसो बिसदंडोद्धृतश्वेतशतपत्रायतातपत्रछायायां तपनातपसन्तापपरिजिहीर्षयेव सत्वरमागच्छताऽपि वासन्तिकादिलतावनितारुणपल्लवपाणितलार्पितकुसुमामोदभरभरितामोदभरेणेव अन्तराऽन्तराऽवस्थाय शनैः शनैरागतेन मलयमारुतेन समुत्पादिततनुतरंगपरंपरान्दोलनेन जनितं डोलासुखं ढौकते ।

अयं चूतश्चेतः स्मरयति हि गुञ्जन्मधुलिहा-
मिहाग्रे शाखानामुपगतफलानां समुदयैः ।
सदा गोपालानां वननिवसतां नां तरुगतान्
पयः कुंभान्हर्तुं कृशचरितमात्मार्भकचयैः ॥

अयमुदुम्बरस्त्वामूलाग्रसंलग्नसकलविबुधामृतपूर्णकरण्डायमानफलान्वितः

साक्षाद्विरूपाक्षदेव इव भक्तवात्सल्यदर्शितनिजस्वरूपापादमस्तककल्पितललिताखिलाण्डब्रह्माण्डमण्डलस्समुल्लसति ।

जम्बूः कोमलपल्लवोऽभिलषतीवाद्यैव पम्पापतेः
प्रीत्यैकेनचिदेव कर्तुमुचितं क्षोणीबुधाराधनम् ।
पत्राण्यात्मन एव कांचनसमं पात्रं विधायात्र चेत्
भक्ष्याज्यादिसुभोज्यवस्तु निहितं तत्सार्थकस्स्यामिति ॥

त एते तु पलाशाश्वत्थबहुपादस्संनिहितहिरण्यगर्भनारायणादिगुरुदक्षिणामूर्तिरूपमहादेवतया उत्तरोत्तराधिकोन्नताकारतयाऽखिलजनदृश्यमानलोहितशुक्लकृष्णरूपतया प्रकटीकृतात्ममायिकगुणा ब्रह्मविष्णुमहेशा इव विराजन्ते ।

अयं लक्ष्मीवृक्षः श्रुतिनिगदितो वर्तत इमं
पवित्रं स्पृष्ट्वाऽऽवां सपदि शिवलिंगार्चनफलम् ।
लभेवाऽयाह्यारादिति वचनमाकर्ण्य स सखा
कथं वा शैवोऽभूदयमिति तदोवाच वचनम् ॥

ततोऽयं शिवभक्ताग्रेसरः कविः लक्ष्मीवृक्षं प्रदक्षिणीकृत्य स्पृष्ट्वा च तच्छायायां तेन सहोपविश्य पुराणप्रवचनोत्साहप्रसन्नहसन्मुख एवमुत्तरमवोचत् ।

शिवां कमण्डलारूढां गौरीं लक्ष्मीमुपास्महे ।
इति वाक्येन रुद्राणी लक्ष्मीरित्यभिधीयते ॥

अत एव शैवाग्रेसरहरदत्ताचार्यदीक्षितेन्द्रादिविबुधाः पुरुषो वै रुद्रः पुरुषं कृष्णपिंगलमित्यादिश्रुतिविद्यमानपुरुषपदवाच्यपुरुषप्रतिपादकं सूक्तं पुरुषसूक्तं शिवपरमेवेत्यभिधाय ह्रीश्च ते लक्ष्मीश्च पत्न्याविति लक्ष्मीपतित्वलिंगमपि जीवस्योपपन्नमिति प्रत्यपीपदन् ।

स्कान्दात्पुराणवचनात् पूर्वाचार्यादिसम्मतेः ।
लक्ष्म्याः शिवाया वृक्षोऽयं शैवोऽभूदिति मन्यताम् ॥

शिवरहस्ये तु क्षीरसागरकन्यका पुंडरीकाक्षवक्षःस्थलाप्त्यपेक्षयाऽर्धनारीश्वरं प्रति तपस्यन्ती सती शिवलिंगार्चनाय वृक्षमिमं निर्मायाऽस्य दलैरच्छिद्रैः

कोमलैः गौरीरमणमाराध्य तदनुग्रहादवाप्तमनोरथा सती एनत्रमनीरुहं महादेवाय समर्पितवतीति पुराणपुण्यकथा श्रूयते ।

श्रीमहादेवनयनत्रिशूलसदृशैर्दलैः ।
विराजमानो वृक्षोऽयं शैव इत्युच्यते जनैः ॥

वस्तुतस्तु श्रीहरिहरयोः श्रीगौर्योर्भेदाभावख्यापनायैव पार्वतीवृक्षो वैष्णवो लक्ष्मीवृक्षः शैवो भवति ।

तुलसीकानने नित्यं विष्णुस्सन्निहितो यथा ।
तथैव बिल्वगहने क्रीडते सततं मृडः ॥

तदनु तेन पुनरस्य संस्पर्शात् कथमेति शिवलिंगार्चनफलं पुरुष इति पृष्टे सत्ययमुत्तरमवोचदेवम् ।

यतोऽस्य वृक्षस्य दलान्तरेषु फलानि जातानि महेश्वरस्य ।
लिंगानि मत्वा पुरुषेण सोऽयं स्पृष्टो यदि स्यात्तत इत्यवेहि ॥

ततः संजातप्रत्ययेन तेन महसोत्थाय सप्रदक्षिणं परिक्रम्य स्पृष्टे सति लक्ष्मीवृक्षे स्वयमपि पुनः प्रदक्षिणीकृत्य तमेनं संस्पृश्य कृतार्थोऽहमिति मन्यमानोऽयं कविर्मित्रानुगतोऽग्रेऽपि शनैश्शनैर्गच्छन् नातिदूरतः पुरस्थितां हनूमत्सरितमपश्यत् ।

गत्वा तत्र जलं निपीय विमलं पंपापतिं संस्मरन्
एवं प्राह कविः सखे स्वयमिह श्रीतुंगभद्रा नदी ।
पंपारण्यविलोकनाय कुतुकात् किंवाऽऽगता केनचित्
नीतांगी सरिदत्र संगतवती न ज्ञायतेऽन्येति सा ॥

तदनु तेन मित्रेण पुरोवर्ति पर्वतमारुह्य नदीमेनां पश्यात्र इति बलादाहूतोऽयं ऋष्यमूकाद्रिशिखरं गतो भूयोऽपि विरूपाक्षदेवालयगोपुराग्रकनत्कनकशृंगाण्यवलोक्य हर हर महादेव पाहि मामित्युच्चैर्वदन्नाजा . . दृश्यमानामाञ्जनेय सरितं तुंगभद्रात्मजामितस्ततो मातरं विहाय विहृत्य पुनस्संगतां बालिकामिव मन्यमानो नदीगर्भगतं सदभिवृद्धमेतत्पम्पारण्यमिति सखायमभिधाय तेन सह ततोऽवरुह्य सरितमुत्तीर्य च पुरतोऽपि गच्छन् नातिदूरस्थितां पल्लीमपश्यत् ।

तत्रोटजावासजनानरण्यवासानिवाज्ञातमनोज्ञवेषान् ।
कुचेलिनो दूरत एव वर्ज्यान् स किं पुरो वर्तत इत्यपृच्छत् ॥

ततस्तैरुत्तरतोऽग्रतश्च किष्किन्धानगरोपकण्ठ एव वालिभण्डारगण्डशैलो वर्तत इत्युत्तारितेन तेन बलात्कृतोऽयं कविः पुरतोप्यगच्छत् ।

कुल्याः काश्चिदतन्द्रितोयमिह मां धृत्वा सखेगच्छतात् ।
इत्येवं वचसा हसन्मुखामिमं कृत्वा सखायं गतः ।
उत्तीर्याऽथ विलोकयन्नुभयतः संक्रांतमार्गस्थलीं
आरामोन्नतनारिकेलकदलीपूगेक्षुशालिश्रियम् ॥

तदनु किष्किन्धावरणबहिरावरणवलयकंचुकांचलालंकृतावनिरमणीरमणीयघनपीनपयोधरयुगलान्तरालमत्याबहमचलद्वयान्तरं प्रविश्य कविरयं वालिपालिताप्ययोध्येयं नगरी नगरीति सालेति वदन्नेव शनैःशनैर्गत्वाऽग्रत एवाद्रिमूलावलोकितबिलद्वारघटितमहाग्रावोपरिलिखितमुखेन्द्राकृतिरेखानुमिता सुग्रीवाग्रजभंडारगंडशैलविस्मितमानसो धनसाधनापेक्षयाधुनिकलोकुटीलतटंकाहतिमुद्रांकिता अप्यस्फोटितास्स्थूलोपलास्सर्वेप्येते भवन्ति निधानगर्भा इति मित्रमवोचत् ॥

श्रुत्वैतद्वचनं सखा पुनरिमान् द्रष्टुं स तत्रैकशो
गत्वाऽऽरुह्य शिलातलानि सहसा शाखामृगोल्लंघनम् ।
कृत्वा क्रीडदुरूपलेषु विबुधस्तं प्राह मित्राधुना
गन्तव्यं द्रुतमेहि शैवमृगयारम्भोत्सवं पश्यतात् ॥

इत्थमनेन समाहूतोऽसौ सत्वरमेव समागत्याऽऽगमनमार्गेण गन्तव्यमिति निश्चित्य पुरोगतोऽभवत् ।

विद्वानयं तेन सहैव गच्छन्नुवाच मित्रं ननु भास्करोऽसौ
देवस्य तूर्णं मृगयाविनोदसम्पादनायेव जगाम दूरम् ॥

अत इदानीं देवः पार्वतीं विहाय स्वयमेव वाहवाहनारूढो मृगयाविनोदानुबुभूषया बहिरागतस्स्यादावामपि तदुत्सवदर्शनाया गच्छावस्सत्वरमेव प्रयाहीति ।

ततस्तौ जग्मतुस्तूर्णं पश्यन्तौ पुरतोऽयनम् ।
पल्लीमतीत्य वेगेन चलत्करगरुद्द्विजौ ॥

तत्र पुरस्तिरस्सरन्तीं दुःशकुनकरोरस्सरतनुमनीषावहां हनूमत्सरितमतीत्य वेगेन पंपारण्यप्रवेशसमय एवानयोर्दृष्टिपथं गतः कोऽपि करालवदनो महान् व्याघ्रो मानुषगन्धगन्धेन गन्धवतीं पृथिवीमितस्ततो जिघ्रन्निव परिभ्रम्यापश्यदेतौ ।

चलद्वालो गर्जन्नुपगत इमौ तत्र युगपत्
गृहीतुं शार्दूलः समभवदहो कुंजसदने ।
यथा मार्जारः स्वां तनुमतनुचांचल्यरहितां
विधायाभ्याहर्तुं भवति गृहगान्मूषकचयान् ॥

तदनु तमेतावतिभीतावतिभ्रान्ताविहावलोक्य तत्रैवावतस्थाते ॥

अयं विद्वानूचे वचनमिति मृत्युंजय पुरा
जनद्रोहिव्याघ्रासुरहर महादेव सपदि ।
महारण्येऽप्यस्मिन् पुनरपि तदेवागतमिमं
निहत्य श्रीपंपारमण शिव नौ पाहि कृपया ॥

तदनु सखाऽहं भवामि निर्भयो भवेत्यभिधाय निर्मुक्तकोशवरशस्त्रकरः सन् मृत्युंजयो मृकंडुसूनुमिव दिलीपमहीपतिर्नन्दिर्नीमिव वाऽद्य परिपालयामि कविमेनमवनीसुरमिति मनसा निर्धार्य शनैःशनैरग्रे प्रचालितोऽभूत् ॥

शार्दूलोऽपि शनैस्तस्मात् निकुंजाद्बहिरागतः ।
शयान एव दैवान्मे लब्ध आहार इत्यसौ ॥

तदनु विबुधेऽस्मिन् मदर्थमेव सखाऽयं निजदेहव्ययोद्युक्तो भवति तावदहमेवाग्र इह परलोकापवादापनुत्तये सर्वव्याघ्रहतो राजा भवतीति राज्यप्राप्त एव परोपकारार्थमिदं शरीरमिति नीतिशास्त्रोक्तधर्माचरणाय वा शीर्यत इति शरीरमिति व्युत्पत्याश्रयस्य शरीरस्य कथंचिदवश्यमेव नाश्यत्वात् विवेकिना पुरुषेण विनश्यदवस्थमपि वा आत्मीयं प्रशस्तं वस्तु परमेश्वरार्पितं

विधेयमिति पुराणवचनाच्च संनिहितमृत्युपवित्रं गात्रं एतत्प्राणिहृदयान्तरास्थितशिवार्पणबुद्ध्यैवास्य शार्दूलस्य पुरत एव आमिषपिण्डमिव संस्थापयामीति निश्चित्य निश्चिन्तया शनैः शनैः गच्छन्तं तमातिक्रम्य गते सति सर्वज्ञः परमकारुणिकः पंपापतिर्भक्तवत्सलो मृगयोत्सवाय शैवजनोढवाहवाहनारूढो बहिर्निर्गत्य रथ्यायां आनन्देन जनैः परिदृश्यमानमूर्तिस्सन्नेव आत्ममहिम्ना गृहीतविद्यानगरेशनरपतिमहाराजशेखरमहायोधयूथपतिविभ्रमावहाद्भुतापूर्वमानुषविग्रहः सुरासुरशिरःकोटीरकोटिसमुदंचितनूत्नरत्नावालिशाणकषणानिर्मलीकृतचरणनखमणिराम्नायशाखिशाखाग्रपल्लवीभूतसंफुल्लतल्लजपादकमलयुगलाद्विरेफायिताखिलमुनिजनमानसां सगर्भशालिशालिजंघोपशोभितो लावण्यतारुण्यकलभकद्वयकराविराजमानोरुयुगः कटीतटीघटितमृदुदुकूलपटाच्छादितजघनस्थलोऽपि कलधौतमणिमेखलाकलापालंकृतो निजभक्तसमाचरितानन्तानन्तामर्त्यसमाराधनसत्रदीयमानसमृद्धशुद्धान्नाज्यप्राज्यभोज्ययथेष्टभक्ष्यभक्षणसुहितमानसाविर्भूतपरमानन्दपरिपूर्णनिखिललोकाधारो दरचलनचलितकनत्कनकहारमध्यनिबद्धहीरफलकोपहितनाभिदेशो नवमल्लिकासु मालिकासौरभ्यलोभपरिभ्रमद्भ्रमरवारमनीषावहेन्द्रनीलकेयूरमरीचिपरिवेष्टितसरससुगन्धिचन्दनरेणुपुंजालेपधवलितभुजद्वयान्तरन्यस्तकुंकुमकेसरस्थासकरंजितविशालवक्षस्स्थलो मलयजरमगन्धलुब्धभुजङ्गमत्यावहजानुबाहुपरिष्कृतः सौन्दर्यसमुद्रदृश्यमानकम्बुग्रीवः सहकारकिसलयारुणबिंबाधरकलितललितदरहसितसितकपोलतलादर्शदर्शनीयमृगमदरेखाकृतश्मश्रुपरंपरो दन्तपांक्तिरत्नमालो दंडायमानोन्नतनासिकनाळनयनद्वयपुंडरीकोपगतमधुकरनिकरायितभ्रूलतोल्लसितः कृपाकटाक्षेण सुधारसमभिवर्षन्निव स्थितो विभूतिकृततिर्यक्पुंड्रांकिताष्टमीचन्द्रोद्भासिललाटपट्टालंबमानदेदीप्यमानमणिमंडलचलत[1] .... लालंकृतकर्णोत्पलरो..बसमुदयशंकावहाचिकुरनिकुरुंबोत्तमांगधृतधौतोष्णीषसम्बद्धशौर्यांकगुच्छो विविधराजशेखर[2] .. लक्षितः खड्गपाणिरतित्वरितगमनेच्छात्ममनोज..नुकूलवेगातिशयनिरोध्यवस्थानसमयनटदुन्नतचतुष्पादमुत्पुच्छमूलसंकलितरश्मिकल्याणपल्याणपरिलम्बमानचमरीमृगवालाविलसदुदरोभय-

1. चलत्कनककुण्ड ? 2. लक्ष्म.

पार्श्वाच्छादकशार्दूलचर्मगरुतं वरवीरशौर्याकार्द्रकुसुममालिकानिबद्धकण्ठसटा-च्छटानुगतमुक्तालतं नैजचांचल्यकृन्मुखनमनोन्नमनसंचालितकलधौतखलीनं उच्चलत्किंजल्कपक्षराजद्राजहंसपक्षभूषाविशेषभूषित ... प्रदेशं केनचिद्विबुधेन-वेदाश्वमन्दुरीभूतहिरण्यगर्भहृदयान्तरादानीतमाम्नायाह्वयं जयसूचकहेषारवं कु-र्वन्तमा.......दमारुतस्थापितगलदुत्तरीयाच्छादितांसः सत्वरमागत्य तत्र काल-ज्ञासेनेनोपविष्टमूर्ध्वजानुमधोमुखेमनमवनीसुरमवलोक्य करुणाजलपरिप्लुत-लोचनस्सन् उत्पतितुमुद्युक्तस्य दुरात्मदैत्यांशजातस्य महाव्याघ्रस्याग्रत एव तुर-गोग्रपादावुत्क्षेपयामास ।

शार्दूलश्चकितस्तदैव तुरगग्रीवां ग्रहीतुं जवात्
उत्प्लुत्याभिमुखं पपात निहतः खड्गेन खट्वांगिनः ।
भूम्यामुत्पतनः पुनः पुनरसावश्वाग्रपादाहतो
निष्क्रान्तोऽतिभयंकरोऽभवदहो दैत्यांशजातो यतः ॥

तदनु स एष महापुरुषोऽतिशूरोऽपि मृगव्याध इव मृगयाविनोदकौतुकी सन् प्रधावनधारणप्रवीणता.... वर्तमारुतगतिसंमितगमनेन वाजिनं विलासेन परिभ्रामयन्नेव पर्यापतितोऽपि दुष्टजंतून्परोपद्रवकारिणः खड्गवराहभल्लूकलुला-यादीन् मृगानुधावनेन तदागतैरात्मेश्वरोदीरितवचस्तात्पर्यावबोधनाय निश्च-लीकृतश्रुतिभिः श्वभिश्चतुर्भिः सदागमैः दुर्मतानिव खंडयन् प्रचंडमार्तंडमंडलोऽ-न्धकारमिवाऽन्धकासुरादिदुरात्मरूपभयानकदस्युभयं व्युदस्यानयोः समीप-मुपेत्य सखड्गमेव हस्तमुत्तंसयन् प्रणमनसे द्विजराजशेखरवीरभटाभिधानेन मयेति कविमेनमुत्थितमवोचत् ।

विद्वानयं वाक्यमुवाच धीमानेवं महासत्वगभीर धीर ।
सर्वत्र लोके विजयी भव त्वं आवां पुनर्जन्मगताविव स्वः ॥

अतः पिताऽऽवयोःप्रणम्योपि त्वमेव ब्राह्मणो मम देवतेति भगवदुक्तिर्मान्यो-द्विज इति मत्वा स्वनामकीर्तनपुरस्सरं नमोवाकमवोच इति मयाऽऽशीर्वचनमुक्तम-वनीसुरेण वैदिकमर्यादानुसारेण त्वयि विरूपाक्षदेव इव जयजयेति भक्तगणप्रवि-ष्टेन केनचिदनेन पंपापतिभक्ताग्रगण्यवरेण्यश्रीराशिदेशाधिपामात्यपुत्रेण मान्भि-

त्रेण राजन्यसहचरेण क्षत्रधर्मावलंबिना निजस्वामिनैव भवतः प्रणाम एव भृत्य रीत्या चरितः पर....राजशेखर इत्येव भवन्नाम भवितुमर्हति न राजशेखरवीरः भट इति प्रातिभाति अथवाऽत्र परमार्थतः तत्पुरुषस्समानाधिकरण एवास्तु न व्यधिकरणः, बहुव्रीह्यादरस्तु प्रपंचानुसारीति रीतिरियं रामेश्वरेऽपि विचार्यताम्।

ततः श्रीमान् वीरः पुरुष इति वाक्यं समवदत्
त्वयोक्तं जानाति त्रिदशगुरुरेव स्वयमिह ।
अहं शूरो दैत्यानिव परशुहस्तः पशुपतिः
मृगान् दृष्ट्वा हन्तुं किमपि बुध जानामि नितराम् ॥

ततोऽनेन कविनाऽवनिभारापनुत्तये वसुमतीमवतीर्य विहरता भाग्यवता भवताऽनुष्ठितदुष्टदंडनादवशिष्टशिष्टपरिपालनं कृतमेवेति भवन्तं सर्वज्ञं परमेश्वरावतारं मन्य इत्यभिहिते सत्यसावुदारबुद्धिरिव उदात्तः श्रीविरूपाक्षदेवनामवर्णावलिस्फुरदन्तःप्रभापुंजरंजितरत्नांगुलीयकमस्मै पारितोषिकं दत्वाऽयं जनोऽनुज्ञाप्यतामन्यत्र गमनायेति विनयेन विद्वांसमेवमवोचत् ।

अन्यत्र संति किमु ते परिपालनीयाः
श्रीराजशेखर महापुरुष प्रवीर ।
नीत्वा सरित्तटमिमौ भवता तथापि
गंतव्यमित्ययमुवाच कविस्तदानीम् ॥

तदनु भगवान् महादेवोऽपि भक्तवात्सल्येन विबुधवचनमंगीकृत्य युवां पुरतो गच्छतामित्यभिधायानुगच्छन्नावयोःसरित्तटमुपागतयोः तत्रैवान्तरधात् ।

शृण्वन्नेव खुराघातशब्दान् मार्गगतो बुधः ।
अश्रुते त्वस्य तच्छब्दे परावृत्यावलोकयत् ॥

तस्मिन्नदृष्टे सत्यदृष्टवशात् दृष्टोऽसौ महापुरुषो क गत एतावत एव समयात् विरूपाक्षदेव एव मृगयोत्सवाय वाहवाहनारूढो बहिर्निर्गत्य रथ्यायामखिलजनदृश्यमानोत्सवमूर्तिः सन्नेव भक्तवात्सल्येनाप्यत्र दुष्टनिग्रहशिष्टपरिपालनार्थमेव **गच्छन् तृणं स्पृशतीति** न्यायेनेह महारण्येऽपि शार्दूलं निहत्य

संरक्षितयोरप्यावयोर्निजस्वरूपदर्शनानर्हत्वसंपादनायैव गृहीतवीरभटवेषोऽपि प्रणम्यसे द्विजराजशेखरवीरभटाभिधानेन मयेति मत्संबोधनव्याजेन द्विजराजशेखरो वीरभट इति स्वनाम संकीर्त्य नमोवाकमवोचत् ॥

न ज्ञातं हि मया तदैव शिव इत्यज्ञानपाशावृतं
जानन्ते न पुरन्दरादिविबुधाः सर्वेपि संमोहिताः ।
ब्रह्माद्याः पशवो भवन्ति च ततस्तेषां पुनर्ज्ञानदो
भूत्वाऽभूत्परमेश्वरः पशुपतिर्ज्ञातुं तमीशे कथम् ॥

परन्तु साक्षाद्विरूपाक्षदेवेन कथंचित् प्रसन्नेन परमप्रेमातिशयेन सल्लापपुरस्सरमेवा (प्र ?) त्तमेतद्रत्नांगुलीयकमात्मीयम् ।

पश्येदं तु सखे विचित्रमतुलं रत्नं स्फुरत्यन्तरे
कान्तिस्संगतवर्णपंक्तिसदृशी संदृश्यते केवलम् ॥
इत्युक्त्वाऽऽत्मकरांगुलीयकमहारत्नप्रभामंडलं
सख्युस्तत्र सरित्तटेऽभिमुखतः कृत्वा समादर्शयत् ॥

ततः सोऽपि अमात्यपुत्रतया अशेषभाषालिपिविशेषज्ञश्चलन्तीमपि रत्नकान्तिपटलवर्णावलिं देवलिपिरिति निश्चित्य विपश्चितेऽस्मै कथयामास श्रीविरूपाक्षेति पंचाक्षरी स्फुरतीति ।

ततोऽयं श्रीपंपापतिपरमभक्तः स्वयमिमां
समीक्ष्यैतद्रत्नं शिरसि नयने वक्षसि वहन् ।
परं तस्या मूर्तेः स्मरणपरतन्त्रः क्षणमभूत्
निमील्य स्वे नेत्रे सपदि गलदानन्दपयसि ॥

सोऽपि परमानन्दभरितांतरंगः सन् विरूपाक्षदेवभक्ताग्रेसरद्विजराजकलानिधिर्भक्तवत्सलः पंपापतिरत्रानन्यभजनस्य समर्पितसकलकार्यभारस्य शिवार्पणबुद्ध्यैव शरीरव्ययोद्युक्तस्य सात्विकात्माशिरोमणेर्धरणीसुरस्य भवतः परिपालनार्थमागतस्त्वदुक्तन्यायो मद्विषयः त्वमेव महानुग्रहपात्रमहं तु भवादृशसज्जनसंगत्यैव कृतार्थोऽस्मीत्यवोचत् ।

तावेतौ सरितं विलंघ्य चपलं पंपापुरीमागतौ
दृष्ट्वा हृष्टमना गतः स्वनिलयं मित्रोऽनुरक्तयेति च ।
अद्याऽहं द्विजघातदर्शनभवात् पापात् भयं केवलं
प्राप्तः सर्वभयावहात्परशिवाज्जातोऽधुना निर्भयः ॥

तत इमौ सन्ध्यावन्दनाय तत्रैवावतस्थाते ।

देवस्तत्र वने वसन्तसमये वासान्तिकां पुष्पितां
द्रष्टुं केवलमागतास्सपदि तद्देशं सुपर्वांगनाः ।
आराद्वीक्ष्य शिवस्वरूपमतुलं कामातुराः पापिनः
स्वामिन् मारभयादिहेति शरणं प्राप्तास्समूचे तदा ॥

अनुचितः खलु परपुरुषाभिलाषः कुलस्त्रीणामिति ।

ततस्ता अप्यूचुर्जितमदनलावण्यजलधे
कियद्भिर्नो लभ्यो भवति जननैः कोटिभिरपि ।
कदाचिल्लब्धश्चेदपि गिरिसुतालिंगिततनुः
परं दैवादेकस्त्वमिह शिव दृष्टोऽसि गिरिश ॥

महादेव त्वमेव खलु पुरा.. ग... भिक्षुकरूपेण भिक्षामटन्नेव मुनिसतीनामपि पातिव्रत्यभवाहंकृतिभंगकारित्रिपुरसुंदरीजारः चिरमसुरवंचनार्थोपात्तमहामोहिनीरूपनारायणीसहचरोऽपि अतिकामुक इव निरन्तरमात्मदेहार्धसमुद्धृतसर्वमंगलोऽर्धनारीश इति ख्यातिं वहन् अद्यास्मद्भाग्यपरिपाकवशादेव हैमवतीं विहाय निजस्वरूपदर्शनानधिकारिणोऽपि भक्ताग्रेसरस्य कस्यचित् संरक्षणार्थमादृतातिसुन्दरापूर्वमानुषविग्रहस्सन्निह महाश्रममारुह्य समागतः कृतकृत्यो गन्तुकामोऽस्माकं दृष्टिपथं गतः कामं काममुत्पादयन् कृष्ण इव गोपांगनानामुपेक्ष्य गन्तुमनुचितमेव वयं तु सर्वाः पतिपुत्रसहिताः त्वदधीना एव किं बहुनोक्तेन शरणागतवत्सलस्य सर्वतन्त्रस्वतन्त्रस्य नांगीकृतांगीकृतमन्मथस्य निजप्रकृतित्रिकल्पितानिखिलाण्डकोटिब्रह्माण्डमण्डलेश्वरस्य त्रयीसीमन्तिनीसीमन्तमुक्ताभरणस्वचरणनखरेखस्य भवतोऽङ्गसंगात् कृतार्थाः गुरूपदिष्टतत्वज्ञानादिव सांसारिकसुरतोत्सवानन्दसहस्राधिकपरब्रह्मानन्दमेव लप्स्यामह इति।

दयालुर्देवोऽसावपि समवरुह्याऽथ तुरगात्
ऋतून्निर्मायाऽऽसां पृथगभिमतांस्तत्र बहुशः ।
स्वयं भृत्त्वा वेषान्सपदि रुचिरान् यौवन. जो
निकुंजेषु स्थित्वा चिरमरमताऽऽभिर्विट इव ॥

किं च— निर्माय सौधनिचयान् बहुशस्तदानीं
मंचानपीह गिरिजापतिरेष गीतम् ॥
गायन् विनोदितमनाः सुरसुन्दरीभिः
कामेश्वरोऽभवदनेकविचित्ररूपः ॥

अपि च—संपूर्णकामः सुरलोककान्ताः सन्तोषयामास महेश्वरोऽसौ ।
रतोत्सवानन्दममूरखंण्डं संप्रापयन्नित्यसुखस्वरूपम् ॥

अत एवाऽत्र खलु समुत्तुंगतरंगालंकृततुंगभद्रादिसरित्तीरपंपारण्यादिरमणीयस्थलगतानेककोटिसंख्यागणनीयसुरांगनाकलितललितश्रृंगारविलासास्पदपरिस्फुरदसंख्याभिमतबाल्यकौमारयौवनस्थविरताशालिशरीरधरणप्रकटीकृतनिजानन्तावतारमहामहिमानुगृहीतकामकृत्याचरणपरत्वपरब्रह्मानन्दकरमहेश्वरविचित्रचरित्रवर्णनेन शिवनाटकशिवाष्टपद्यादिप्रबन्धाः पूर्वैरपूर्वैश्च जयदेवादिकैर्महाकविभिर्व्यरच्यन्त विरच्यन्ते च ।

तत्र श्रीपरमेश्वरस्य महिमज्येष्ठां हिमाद्रेः सुतां
गंगां सर्वसुरांगनासु महितां मत्वा स्वकीयां मुदा ।
कान्तारत्नमिदं नयामि शिरसा धृत्वेति निश्चित्य तां
जग्राह स्वत एव मां नय शिव स्वामिन्निति प्रार्थितः ॥

तदनु समुदितं चन्द्रमात्मप्रियमवलोक्य संतोषेणैव पुष्पितायाः कुमुदिन्यास्सुवासिन्या वासन्तिकया समं सौभाग्यसौरभ्यसौमनस्यान्यापाद्य मुदितान्तरङ्गः स्वस्वस्थलगमनायाऽनुज्ञ प्य पंपापतिर्गंगाधरो भूत्वाऽश्वमारुह्य कालविलंबकुपितपार्वतीभयेन सत्वरमेव पम्पानगरमागतोऽभवत् ॥

नद्यां तत्र कविस्समीक्ष्य पुरतो गच्छन्तमश्वेन तं
विश्वेशं पुनरप्यतन्द्रितमना निश्चित्य पम्पापतिम् ।

प्रत्युत्थाय स एव गच्छति सखे पश्यात्र यो नौ वने ।
दुष्टव्याघ्रभयादपालयदिति प्रोवाच ामत्रं तदा ॥

तत इमौ पुनः शिवमूर्तिसन्दर्शनेन कृतार्थौ भवाव इत्यागतौ चन्द्रज्योतिः-प्रकाशितायां रथ्यायां शैवजनोढवाहवाहनोपरिस्थितां नित्ययुक्तामपि विहायान्यत्र क गत ईश्वरोऽयमिति कुपितपार्वतीप्रेरितात्मपरिजनापहृतश्वेतातपत्र-चामरव्यजनादिसकलराजशेखरसमुचितमहाशेखरसमुचितमहासाम्राज्यलक्षणामपि विराजमानां द्विजराजशेखरमूर्तिमवलोक्य सप्रदक्षिणं परिक्रम्य प्रणम्य च देवार्चकदत्तशिवप्रसादमालिकां शिरसि गृहीत्वा साक्षादेव मृगयामहोत्सव-विनोदानुभावकमहाश्वारूढमहादेवमहानुग्रहेण पुनरस्मदीयान् पश्याव इति निजस्थानमासेदतुः ।

देवस्तत्र पुराधिकारिपुरुषं संप्रेषयामास किं
स्वीयं वस्तु विचार्यतामिति परं नानाजनेषु स्वयम् ।
गत्वेतस्तत इत्यतोऽगमदयं भृत्यैस्सहेति...
.. रत्रापहृतं शिवस्वमधुनाऽऽनीय प्रदेयं जनाः ॥

अन्यथा भवन्तो[1] दण्ड्या एव—

तदानीं तद्भृत्याः शिवनगरवीथ्यां तत इतः
चरन्तः पार्वत्याः परिजनगतं कंचन बलात् ।
गृहीत्वा निन्युस्तत्पुरत इति तर्जन्त इव रे
त्वया देवद्रव्यं कथमपहृतं गच्छ चपलम् ॥

तदनु शिवप्रेरितैरेतैः निबध्यात्मबुध्याऽन्यप्रेरणया वा महादेवपदार्थापहारी भवसीति पृष्टोऽसौ नाहमात्मना चोरः किन्तु परप्रेरित एव परश्च परपतिरित्यवोचत् ।

अरे दुरात्मन् मम नाम गृह्णन् महापराधं मयि संनिपात्य ।
न त्वं विशुद्धोऽहमिहेश्वरस्य सेवाधिकारी कथमीदृशः स्याम् ॥

---

1. क. भवेत

सम्यगु विचार्य वक्तव्यमन्यथा वृथाहती: किमनुभोक्ष्यसे सत्वरं वदेति परपतिनोक्तं निशम्याऽसौ निश्शंक एव कुतोऽपि कारणात् कुपितायाः पार्वत्याः प्रेरणयैव सर्वे वयं युगपदेव देवस्य पताकाऽऽतपत्रादिवस्तु अपाहरामेत्य-वोचत् ।

देवार्चकं परपतिः समवोचदेवं स्वं स्वोपलब्धमभवत्परमेश्वरस्तु ।
देवस्स्वयं प्रयततां पुनरेव लब्धुं तत्तद्द्रयं सपदि भूसुर निर्भराः स्मः ॥

अतस्सत्वरमेव देवालयं प्रवेशय भव्यशिवमूर्तिमिति ।

ततो देवार्चको देवमूर्तिं वाजिनि संस्थिताम् ।
सत्वरं धावयामास शैवैर्देवालयं प्रति ॥

तदनु सर्वेष्वपि महाजनेषु अतिधावनेन समागतेषु सत्वरमेव पुरः प्रधा-वितचतुरन्तयानस्थितपार्वतीमूर्तिमादाय महोत्सवयागशालान्तःस्थितमाणिमंच-तल एवोपवेश्य वितानमध्यावलंबिनीं तिरस्करिणीं विधाय महादेवीप्रेरितः शैवागमप्रवर्तकद्विजः परिजनानेवमवोचत् ।

मा प्रवेशयतेशानमूर्तिं तत्सेवकानपि ।
देवालयांगणे स्थित्वा कृत्वा द्वारनिरोधनम् ॥

ततस्त एते तदागमनमलक्षयित्वैव भक्ष्याणि भक्षयन्तस्तदास्थितास्सर्व-स्वतंत्राप्रतिहतशक्तिमहादेवाश्रयबलेन महाद्वारमतीत्य समागतान् शिवमूर्ति-परिजनान् विनोदेन तैरेव भक्ष्यैस्ताडयामासुः ।

तेऽपि श्रीपरमेश्वरोर्जितबलास्तैरेव भक्ष्यैर्मुदा
सन्ताड्याऽथ पलायितान् पुनरिमान् कृत्वैव तूर्णं हठात् ।
उद्घाट्योद्भटवत्कपाटपिहितं द्वारं द्वितीयं तदा
नन्दीशांगणमास्थिताः जय महादेवेति भक्त्याऽब्रुवन् ॥

तदैवाऽर्चकः त्रिपुरारिवीरराजशेखरसमधिष्ठितवाहवाहनं मूलायतन-प्रदक्षिणगमनेनैव महोन्नतकायमानपटलीमानीय कुंभार्तिक्यादिसमर्पणानन्तरं शैवजनेन धरण्यामवतारिते सति पीठे पुनः पूज विधाय प्रसारितकरचक्र-

जनांजलिषु प्रसादकुसुमानि विनिक्षिप्य सावधानः शिवमूर्तिं क्रतुभवनान्तः-स्थितमणिमंचतले यवनिकाबहिःप्रदेश एव निवेशयामास ।

कश्चित्तदैवमवदत्कविरीश्वरोऽपि
देवस्समस्तजगतामसमर्थ आसीत् ।
अन्तःप्रवेष्टुमिह यत् पृथगास्त देवी
कान्ता कुतोऽपि कुपिता निजशक्तिरेषा ॥

किमुतेतरपुरुषाणामात्मयोषिद्विषये ।

अत एव शिवः शक्तो यदि शक्त्या समन्वितः ।
इत्युक्तमार्यैराचार्यैस्सत्यं तद् दृश्यतेऽधुना ॥

तदनु शिवयोः सामरस्यमखण्डमेव चिदानन्दयोरिवेति मन्यमानोऽन्यः कविरेवमवोचत् ।

नैषाऽभवत् शिवसती कुपिता कुतोऽपि
किन्त्वीश्वरः सकलभक्तजनैस्समेतः ।
तूर्णं समागत इति त्रपयैव देवी
मंचस्थिता यवनिकां ननु सन्दधाति ॥

ततः पुनरन्योऽपि विद्वान् उचितमेवोक्तं त्वया इह खलु बहुशः प्रिय परिचितानां प्रौढानामप्यपांसुलानां स्वाभाविकी त्रपा क्षणमात्रमपि वाऽन्यत्र गत्वाऽऽगते सति पत्यौ ॥

परं तु जीवेश्वरयोरनादिमाया तिरोधानकरी बभूव ।
मायेशयोरन्तरकारिणी या का वा भवेत्पंडित तां न जाने ॥

ततः सोऽप्यवोचदेवं कविरेषोऽपि मायैव शिवयोरपि प्रपंचरीतिरस्तीति महामोहमापादयन्ती तिरस्करिणीत्युच्यते ॥

महादेवोऽर्धनारीशो भवानीति शिवैतयोः ।
नित्यसंबंध एवास्ति विद्याशंकरयोरिव ॥

ननु कश्चिद्विपश्चित् सम्प्रति संजातप्रत्ययोऽपि शिवभक्तिरसार्द्रान्तःकरणकरुणयाऽतिपामरेव पार्वतीपरमेश्वरमूर्तिद्वयं निरंतरमेव पुनस्संनिहितमनवलोक्यैतन्नगरादन्यत्र न गन्तव्यमेव दृष्टैतद्यवनिकैस्सुमनोभिरित्यवोचत् ।

तत्रत्याः सकला विप्राः सत्यमित्यूचुरादरात् ।
देवार्चकः पृथक् पूजां शिवयोरकरोत्ततः ॥

तदनु सर्वेष्वपि भूविबुधेषु चणकगुडोदकताम्बूलाशीराशिमंत्राक्षतप्रसादकुसुमलाभसन्तोषितमानसोल्लासातिशयेन स्वस्वाश्रयान्प्रति गतेषु देवार्चकादयः शैवागमप्रवर्तका ऋत्विजो महामहक्रतुसत्कर्म तात्कालिकं विधायाऽरिपुरुषानुमत्याऽऽत्मसदनं प्रति गताः यात्रागतास्तु केचित्सत्यमेव देवालयद्वारबन्धनं जातमीश्वरस्य पुनर्दर्शनं पुरस्समोत्सव एव भविताऽद्य शिवलिंगमूर्तिमदृष्ट्वैव कथं गन्तव्यमस्माभिरिति चिन्तया परावृत्य केषुचित् गृहीतविरूपाक्षदेवदर्शनेषु स्वस्वजनपदग्रामान्प्रति संभूय गच्छत्स्वपि निबिडतमजनताभरभरितायां रथ्यायामधिकप्रवर्तितहरिहरशरण्यपुण्यचारित्रकथाश्रवणासक्ताश्चिरेण प्रभातकल्पां शर्वरीमनल्पामपि अल्पामेव मेनिरे ।

प्रभाते सत्येवं पुनरिति मतिं चक्रुरनघा
वयं प्रस्थास्यामः श्व इह महमालोक्य सकलम् ।
द्वितीयायां शंभोः शुभकरवसन्तोत्सवमहा-
क्रतोरेतस्याद्याप्यवभृथयुतं पुण्यफलदम् ॥

तत एतेषु महाजनेषु परमेश्वरोत्सवयज्ञावभृथस्नानाय गृहीतोपवासनियमेषु केषुचिद्वसंतोत्सवकल्याणदिनेऽद्याऽपि महीसुरसमराधनं विधेयमनन्तनित्यसन्तर्पणसुहितयोरपि शिवयोरलंकरणायेति निश्चित्य तत्साधनपरा बभूवुः ।

देवार्चकः सपदि भूमिसुरैस्समेत्य
शैवागमोक्तसवनत्रयकर्म कृत्वा ।
पंपापतेर्मधुमहोत्सवयज्ञपूर्तिः
जातेति तत्र मनसा मुदितो बभूव ।

तदनु भगवान् महादेवः स्वकीयमाधवमहोत्सवक्रतुपूर्तिर्निर्विघ्नमेव जातेति परमानन्दभरभरितोऽपि पार्वतीश्रुतवैयात्येन कुपित इव क्षणमात्रमन्यत्र गन्तुकामः प्रेरयामास निजार्चकमुर्वीसुपर्वेन्द्रमात्मग्रहणाय ॥

सम्प्रेरितोऽसौ परमेश्वरेण पम्पेशसेवाधिकृतं पुमांसम् ।
अवोचदेवं शिवपीठमाशु शैवैस्समानीतमहो विधेहि ॥

तदनु तत्प्रेरितैः शैवैः वसन्तोत्सवपीठेऽतित्वरितमेव यागशालांगणमानीते सति देवार्चकः शिवमूर्तिमुपादाय शनैः शनैर्गच्छन् पार्वतीप्रेरणया गमननिरोधायेव द्वारि प्रसारितेषु सवितुः करेषु महादेवशिवाज्ञयेव परिचारकजनेनैव आतपत्रैर्निवार्यमाणेषु व्यजनसदनान्निश्चक्राम ।

पीठे निवेश्य शिवमूर्तिमसौ तदानीं
संपूज्य भक्तजनदत्तफलप्रसूनैः ।
आज्ञापय त्त्वरितमेव जनांश्च शैवान्
पीठं समुद्धरत गच्छत गच्छतेति ॥

ततः तत्प्रेरितैरेतैस्सत्वरमेव शिवपीठं गृहीत्वा देवालयबहिर्द्वारान्निर्गत्य गते सति प्रियविह्वलचित्तपार्वतीप्रेरणया शैवागमप्रवर्तकदीक्षितद्विजोऽपि मणिमंचतलाद्भवानीमूर्तिमान्दोलिकयाऽऽनीय महामध्यरंगस्थलन्यस्तनूत्नरत्नपीठे निवेश्य नन्दिनिकेतनांगणपूर्वद्वारमपिधाय तत्राऽन्तरवस्थितोऽभवत् ।

महादेवो देवः स्वयमपि सतीसंगविरहात
पुरो गन्तुं चेतस्सपदि मम नो रोचत इति ।
स्वकीयां सान्त्वोक्त्या वशमनुनयानीति च ततः
पुनर्देवागारं प्रति गमनवन्तं तमकरोत् ॥

ततः स एष देवार्चकः शिवाधिष्ठितवसन्तोत्सवपीठमविलम्बितमेव देवालयमहागोपुरप्राकारचत्वरमानीय शैवजनोढमेव विधाय शिवाज्ञया स्वयं द्वितीयद्वारपिधानकवाटमताडयत् ।

तत्रान्तर्बहिराश्रितौ द्विजवरौ सम्यग्विवादं मुदा
सर्वेषामपि मोहकं श्रुतिसुखप्रश्नोत्तरैश्चक्रतुः ।
पार्वत्याश्च महेश्वरस्य वचनैर्वक्रैरवक्रैः शुभैः
साकूतैः सहजानृतैश्च परमप्रेमास्पदैः केवलम् ।

स चायं विवाद एवमनूद्यते—

कस्त्वं गिरीशः किमु मन्दरो वा मेरुर्धरोऽहं न तु नीलकण्ठः ।
भुजंगभुक्किं न शिवे त्रिशूली वैद्यं न जाने भिषजः प्रसर्प ॥

अयि —स्थाणुः कथं वाक्प्रसरस्तवायं
भीमोऽहमंभोरुहलोचनेऽस्मि ।
किं धर्मराजानुज एव कान्ते
नो वामदेवः किमु मौनिमुख्यः ॥

उमे ! भूताधिनाथोऽहमिहास्मि किं ते
निजस्थलं गच्छ वटस्य मूलम्
अश्वत्थशाखाग्रमयि प्रियेऽहं
पंचाननः किं गजघातुकस्त्वम् ॥

अयि त्वया सत्यमेवोक्तं गजासुरारिरहम् । परन्तु

त्वया ज्ञात्वाऽप्येवं निपुणतरवक्रोक्तिभिरहं
यदुत्क्षिप्तं किं वा तदिह न हि जाने कुत इति ।
मया पंपारण्ये गतमवनिदेवावनकृते
न शंकाऽन्या कार्या मयि निरपराधे कुरु दयाम् ॥

सत्वरमेव कवाटमुद्घाटय ।

मौळं किं जलमाननं किमितिचेदब्जं पुरो दृश्यते
किं नीलालकपंक्तिरीश गिरिजे सेयं द्विरेफावलिः ।
तत्र भ्रूलत एव भात इति नो वीचिच्छटो लोचने
किं मीनौ स्तनमण्डलं कथमहो चक्रद्वयं प्रेंखति ॥

ननु भुजंगाभरणचरण तवैकपत्नीव्रतनियमपरायणमन्तःकरणमेवास्ति। मयाऽन्यरमणीमणिपरीक्षा करणीयैव गृहीतपंपावतारया ।

अंगं त्वदीयं तु निरंगरागं स्वेदार्द्रमासीत्कुत इंदुखंडः
शिरःस्थितो वक्षसि नैकरूपस्तेजोविहीनोऽपि बिभाति चित्रम् ॥

देवि त्वदीयमन्तःकरणं भगवत्या भवत्याः परावतारं मत्वैव पंपाया-मनुरक्तमंगं तु मम दुष्टनिग्रहशिष्टपरिपालनोद्योगेन सत्वरं प्रधावितेन महाश्वेन गच्छतः श्रमजलार्द्रं निरंगरागमभ्युत्पतत्पुण्डरीकनखक्षतमनेकचन्द्रार्धरेखालं-कृतमाशंक्य किमपि आपादयसि ।

देवान्यथा कथमभूत्तव वस्त्रमेतत्
सिन्दूररक्तममरेन्द्रसमर्चितांघ्रे ।
पीतं कचित्क्वचिदहो नितरां बभूव
हारिद्रपंककलितं शिव किं निमित्तम् ॥

प्रिये वसन्तसमयसमुज्जृंभितकिंशुकवासंतिकादिकुसुमरजःपुंजरंजित-मेतद्वस्त्रम् ॥

देवाऽनृत वदसि सर्वमपीह सम्यक्
धृत्वाऽपराधमुदितांकमहो गिरीश !
सत्यं मयोच्यत इति त्वमुपात्तगंगा–
सभोगाचिन्हकलितांग इतः प्रयाहि ॥

गौरि मैवं वद सर्वदेवपरस्त्रीसंगरहितोऽहं अशक्तस्त्वां विनाऽन्यत्र गंतुं अस्मिन्नर्थे प्रमाणतया हुताशनं स्पृशामि सर्पान्वा धरामि साक्षिणः सर्वदेवान्वा-करोमि प्रमथादिभूतान्वा किं बहुना विषपानमपि वा विदधामि समाज्ञापय किमपि कर्तुं सशपथमेव माम् ।

निस्संग एव खलु पावकलोचनस्त्वं
देवानिशं भुजगभूषण एव देवाः ।

भृत्यास्तवानुचरवर्गगताश्च भूताः
पीत्वाऽपि जीवासि विषं ननु कालकूटम् ।

तर्हि किं कर्तव्यं मया तन्निरूपय प्रसीद वाऽधुनैव भवतीं भगवतीं कनकांबररत्नपीठे निवेश्य सन्ध्याधर्मदिनव्यपायसमयसमागतनवांबुदस्तानित-शंकावहनीलमेघश्यामलपुरुषोत्तमकराघातमृदंगध्वनिविशेषानुगुणद्रुहिणपाणित-लमिलिततालयुगलरवकालितकमलाननकमलोद्गतगीतामृतरसास्वादपरवशाखि-लामरभ्रमरवारामोदनिनादमुखरिताम्बरसहकारतरुमूलरंगस्थलायमानोन्नतकाय-यमानपटलीसमाच्छादितमहागारचत्वरभुवि पुरतस्तवानन्देन सायं तांडवं त्रिधा-तुमभिलषामि ।

युक्तस्त्वया यदि तदा गिरिजे भवेयं
शक्तः समस्तजगतां जननादिकार्ये ।
कर्तेश्वरोऽपि च गुणी महितस्थलेषु
सद्भक्तकल्पितमहोत्सवजातहर्षात् ॥

देवि त्वया न युक्तश्चेदहं सच्चिदानन्दघनो निरालम्बो निष्कलो निष्प्रपंचः किं बहुना निराकार एव स्याम् अतो मद्ग्रहणाय तत्र प्रसरति प्रयास एव स्यादिदानीं मा मुंच शरणागतं निरपराधम् ।

प्रिये गिरिसुते मया पुनरितस्ततस्त्वां विना
न गम्यत इह क्वचित् कुरु दयां शिवे सन्ततम् ।
वहामि भवतीं मुदा मम शरीरवामस्थले
यदेकतनुरावयोस्तदहमर्धनारीश्वरः ॥

स्वामिन् निरंजन निर्विकार निर्दोष निरीह निष्कलंक नित्यशुद्धबुद्धा-द्वितीयाखण्डसच्चिदानन्दमय भवानलभ्य एव परन्तु अनादिजीवादृष्टसहायेन चिरादाराद्वर्तिनीं पुरातनयुवतिं मां अनुगृह्य जगन्निर्माय तत्र तत्र पवित्रस्थ-लेषु मन्निबन्धनबद्ध इव निवसन्नपि दुष्टनिग्रहशिष्टपरिपालनार्थमेव क्वचित् क्वचित् विहरन् अवाप्तसत्यकामार्थोऽपि सर्वजित्त्वादिषडंगाभ्यर्हितचतुर्थांग-

भूतस्वतन्त्रताशालितया सर्वैरपि अनियम्यो भवसोति भवन्तमहमपीदमेव प्रार्थये मदीयवाक्कृतापराधं क्षमस्व परमेश्वर भवदुक्तमेव यथार्थमेव कुर्विति ।

तदैवासौ विप्रः प्रमुदितभवानीरत इव
द्वितीयं तद्द्वारं जनसमुदयस्याऽऽशु नितराम् ।
प्रवेशार्हं चक्रे तदनु शिवदेवार्चकवरः
प्रवेश्यैतत्पीठं त्वरितमनयद्देवसदनम् ॥

तत्राऽयं शैवागमप्रवर्तकदीक्षितद्विजोद्धृतदाक्षायणीमूर्तिमुपादाय शिवमूर्तिसमासिकाफलकायां निवेशयामास ॥

ततः सर्वे ह्यारात्फलकुसुममाला ददुरिति
स्तुवन्तः श्रीपंपारमणममुया सार्धमधुना ।
स्थितं पीठे दृष्ट्वा वयमिह कृतार्थाः सकुशलाः
भवामस्त्वद्भक्तान् शिव शिव [द] पाहीश्वर विभो ॥

ततोऽसौ देवार्चकः तत्फलपुष्पमालाः शिवयोः समर्प्य विवाहमहोत्सवकल्याणचरमावयवभूतवसन्तमाधवपूजान्तं यजनसदनकर्तव्यं समाप्य कर्म ऋत्विगात्मयजमानाशिवप्रतिकृतिकरेषु कंकणविमोचनं विधाय पार्वतीपरमेश्वरयोः परस्परानुरागसूचकं कुंकुमकुसुमरसं तन्मूर्तिद्वयचेलांचलेषु निक्षिप्य तत्प्रसाद लिप्सयाऽऽनतपूर्वकायसद्भक्तजनशिरोवेष्टनाद्विपटद्विपटकवचेषु समुदाक्षिपत् ।

अथावभृथमंगलं गिरिसुतामहेशानयोः
महोत्सवमहाक्रतोरवयवं सरिद्वारिणि
विधातुमवनीसुरैस्सह शिवार्चकस्सत्वरं
प्रयात सरितं जना इति वचो बभाषे मुदा ॥

तदनु परपतित्वरितैः तैः शिवाधिष्ठितवसन्तोत्सवपीठं परिगृह्य शनैः शनैः प्राचीनमहागोपुरान्निर्गत्य पंपानगरवीथ्यां गते सति लोकपावनादितीर्थप्रवर्तितविरूपाक्षदेवसमाराधनसत्रावाप्तपुष्टान्नाज्यप्राज्यभोज्यपूर्णभक्ष्यभक्षणोपात्तलम्बोदरभरा अपि महीसुराः केचित् पंपापतिवसन्तकल्याणलक्षणकुंकुम-

कुसुमरसप्रसादलिप्सयाऽविलम्बितमेव समागत्य देवार्चककरोत्क्षिप्तेन मकरंदेन पाटलितांगपटा बभूवुः ।

पंपापुरोत्तरद्वारान्निर्गमय्य शनैःशनैः ।
असौ देवास्थितं पीठं अनयत्सारितस्तटम् ॥

तत्र विरलगतासु जनतासु चन्द्रज्योतिःप्रकाशविदितनिम्नोन्नतसैकतावरोहणारोहणसमयोक्तसावधानवचनोऽसौ जानुदघ्नजलामादिमस्रोतसमुत्तीर्य सरिदन्तरविराजमानरंभास्तंभाकलितकायमानपटलीसमावृतायां शर्करावत्यां वसुमत्यामवतारयामास तत्पीठम् ।

असौ सपदि भूसुरैस्सह विधाय तत्कर्म त-
न्महोत्सवमहाक्रतोरवभृथांगमत्यादरात् ।
निधाय च मुदा करे परपतेः समालंकृतीः
निवेश्य शिवयोः स्वयं प्रतिकृती सुपात्रेऽब्रवीत् ॥

ननु विबुधाः शृणुत विश्वामित्रपरिकल्पितोपद्रवानुभवसमयेऽप्यपरित्यक्तसत्यहरिश्चन्द्रमहाराजसुप्रसन्नाशिवमूर्ती एत एव तपोनिष्ठवशिष्ठवामदेवादिमहर्षिपरंपराभ्यर्चिततयाऽनतिस्पष्टदृष्टरथांगसरसीरुहादिशुभलेखालंकृतकरकमले सम्यगवलोकयन्तु भवन्त इति ।

आपादमस्तकमुदारमुमेशमूर्त्योः
चाम्पेयगन्धतिलतैलसमक्तमंगम् ।
दृष्ट्वा बुधाः सपदि सांबाशिवप्रसाद-
तैलार्द्रमूर्धजाशिखाः सहसा बभूवुः ॥

त एते त्रिशूलायुधदेवताधिष्ठितमाधवनवरात्रोत्सवयज्ञावभृथस्नानं महाप्रवाहे विधाय समागताभ्यां दीक्षितार्चकद्विजाभ्यां ऋत्विग्भ्यां कलधौतकलशमुखोद्धृतशुद्धोदकसमभिषिक्तयोः शिवमूर्त्योः शतक्रतुफलाधिकपुण्यलाभाय तत्रैव स्थिता बभूवुः ।

11

भुक्ता भूविबुधाः शिवार्चककरे प्रोत्क्षिप्ततैलाक्तकाः
केचित्तत्र सरिज्जलैर्निजशिरस्संप्रोक्ष्य पूर्णं फलम् ।
....
........प्रोज्झसदुत्तरीयवसना अप्यास्तिकाः केवलं ॥

तदनु देवार्चकेन वसन्तोत्सवपीठोपवेशित................. वेदपारायणपरा बभूवुः ।—

भेदसंपादकध्वान्ते विलीने द्विजराजितम् ।
गोभिरा................................ ॥

.... विशदवस्त्रालंकारविभूतिसरससुगन्धिचन्दनरेणुजातकस्तूरिकातिलककुंकुमकुसुम............मालिकाभिरलंकृतमूर्त्योः शिवयोः समर्पिताभ्यां सपरिचारकद्विजोपनीताभ्यामा .... दक्षिणाभ्यां सन्तोषितेभ्योऽवनीसुरेभ्य आशीर्वचनमन्त्राक्षतान् परिगृह्य स्वय....महोत्सवप्रवर्तकमाशास्य शिवप्रसादाक्षतप्रदानेन भक्तजनानखिलानानन्दिता .... मास

शैवास्तदाज्ञया पीठं दृढं धृत्वा शनैःशनैः ।
पंपापुरान्तरश्रेणी........................ ॥

तत्र प्रतिसदनांगणमविलंबितमेव पौरजनैः समानीतेषु सफलपुष्पाक्षतार्तिक्येषु देवा .... वारांगनाःपुरतःपूर्वरंगप्रसंगमंगळसंगीतभारतीनिराकृतरंभाः रतीश्वरमहादेवमनोरंजकं लास्य........ ।

शनैः शनैः .... न्महेशपीठिकां ततः
शिवार्चकोऽपि तत्र तत्र भक्तलोकपाणिषु ।
प्रसादपुष्पमालिकाः क्षिपन्नुमापतेर्मदा
निनाय.......... ....राजिराजिताम् ॥

तत्र यात्रागताः केचित् कुशलकुशीलवजेगीयमानचक्रवर्तिचक्रचूडामणितारकापुंजरंजितपदनखेन्दुद्युतिविशदीकृतहृदयकुहरधराभृन्निकरमहाराजपर-

मेश्वराश्वपत्यमात्यमुख्यनानाख्यपरशुरामावतारभूमीन्द्रशासनाधीनसकलभूपालपालितजगतीयुवतीविलासास्पदमहानगरसुखवसातिलोकाचरितशृंगाररसप्रधानविचित्रचरित्रशीलामृता....परवशा अपि समन्ततः समुज्जृंभितमहादेवकामध्वनिबोधिताः पुनरस्माकमुत्सवपीठास्थितसांबशिवमूर्तिसन्दर्शनं पुर....स्यादिति वदन्तस्त्वरितमेतत्पुरतः समागता बभूवुः ।

दृष्ट्वा ते शिवमूर्तिमद्रितनयामूर्त्यन्वितां भक्तितो
. . . . . तथेति वचसाऽयाचन्त पंपापतिम् ।
स्वामिन्नेवमिहैव ते प्रति समं चैत्रोत्सवे दर्शनं
देहि श्रीपरमेश्वरातिकृपया पाहि त्रिलोकेश नः ॥

केचित्तु तदैव निजदेशान्प्रति गन्तुमुद्युक्ताः स्वामिन्महादेव पार्वतीसहित एवमेवाऽस्माभिस्सहागच्छास्मन्नगरपर्यन्तमिति पंपापतिं प्रार्थयामासुः ।

देवोऽसौ गिरिजापतिः करुणया स्वीयांगवक्षस्स्थल-
प्रोन्मीलन्नवमल्लिकादिकुसुमश्रेणीप्रसादं ददौ ।
एतेभ्यो निजभक्तवत्सलतया गच्छामि पश्चाद्भव-
द्देशान्गच्छत निर्भयाः पुनरिमान् भक्तानिति भ्रामयन् ॥

तदनु गृहीतशिवप्रसादेष्वपि पुनः पुनरुमामहेश्वरमूर्तिसंदर्शनोर्जितभक्तिरसानुभवामृतचरितपरमानन्दजलनिर्मलीकृतलोचनेष्वपि एतेषु समुपात्तमहादेवमहानुग्रहभरेणैव शनैः शनैः देवप्रदक्षिणगत्या निजदेशान्प्रतिगतेष्वपि विराट्स्वरूपविरूपाक्षदेवतन्वामिव निबिडतमानेकलोकभरितायां रथ्यायां वसन्तोत्सवपीठचक्राधिरूढगिरिराजकन्यकासमेतराजशेखरसेवाचरणपरायणांतःकरणकृतमन्दगमनमर्चकमहीसुरमविकारिपुरुषस्सत्वरमना....य व्यजिज्ञपदिति ।

महादेवार्चक स्वामिन् सत्वरं नय पीठिकाम् ।
देवालयं पुरः कार्यं . . . . . वर्तते यतः ॥

ततोऽसौ शिवाधिष्ठितवसन्तोत्सवपीठमन्तरान्तरा नटन्तीषु पौरवारवनितासु विष्टपेशगुरुगोपुरादन्तः प्र......द्वारमतीत्य महोन्नतकनत्कनकमयध्वजस्तम्भोपकण्ठदेशमगमयत् ।

ध्वजस्तंभे पुनः पूजां कृत्वा देवगणानसौ ।
उद्वासयामास मुदा यथास्थानं समाहितः ॥

तदानीं विरूपाक्षदेवमहोत्सवयज्ञसंपत्त्यै कृताशयोऽसाववोचादिति ।

आवाहिता देवगणाः सर्वे इन्द्रपुरोगमाः ।
यथास्थानं तु गच्छन्तु पुनरागमनाय च ॥

किंच प्रमथगणाध्यक्ष महोक्ष विरूपाक्षदेवोऽद्य निर्वर्तितमाधवनवरात्रोत्सवयागदीक्षः साक्षादेव साक्षादेव महाक्षेत्रपवित्रकाशीपुरश्रीशैलकैलासादिदूरदेशवास्तव्यभक्तजनसंरक्षणाय स्वेच्छयैव गृहीतदिव्यमंगलविग्रहः कदा वा जिगमिषुर्भवेदिति समाहितमनाः शिवलिंगमूर्तिमाभिमुख्येन निरन्तरमवलोकयन् समास्थानुमुपावरोहेति प्रार्थयन्नेव महोन्नतध्वजस्तम्भाधिरूढपटलिखितवृषभाधिराजमवरोहयामसष्ट ।

तदा सर्वे लोकाः शुभफलदसांगात्सवमहा-
क्रतुं दृष्ट्वा हृष्ट्वा हर हर महादेव सफलाः
कृतार्था एवामी वयमिति वदन्तः करतल—
द्वयं संयोज्याशु प्रमदनिनदानध्यजनयन् ॥

....रेव जनताकरतालमेलनजातशब्दैर्दूरस्थितानामपि केषांचित् महादेवमहानन्दिनो नन्दिनोऽद्य ध्वजादवरोहणं जातमिति मतिरभूत् ॥

शैवा वसन्तोत्सवपीठमीशप्रदाक्षिणावर्तनतोऽतिमन्दम ।
गत्वा विनिन्युः शुभमध्यरंगं नीराजनानन्तरमर्चकोत्तया ॥

तत्र तैरवतारिते सति पीठे भक्तजनाधिकारिपुरुषानीतफलपुष्पैः शिवपूजां विधाय निधाय च चन्द्रशेखरप्रसादकुसुमानि प्रसादितकरद्विजराजगुरुकविबुधांजलिषु सावधान एव गृहीतपार्वतीपरमेश्वरविग्रहः पंपापतिश्रीविरूपाक्षदेवमूलमूर्तिशिवलिंगाभिमुखः क्षणमात्रमवस्थितोऽभवत् ।

विरूपाक्षो देवः सपदि निजतेजोऽभिमुखतः
स्थितं दृष्ट्वा हृष्टः स्वयमपि च मूर्त्योरमुकयोः ।

अमंस्तेत्येताभ्यामहमिह महानन्दमनिशम्
समेतः पार्वत्या परमनुभवामि स्थिरतरम् ॥

अत एवाऽसौ श्रीविरूपाक्षदेवः शिवलिंगमूर्तिशिरःस्थापितनवरत्नखचितकिरीटसंगतमल्लिकाकुसुममालिकाभ्यां सुप्रसन्नः सुलक्षणयोः तपोधनवरिष्ठवसिष्ठवामदेवादिमहर्षिसमभ्यर्चितयोः निर्विघ्नमेव सकलमहोत्सवनिर्वाहकयोः पुरातनयोरनयोः शिवमूर्त्योः सर्वमंगलासहित एवास्मत्प्रियभक्ताग्रगण्यविद्यानगरीशनरपतिकल्पितनित्योत्सवादिसमोत्सवभवविनोदानुभवाय विदधामि निरंतरमेव सांनिध्यमिति प्रसादं प्रददौ ।

ततोऽर्चकः शनैर्भक्त्या नीत्वाऽन्तर्मध्यरंगतः ।
यथास्थलास्थिते पीठे शिवमूर्ती न्यवेशयत् ॥

तदैवासौ निखिलप्रपंचमातापित्रोः प्राचीनदम्पत्योः पार्वतीपरमेश्वरयोः एकान्तसेवां च परिचारकाद्विजानीतनवमल्लिकाकुसुममालिकामधुमधुरभक्ष्याज्यप्राज्यभोज्यपायसामृतोपहारसमर्पणादिराजशेखरसमुचितोपचारैस्तत्रैव विधाय विरूपाक्षदेवमाधवनवरात्रोत्सवमहायागपरिपूर्तिनिर्वाहकशिवमूर्त्योर्यथास्थलास्थितिनिरीक्षणजनितानन्दभरभरितस्वान्तनितान्तसमुज्जृंभितभक्तिभरानतपूर्वकायमहाजनांजलिषु प्रसादकुसुमानि विनिक्षिप्य सत्वरमेव बहिर्निर्गत्य सर्वानपि जनानात्माश्रयगमनायाऽनुज्ञाप्य महादेवालयद्वारपालकान् विचार्य समागतेन परपातिना सह पम्पापतिमहानुग्रहेण कृतकृत्या भवाम इति इष्टालापमाचरन् दैवज्ञाद्यवनीसुरैस्साकमेव निजागारमुपागमत् ॥

दैवज्ञाद्यवनीसुराः परपातिं तस्माद्गृहीत्वा पुनः
पंपानाथशिवप्रसादकुसुमान्यामोदमासाद्यते ।
अन्योन्याभिहितानतिप्रवचनास्सानन्दमालापिनः
स्वस्वावासमुपेत्य सारणाविधिं कृत्वाऽस्तुवन् शंकरम् ॥

तदनु त एते देवार्चकादयः सप्रिया अपि चिरविरहजनितसंभ्रमागतनिद्रांगनासंगसुखातिशयेनैव तां निशामपनीय समुन्मिषदुषःकाल एव समुत्थाय कृतप्राभातिककृत्याः पंपापतिनित्योत्सवसेवाचरणपरा बभूवुः ।

यात्रागतास्तु बहवो बहुशस्तदानीं
संभूय देवसदनांगणमेत्य तस्थुः ।
पंपेशमूर्तिमवलोक्य शिवप्रसादं
संपाद्य शीघ्रगमनाय पुरीं प्रति स्वाम् ॥

तत्र केचिन्निबिडतमजनताभरितदेवालयान्तःप्रवेष्टुमसमर्थाः चिरमवस्थाय कालविलम्बेन तपनातपः सुतीक्ष्ण एवाभवदतोऽत्र भुक्त्वाऽपराह्णसमय एव गन्तव्यमित्यवधार्य पुनः स्वावासमंडपान्यासेदुः ।

केचित्कथंचिदवलोक्य महेशमूर्तिं
संपाद्य पूजककराच्च शिवप्रसादम् ।
जग्मुस्स्वदेशमनघाः परिपूर्णकामाः
संभूय सैनिकजना इव सध्वजाश्च ॥

केचित्तु तत्रत्यस्य कस्यचित् लोभिनो विप्रस्य श्वशुरबान्धवा यात्रागताः स्वदेशगमनाय कृतप्रयाणसंनाहा अपि समाचरितभोजनैरेव जनैः क्षेत्राद्गन्तव्यमित्यातेन केनचिदुक्तमाकर्ण्य संजातप्रत्ययाः पुनस्तदावास एवावतीर्णा बभूवुः ।

तदा सोयं लोभी समुपगतरोगार्त इव त-
द्वचो वक्तुं नालं समभवदवन्यामुदपतत् ।
समीक्ष्य स्वां कान्तां सुविकृतदृशाऽसूचयदिति
त्वदीया वर्तन्ते सपदि यमदूता इव गृहे ॥

तदनु सैषा चकितहृदया सती पतिमतिविपुलजनाश्रयसदनान्तःस्थलरचितशय्यां प्रत्युपानीय तत्र शायितं विधाय तदुपकंठ एव रुदन्त्येवमवोचदात्मीयान् ।

पितर्मातर्भ्रातः ननु सपदि यूयं कथमिमं
पुनर्दैवात् स्वस्थं पतिमनवलोक्यात्मनगरीम् ।
प्रयाथास्मद्गेहे न किमपि च भोज्यं हि भवतां
स्वयं भुक्त्वा स्वीयं मयि करुणया स्थेयमधुना ॥

तदनु तद्गुरुशिष्येण केनाचिद्विशिष्यामुष्य यावदारोग्यमवश्यमेव स्थास्यामस्तावद्भयार्हार्थो भवदीय एवास्माकमस्तु केवलमित्युक्तमाकर्ण्यान्योऽपि सतीर्थ्योऽस्मदार्याणां निरतान्नदानमहोत्सवसंतोषिताखिलद्विजवर्याणां किं न्यूनमस्ति परं तु स्वस्तिमत्यस्मिन् आर्यजामातरि बान्धवरीत्या चरितोपचारिकामन्त्रेण वाग्दोषकृतार्थत्रयसमारब्धपंपारमणविरूपाक्षदेवसन्तर्पणदीयमानमेतत् प्राज्यं भक्ष्यं भोक्ष्यामह इत्यवोचत् ।

तत्सतीर्थ्योऽपरः प्राह शब्दशास्त्रविचक्षणः ।
एतम (न्मे ?) न्ये मुदा भक्ष्यं भोक्ष्यध्व इति तं प्रति ॥

ततस्तत्प्रयोगचातुरीगम्यमानः प्रहासोऽत्रानुचित इति मन्यमानोऽन्य एवमवोचत् ।

एतम (न्म ?) न्यध्व इत्येवं भक्ष्यं भोक्ष्यामहे तदा ।
यद्यनेन कृतं पंपापतिसन्तर्पणं मुदा ॥

पुनरन्योऽप्युवाच—औपचारिकवाक्प्रियबलात्कारितोपार्जितार्थव्ययाखिन्नमानसेनानेन कथंचित्क्रियमाणेऽपि पंपारमणसन्तर्पणे नास्माकमोदनमात्रमपि लभ्यं भवति नवेति संदिग्धे इति ।

अन्योऽप्येवमुवाच कश्चिदिति तच्छिष्यो हसन् केवलं
सर्वे यूयमतन्द्रिताः खलु तदा भक्ष्याशिवा (नो)ऽप्योदनम् ।
भुक्त्वा मोदमुपेत्य सत्यवचना यूयं भवेयुर्यदि
स्यादेष प्रियवाग्व्रये पटुतरो धीरश्च वीरः स्वयम् ॥

तत्रैव संशयो बाधात एनम् ।

दैवात् भूपतिरेत्य कश्चन धनं दत्वाऽथ पंपापतेः
प्रीत्यै भूसुरपूजनं कुरु मुदा भक्ष्यैश्च भोज्यैरिह ।
इत्युक्तो यदि सत्वरं प्रमुदितः सम्प्रत्यमन्दादरात्
उत्थायाऽग्रत एव वाग्व्रयकरो निस्संशयोऽयं भवेत् ॥

तथापि यावानर्थस्तदर्थलाभलोभेनैव भूसुरसमाराधनमनेन विधेयं भवति ।

तूष्णीमेव वदान्येतत् कथमागच्छति प्रभुः ।
मनोरोगापहर्ता स्यादस्य कोऽस्ति भिषग्वरः ॥

इत्येवमादीनि विनोदप्रवृत्तानि श्वशुरशिष्यवचनानि अमुष्य मार्जालचेष्टितानीव मूषकस्य प्राणसंकटकराणि बभूवुः ।

तदाऽन्योऽयं शिष्यान् गुरुरगुरुबुद्धीन् प्रहसतो
नियम्येदानीं कः समुपगतरोगार्तिसमये ।
प्रहासस्तूष्णीमित्यनुगतसुतस्तां निजसुतां
समाधायागच्छद्बहिरिह भिषङ्मार्गणकृते ॥

ततः तद्गुरुशिष्य एव कश्चित् धातुपरीक्षामपि सम्यगहं जानामीति उपसृत्योपविश्य तदीयदक्षिणहस्तमुद्धृतांगुळीन्स्पृष्ट्वा नाडीत्रयसावधानचलनपरीक्षयाऽस्य न कोऽपि दोष इति निश्चित्य चलितहृदयायाः सदयायास्तस्यास्समाधानाय कांचित्कथामकथयत् ।

पुरा कश्चिद्विप्रो विनयनगरं प्राप्य कुशली
महालोभी धीमान् कथमपि सभार्यः स्वसदनम् ।
कथंचित् निर्यातुं क्वचिदपि सदैवाखिलजनात्
धनं संपाद्यैतद्व्ययपरमचिन्ताऽभवदहो ॥

तदनु स एष नूतनागततया निखिलजनावश्यकपरगृहेष्वेवानेकहायनान्यपनीय सर्वैरपि सपत्नीकस्य बहुदिनेषु परगृहनिवासोऽनुचित इति अभिहितः 'परसदननिविष्टः को लघुत्वं न याती'ति आक्रोशवचनप्रकटितात्मगुणोऽद्य वा श्वो वाऽन्यत्र निवासप्रदेशं विचार्य गमिष्यामीति वदन्नेव चिरमवस्थाय हठान्निष्कासितःसभार्यो नगरात् बहिस्सभार्यो महादेवालयाश्रितोऽभवत् ।

तत्रापि नित्यं शिवदीपरक्षां कुर्वन्निह स्थास्य इति प्रबोध्य ।
देवार्चकं लोभिवरस्सभार्यः चक्रे निवासं तदनुज्ञयैव ॥

ततः स एष भाग्यवद्भवनेषु पयःपूर्णकुंभाहरणादिगृहकर्मकरणेन भुक्त्वाऽपि जीर्णं....गृहीत्वाऽपि च वेतनाधनमुपार्जयतु भवतीति पत्नीमाज्ञापयामास ।

तदाज्ञया सापि तथैव नित्यं विधाय पत्युर्वचनानुसारात् ।
वन्धेत (न्ध्येति)...वदन्ति मूढा मामित्यनन्तां मुहुरपि चिन्ताम् ॥

सोऽयं स्वयमपि पंचांगवृत्त्याद्यनेकैरुपायैरर्थमेव बहुलं संपाद्याऽपि सद्गृहस्थगृहेऽङ्गीकृतनित्यदेवार्चनोपाधिजग्ध्या देवालयेऽप्येकशय्यायामेव शयितायामपि पत्न्यामाशंकितगर्भधारणाभाव्यमानार्थव्ययभयेनैव निष्कामोऽपि ब्रह्मचर्याग्निष्टोमादिक्रतुशताध्ययनफलाभ्यामृणद्वयान्मुक्तावपि सन्तानहीनतया 'अपुत्रस्य गतिर्नास्ती' ति वचनादगतिकः पितृणनिर्मुक्तः कथं भवेयमिति चिन्तां दुरन्तां नितान्तमुपागमत् ।

तथाप्येतत्कान्तां न किमपि वदत्येव...
न गृह्णात्येवायं सपदि खलु ताम्बूलमपि वा ।
तयाऽऽनीतं नित्यं विजयनगरे भर्तृवचनात्
स्वयं विक्रीयाऽपि प्रियरतिकृते जातु नतया ॥

ततः सैषा स .... कृत्वाऽऽत्मगृहकृत्यान्तर्गूढार्थमूढलोकोक्त्या च सन्ततिरहितानां गतयो न सन्तीति महाजनप्रवादेन च मुष्टिपारिमितमपि वा भस्म चुल्ल्यामनिपात्य पक्षिद्वन्द्ववदन्यत्रोदरपूरणं विधाय निशामुखत एव कुलायतुलितदेवालयं प्रविष्टयोः परस्परमर्थानयनेन सुमुखयोरपि कदाचिदपरिज्ञातसांसारिकसुखयोरासन्नवृद्धावस्थयोरावयोर्जन्म निरर्थकमेवाभवादिति पतिं प्रति वक्तुमशक्त्या च स्वस्या रजोवृत्तिसमयः संनिहित इति चाऽतिखिन्नहृदया सती अनपत्यतादूयमानमानसस्य हरिवंशप्रसिद्धताचरितकैलासयात्रस्य तपःपवित्रीकृतचरित्रस्य भगवतो वासुदेवस्य मृकण्डुमुनेश्च सन्तानवरप्रदानप्रकाटिताघटितार्थघटनानुकूलसामर्थ्यसर्वतन्त्रस्वतन्त्रतानंगीकृताङ्गीकृतमन्मथमहादेवाखिलाण्डकोटिब्रह्माण्डनायकस्त्वमेव सकलप्राणिबुद्धिप्रेरको भवसि भर्तारं मयि सकामं विधेहीति कुमारजनकं पार्वतीपतिं प्रार्थयामास ।

महादेवस्स्वामी सकलजगतामात्मरमणीं
उवाचाऽयं विप्रः समुचितपदार्थव्ययभयात् ।
स्वपत्न्यां निर्मोहो भवति सुतमेतस्य तरुणी
ययाचेऽस्याः पुत्रो भवतु गिरिजे सादिततराम् (जेऽस्मादिततराम्?)॥

ततः तस्यां तथास्त्वित्यनुमोदयन्त्यां हैमवत्यां महादेवः कदाचिद् यजमानकृतसकृन्महालयश्राद्धनिमन्त्रणावाप्तमृष्टान्नमुपभुज्य रजनीषु.........गतस्य देवालयमध्यरंगस्थलशयानस्य महालोभिनः समीपवर्तिनीं पत्नीमवलोक्य स्वयं स्वयं कामारिरपि कामं काममुत्पादयामास ।

तत्काममोहितसतीमनुजग्राह भूसुरः ।
तत्रैव स महालोभी देवप्रेरणया तदा ॥

तदनु सुरतान्ते सति संजातप्रत्ययोऽयं 'प्रमादो धीमतामपी' ति प्रवादः सत्य एवेत्यभिधाय कृताषाढ्यादिपंचमापरपक्षोपभरणी दिवसपैतृकमुख्यकालयजमानगृहस्थाचारितसकृन्महालयश्राद्धभोजलस्य तृतीयसन्ध्यासमयप्रदोषघटिकात्रय मध्यएव दुरदृष्टोत्पादितकामान्धकारपटलाच्छादितनेत्रस्य देवालयमध्यरंगस्थलेऽपि शिवलिंगमूर्तिमपश्यतो मम कामं कामकृत्याचरणपरत्वमवलोक्य लज्जया स्तम्भान्त........ प्रेतां दर्शयन् बलात् परिग्राहयन् अज्ञानाद्ज्ञानदीपनिवारकः कियान् विमोहमहावायुरागत इत्यतिविस्मितमानसोऽन्तर्वत्नीं पत्नीं दूरतो गच्छेत्यवधूय तस्या गर्भधारणशंकयैव निर्निद्रस्तां निशामनैषीत् ।

प्रभाते जातेऽयं विमलवदनामात्मगृहिणीं
समीक्ष्यान्तर्वत्नी किमु भवति पत्नीति मनसा ।
विचार्यैतद्गर्भाकलितनिजरेतः स्खलनकृत्
जलं मन्त्रैस्तीक्ष्णौषधमपि तया पीतमकरोत् ॥

तथापि जगज्जन्मादिकारणहिरण्यगर्भादिजनकमहादेवसंकल्पात् जरायुकवचाच्छादितं तद्दिने दिने घनीभूय पिण्डाकृति सावयवं सदस्यां समवर्धत ।

गत्वाऽऽगत्य महीसुरस्तत इतो लोभी स्वभार्योदरं
दृष्ट्वाऽन्तर्गतपिण्डवर्धनमयं ज्ञात्वा [स पा] पातकः ।
तद्भंगाय समुद्यतः पुनरहो तूष्णीं स्वयं कोपितः
तस्यां पादहतिं विधाय सहसा चक्रेऽथ गर्भव्यथाम् ॥

ततस्तद्व्यथाजनितवेदना....नं सचेतनमपि निश्चेतनमिव क्षणमात्रमेव निश्चलं पिंडमुद्वहन्त्यां रुदन्त्यां तस्यां ' निर्भया भव तनयस्तव भविताऽधिकःस्वापेक्षया गुणैरायुष्मानि'त्यशरीरवागासीत् ॥

श्रुत्वा तां सुतलाभलोभजनितानन्दाद्विधूय व्यथां
सैषात्मेशसमीरिता मुहुरिति तं गर्भिणी सत्वरम् ।
एकस्मादपि संगमात्कथमहो जातासि स यं वद
प्रौढेवावददित्यतीव मुदिता वीर्यादमोघात्तव ॥

तदनु सोयं महालोभी गरीयसी केवलमीश्वरेच्छेति सर्वथैवापरिहार्योऽयमर्थस्संपन्न इति निश्चित्य यदि क्रयणार्हं स्त्र्यपत्यमेव भवेत् तदैव मम वीर्यममोघमिति मन्य इति पत्नीमवोचत् ।

ततः सेयं प्रीत्या वचनमवददेव तनयो
यदि स्यात्किं न्यूनं भवति तव कार्येषु कुशलः ।
स्वयं सर्वोपायैरधिकधनसंपादनपरः
परं लोभी व र्थव्ययभययुतोऽस्मद्गतिरिति ॥

ततः .... वोचदेवं प्रिये सत्यमेवोक्तं त्वयाऽस्माकमेकोऽपि तादृशः सुपुत्रः कुलदीपकः कथं भवेन्मंदभाग्यानामसाधुना विधिना मदीयार्थव्ययः कारयितव्य इति .... येकलोकानुसारी कुमारस्त्वदुदरे निपातितः स्यात् ।

अन्यथा मम मतिस्त्वयि कान्ते भ्रष्टतामुपगता कथमेवम् ।
सर्वथैव विमुखापरपक्षे ता...मुखत एव भरण्याम् ॥

ततस्त्वत एव 'यथा बीजस्तथांकर' इति न्यायादशरीरवचनाच्च तादृश एव भवेत्कुमार इति पत्न्या समीरितं काचोद्यवचनमाकर्ण्याऽपि स एषः स्वाभिलषितार्थकथनादजातकोपः प्रायशस्स्त्रीणां मतिरेव विवेकवतीत्यभिधाय सत्यमस्तु वचस्तवेति पुनस्तामेतामवोचत् ।

तथाप्यसौ पार्वति देवि कन्यां प्रदेहि दुर्गेति तवैव नाम्ना ।
समाह्वयिष्यामि धनाप्तये तां दास्यामि कस्मैचिदपीत्युवाच ॥

सेयं पत्या सहैवमिष्टालापसन्तोषिता सती दिनक्रमेऽपि नवमासातिक्रमेऽपि तदाज्ञयैव परकीयगृहकर्म विधाय जाग्धिमकरोत् ।

सैषाऽसूत सती द्विजस्य दशमे मास्याद्यपक्षे सुतं
कृष्णानंगदिने यमर्क्षसहिते वारे च सौरेः परम् ॥
आकारेण पितुः प्रदोषसमये तत्रैव देवालये
नैर्ऋत्यस्थलगा त्रपावृतिरनायासेन दैवाद्द्रुतम् ॥

सोऽयं तदानीमेव ...... स्नातो जातस्य शिशोर्मन्त्रावृत्यैव जातकर्म विधाय भरणीचतुर्थचरणजात इति जन्मत एव लोभी स्वतः परवांश्च भूयादयमिति विचार्य व्यवहारतः परमलोभीति नामकरणमेकादशेऽहनि स्वयमेव पुण्याहं पठित्वाऽऽशिषः प्रयुज्य विदधे ।

ततस्तदारभ्य पतेर्नियोगात् भूयोऽप्यनाथेव शिशुं गृहीत्वा ।
सेयं नगर्यां प्रतिसद्म तैलं वस्त्रं ययाचे जलमुष्णमन्नम् ॥

ततः केषुचिद्दिनेषु गतेष्वनिर्गतेऽपि मासे वेतनमर्थमुपार्जयतु भवतीति तेनादिष्टेयमीषदुपागतकरचरणशक्तिरपि सुतलाभलोभसन्तुष्टमानसाऽविर्भूतभर्तृचरणप्रेमातिशयेन पतिवाक्योल्लंघनमनुचितं खलु कुलस्त्रीणामिति मन्यमाना सती स्वगमनं यत्र तत्रैव शय्यायां तनयं विनिपात्य कथंचित् परकीयगृहकर्म कर्तुमुद्युक्ताऽभवत् ।

अयं सर्वोपायैः स्वयमुपचितं नित्यमधिकं
समानीतं पत्या धनमवनिमध्यस्थमकरोत् ॥
तथाप्येषः स्वस्थः सपदि न बभूवेति मनसा
विचार्यैतद्द्रव्यं कथमिह मया रक्ष्यमधुना ॥

ततोऽयं परगृह एवात्मतनयस्यान्नप्राशनादिचूडाकर्म विधाय द्वादशवर्षपर्यन्तमनुपनीतेन तेन सह सप्तसन्तानान्तर्गतब्राह्मण्यसंस्थापनादनन्तपुण्यमायात्यस्योपनयनं कारयतेति वदन्ननेकभाग्यवज्जनादर्थं संपाद्य देवालये इतराज्ञातसुमुहूर्तसमये मन्त्रावृत्यैव समनुष्ठित.......सति कर्मसंस्कारेण लब्ध-

द्विजत्वसूचकयज्ञोपवीतसूत्रकधरं कुमारं निश्शंकाभिक्षाधिकारिणं कृत्वा स्वेन सहैव संचारयन्नेनं निजाविद्यामध्यापयामास ॥

ततः प्रभृति सोऽन्वहं परमलोभिभट्टाभिधो
यथार्थ इति केवलं पितुरपि प्रलोभाधिकः ।
वदत्यखिलसज्जने धनमुपार्जयन् सर्वतः
कदाचिदवदन्मुदा पितरमेवमत्यादरात् ॥

आर्य ! वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः ।
अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत् ॥

इति मनुवचनानुसारेण भवद्द्वयमेतावन्तं कालमनुपालितोऽहमितः प्रभृति कथंचिदर्थं सम्पाद्य भवत्परिपालनं विदधामि युवाभ्यां सुखेन स्थातव्यमत्रेति ।

ततः पिता वाचमुवाच पुत्रं संपाद्य लोकात्सकलैरुपायैः ।
धनं करे दत्तमरे ममैवं यदि त्वया वंचनया विनैव ॥

तदैव खल्वावां भवता संरक्षितप्रायौ भवावः ।

यावच्छरीरपतनं मम तावदत्र
लोके परान्नरुचिरेव ततो न वेद्मि ।
किं वा भवेत्कथमिति त्वयि पुत्र....
भक्त्या कृते सपदि मे वचनं च रक्ष ।

तस्यास्संरक्षणमपि मद्गमनानन्तरमेव भवति भवतेति ।

ततः पुत्रो भक्त्या वचनमवदत्सत्यमधुना
त्वयोक्तं श्रुत्वाऽहं परममुदितोऽर्थव्ययभयात् ।
परित्रातोऽस्मीति त्वयि सकलमर्थं दृढतरं
दिशामि श्रीपंपापतिचरणसाक्ष्यत्र नितराम् ॥

इत्येवमिष्टालापसंतोषितौ पतिपुत्रावालोक्य मुदितान्तरङ्गापि सेयमयं तनयः त्रिंशद्वार्षिकोऽप्यकृतविवाह एव आवां त्वातिवृद्धौ भवावेति पतिं प्रति-

वक्तुमशक्त्या तव सुतो नित्यब्रह्मचारीति लोकोक्त्या निरंतरसंन्निहिताभ्यां नितान्तचिन्तात्रपाभ्यां धार्यमाणशिरोऽधिरूढजराभरानतपूर्वशरीरा सती बहु दिनेषु गतेषु कदाचित्सन्तोषसमयं प्रतीक्ष्य महालोभिनं व्यजिज्ञपदेवम् ।

नाथ त्वं जरया युतोऽहमधुना वृद्धाऽस्मि किं जीवितं
तिष्ठत्येव चिरं परंतु भवता नाऽद्याऽपि वैवाहिकीम् ।
दीक्षां वत्स इहात्मसन्ततिकृते संप्रापितोऽभूद्यतः
तस्मान्मां प्रहसन्ति पौरवनिताः श्वश्रूस्त्वमस्या इति ॥

तदनु स एषोऽत एव भवत्यां युवत्यामपि विरक्त एव चिरमवस्थाय देव-प्रेरितबुद्धिप्रमादेन परिभ्रष्टतां गतोऽप्यपरिहार्योऽयमर्थः सम्पन्न इति निश्चित्य कुमारोऽर्थव्ययकारीति मत्वा व्ययपत्यमेव देहीति संप्रार्थितायामपि भगवत्यां पार्वत्यां मदीयदुरदृष्टसहायेन महादेवेन कुचोद्यकारिणा पुत्रो दत्त इत्यतिखिन्नमानसोऽभवत् ॥

तदा सैषा तूष्णीमभवदथ भूयो बुहुतरे
गते काले तुष्टं पतिमवदादित्येव कुशलम् ।
कथंचित्कर्तव्यं भवति ननु वैवाहिकशुभम्
सुतस्येति श्रुत्वा पुनरिति जगादात्मगृहिणीम् ॥

अये भूयो भूयः किमुच्यते न जानामि किमहं परन्तु विवादश्च विवाहश्च समयोरेव शोभत इति न्यायात्समानैरेव बन्धुसरणिरादरणीया भवतीह भूमण्डले कोऽपि मत्समान एव नास्ति केचिद्द्विजाः स्वोपार्जितार्थव्ययेण निबद्धगृह-वासिनः केचित् परसदननिविष्टा अपि स्वकीयाशनघातकाः केचिद्दरिद्रा अपि दम्भेन सुवस्त्रालंकारधारिणो दानपराश्च केचित्परार्थमर्थलोभिनोऽपि स्वार्थम-नुचितव्ययपराः किंबहुनाऽऽत्मार्थमुचितव्ययविमुखाः परान्ननिरता अपि स्वार्जित-तांबूलचर्वणमपि वा चरन्त्येवेति सर्वेऽपि दीनवृत्त्याऽसमन्निकृष्टा एव ।

ततस्तयोक्तं पुनरित्यहो किं भवादृशः कोऽपि न वर्तते ता (वा?) ।
विचारिते भूवलये लभेथाः तत्तादृशं सत्वरमेव गच्छ ॥

ततोऽयं सुदिनं विचार्य गमिष्यामीति वदन्नेव चिरमवस्थाय भूयोऽपि बहुषु दिनेषु गतेषु शुभस्य च शीघ्रमशुभस्य कालहरणं कर्तव्यमिति पत्नीरितं वचनमाकर्ण्य सत्यमेवोक्तमित्यभिधाय गृहीतसूक्ष्मधानापिष्टमयभास्करभक्ष्य-पाथेयः कन्यार्थी सन् भूसंचारपरोऽभवत् ।

क्वचिद्गत्वा ग्रामान् जनपदचयं चात्र निखिलान्
द्विजान् दृष्ट्वा तत्तद्विपुलसदनस्थान् सुवसनान् ।
स्वलंकारान् कांश्चित् सपदि वरशाल्योदनभुजः
तथा [सौ] ताम्बूलं चरत इति चिन्तामभजत ॥

सर्वेऽप्येतेऽल्पधनमत्ता मत्त एव हीना अप्यहीना इव स्वार्थप्रियशीलाः कदाचित्परार्थमपि पदार्थत्रयमाचरिष्यन्त्येवेत्य संभाषणीया अनवलोकनीया एव ।

किं कर्तव्यं क्व देशे मम सदृशजनाः सन्ति सम्बन्धयोग्याः
ग्रामं त्यक्त्वा दिनानां सपदि खलु मया [सप्त]कं नीतमेव ।
व्यर्थं गत्वाऽधुना वा पुनरपि च कथं गन्तुमुत्साह ईशो
दुर्बुद्धिं मां विधाय स्मरपरवशगं त्रावयत्येवमेव ॥

किंचात्र मध्याह्नेऽपि नगर [पुरग्रा]मजनपदा न दृष्टिगोचरा भवन्ति ब्राह्मणनिवासानुचितपल्लीसमुदाय एव पुरः स्थित इति पाथेयव्ययो भवति ।

मध्याह्नात्परतोऽप्ययं जनपदं गच्छन् पुरा किं मया
दुष्कर्माऽऽचरितं यतोऽहमभवं कामातुरस्तत्सुखम् ।
सम्प्राप्यानुऽभवामि कष्टमधुना तत्कर्म जातं बलात्
इत्यूचे तपनातपाग्निशिखया सन्तप्तगात्रस्तदा ॥

तदनु पुनरयं कथंचिदागमनप्रयोजनमकृत्वैव कथं परावृत्य गन्तव्य-मिति नितान्तचिन्तयाऽधोमुखः शनैः शनैर्गच्छन् प्रायः सुकृतिनां महादेवो याति सहायतामिति दैवादवबुध्य भो देवा मम कार्यसिद्धिर्यथा भवेत् तथैव द्वादशनमस्कारान् वः प्रत्येकं विदधामीति महादेवादिदेवान प्रार्थयामास ।

ततः प्रोवाचाऽहं शिव भव महादेव गिरिजा-
पते पम्पानाथ त्वमिह शरणं मे घटयत ।
य एतस्मिन् लोके भवति मम तुल्योऽवनिसुरो
प (व) रार्थी का...क्वचिदपि च गत्वाऽऽगत इति ॥

सोऽयं मार्गपरिश्रांतोऽपि गच्छन्नेव नातिदूरतः पुरःसरन्तीं कांचित् सरितमपश्यत् ।

पिपासया तूर्णमवाप तस्यास्तीरं तरुच्छायपिनद्धदेशम् ।
वीचिच्छटान्दोलनमन्दवायुप्रबोधितांबुस्थलपद्मरम्यम् ।

तत्र क्षणमात्रं विश्रान्तिसुखमनुभूयाऽयं त्वरितमाचरितसंध्यादिनित्य-नैमित्तिकसत्कर्माऽधिकफलप्रदमहादेवशिवलिंगार्चनः स्वग्रन्थिवचनान्निष्कासितभक्ष्यसंक्षालनोदकं पात्वाऽतितृप्त इव सुखासीनस्तीरगतं कंचिद्द्विजं पाथेयमुपरि प्रदर्श्य प्रतिबिम्बोपाधिभूतजलं पिबन्तमपश्यत् ।

दृष्ट्वा तं मुदितोऽभवत्पुनरयं मत्तोऽधिकोऽयं द्विजः
दैवादद्य समीक्षितः चिरतरात्कालान्मयैतद्धनम् ।
इष्टाप्तेः सुदिनं बभूव नितरां किंत्वस्य कन्याऽस्ति वा
नो वा ज्ञातिसगोत्रजः किमु भवेदित्यास (प ?) चिन्तां तदा ॥

स तु निजपुत्र्या वरवरार्थी सन् समागतोऽप्येनं भक्ष्यसंक्षालनावाप्तपिष्टपरागलेशोदकं पिबन्तमवलोक्य स्वार्थत्रयकारिणं मतो (मत्वा) कथंचिदसंभाष्य एवायमिति तूष्णीमेव स्थितोऽभवत् ॥

ततस्तं प्रत्यूचे वचनमिति मत्वेव कुशली
महालोभी विद्वन्नतिरियमुदाराऽस्तु भवते ।
भवान् कस्माद्देशात् किमिह समुपागच्छदधुना
नमस्कारस्स्वामिन्निति तदनु सोऽप्याह मतिमान् ॥

ततोऽनेन प्रश्नद्वयस्योत्तरं न दत्तमित्युक्तो निजप्रयोजनाय नदीमुत्तीर्य गच्छन् क्षणमात्रमवस्थाय भवानेवाग्रे कथयतु किं नाम कस्मान्नगरादिहाऽऽगमनं किं निमित्तं भवतो भवतीत्येनमपृच्छत् ।

अयं प्राह प्रीत्या तत इति वचः श्राव्यमधुना
महालोभी नाम्ना विजयनगरादागत इह ।
परं पत्नीबाधात्प्रतिदिनमुपादानरहितः
सुतार्थं कन्यार्थी कथयतु भवान् वृत्तमखिलम् ॥

तदनु सोऽप्यवोचत्—अहमतिलोभिनामा कौंडिण्यसगोत्रजो विद्वानपि बुद्धिप्रमादेन समुत्पादितकन्यकः समुचितवरार्थी सन् गौडदेशस्थितराधानगरादुपागतोऽस्मि ।

तर्ह्येवं मम सूनवे तव सुता देया त्वया धीमते
मत्तोऽर्थार्जनसंग्रहादिषु परं जन्मर्क्षनाम्ना स्वतः ।
लोभी यो व्यवहारतश्च परमो दैन्यस्वभावःसदा
तस्मै कौशिकगोत्रजाय वचसा दत्तेति निश्चीयताम् ॥

स चाऽसौ मदीयतनयः कदाचित्प्रवासे बलाद्ग्राहितपाथेयग्रन्थिमात्रिरतस्यैव तत्प्रतिबिम्बाश्रयमुदकमर्थानुसारिजीवननामधेयं मन्यमानः प्रीत्या कृतकार्यः सत्वरमायातीत्यभिदधानं महालोभिनमतिलोभी तर्हि तव तनयाय मत्सुता दत्तप्रायैवेति वाङ्निश्चयं कृत्वाऽस्मदधीनमेव न क्षत्रानुकूल्यं सुमुहूर्तमात्रं विचारयेत्यवोचत् ।

अयं तं प्रत्यूचे वचनमिति पुत्र्यास्तव गुणाः
मयाऽपि श्रोतव्याः स तत इति चोवाच मतिमान् ।
मदीया कन्याऽसौ शिशुरपि पिबत्यात्मजननी-
धनस्तन्यं नैव त्रयभययुतात्यन्तमधिकम् ॥

तर्ह्यस्मत्तनयानुकूलिनी कन्येयमित्यतिसंभ्रमेण तमेवमवोचदयम् ।

परिग्राह्या कन्या भवति मम पुत्राय सुधिये
त्वया देयं किं तद्वद तदनु सोऽप्याह कुशली ।
मदीयायाः पुत्र्याः किमपि वसन भूषणमहो
न देयं युष्माभिस्सपदि तु वरायाऽपि च मया ॥

किंचान्नव्ययो मदीय इति न्यायोऽपि कष्टार्जितार्थव्ययासहिष्णुना मया कर्तुं कारयितुमपि वाऽशक्य एवेति युष्मदीयं युष्माभिरस्मदीयमस्माऽभिरेव भोक्तव्यमिति ।

लोकास्तर्हि समीक्ष्य कौतुकमिदं वैवाहिकं मंगलं
सर्वत्र प्रहसेयुरेव नितरामित्याह लोभी महान् ।
एवं चेदिह कानने वरसरित्तीरे करिष्यावहे
तद्वैवाहिककृत्यमित्यतिमुदाऽवोचन्स विप्रस्तदा ।।

अयं त्वेवमुवाच — समुचितमालोचितं त्वयाऽत्र नगरग्रामजनपदान् विहाय सूक्ष्मपल्लयामपि क्रियमाणे विवाहे कौतुकनिरीक्षणाय स्वत एव समागतानां तत्रत्यनारीजनानां तात्कालिकपरितोषाय हरिद्राकुंकुमतांबूलव्ययः कर्तव्यो भवतेति ।

किं चोपकारोऽपि महानिहैव वैवाहिकं मंगलमाचरत्सु ।
अस्मासु वाद्यध्वनयोः भवेयुः श्राव्या मयूरादिशकुंतनादाः ।।

अपि चाऽत्र वधूवरयोः परस्परमक्षतारोपणाय वंशतण्डुलाःफलपुष्प ....

नात्र ।

अरण्यकाः पुनरिहैव हि सन्ति पुण्यगन्धास्समस्तशुभकर्मसुसाधनानि ।
पात्राणि चूतविटपस्य च किंशुकादियागीयकावनिरुहां समिधःकुशाश्च ।।

किं बहुनाऽम्बुजपलाशकिंशुककेतकीकुसुमरजांस्येव हरिद्राकुंकुमसुगंधिचूर्णद्रव्याणि वटपलाशान्येव पूगफलान्यारण्यमरीचिलतापत्राण्येव नागवल्लीदलानि भवन्ति ।।

भोक्तुं वा वनजातकन्दकदलीमध्वामलक्यादिक-
श्रेष्ठोर्वीरुहजानि सन्ति सन्ति हि फलान्यत्राऽतिलोभिन्नहो ।
पौरोहीत्यमहं करोमि ननु ते कन्याप्रदानावधि
त्वं जामातुरपीह तत्कुरु ततो देयं न ते मेऽपि च ।।

तदनु तेनातिलोभिना तथास्त्वित्यनुमोदिते सति स्ववचनेऽयं महालोभी स्वयमेव दैवज्ञो विचार्य निजपुत्रस्य जन्मव्यवहारानुकूलोभयनाम्न्याः

तत्कन्यायाः पुंसोऽनुकूलनामानि स्त्रीणां विधेयानीति मत्वा तदैव तामाशाभिधां विधाय वधूवरयोर्नक्षत्रानुकूल्यं संघटय्य माधवशुद्धानंगादिने कुंभलग्न एव सुमुहूर्त इति निश्चित्य तत्पूर्वदिवस एवाऽत्र समागत्य तिष्ठामो यूयं वयमपि पौरजानपदजनाज्ञातमेव समागच्छेति तमेनमवोचत् ।

तस्मिन्नोमिति गच्छति स्वनगरं लोभी महानादरात्
भूयोऽप्येवमुवाच बन्धुसरणौ नैवोपचारक्रमः ।
सौहार्दं यदि नो तदैव नितरामन्योन्यसंमान्यता
लोके दृश्यत एव तन्मयि सदा स्थेया त्वदीया दया ॥

तदनु तेन मयैव वक्तव्यार्थस्त्वयोक्तस्तथापि श्रोतव्यमिदम् ।

दैवात्संजातसौहार्दे कार्य निर्वाहके जने ।
समर्पितात्मभाराणां वक्तव्यं किमु विद्यते ॥

अतः सत्वरमुभयकार्यसाधनपरो भवेत्यभिधाय दृष्टिपथमतीत्य गते सत्ययमपि निजनगरमार्गगतोऽभवत् ।

अयं कतिपयैर्दिनैरगमदात्मदेवालयं
तदागतवती सती पतिमुखारविन्दं मुदा ।
त्रसन्नमवलोक्य सा मनसि केवलं प्रेमतो
द्रुत जलमुपानयत्तदनु वाचमूचे मुदा ॥

मया त्वदीयाज्ञया वेतनयाधिकार्थोपार्जनायानेकभाग्यवद्गृहकर्मकरणव्यासंगादेतादृशावसरोपयुक्तसक्तुसंग्रहो न कृत इति ।

अयं पत्नीमूचे मम परमतृप्तिः सपदि तत्
यतो दृष्टोऽदृष्टात्पथि मदतिलोभी द्विजवरः ।
वरार्थी कन्यायाः स्वयमुपगतः किंच सरितः
तटे कन्यादानं दृढमतनुतात्मीयवचसा ॥

प्रिये त्वमितः प्रभृति भाग्यवद्गृहस्थदारान् वत्सीविवाहार्थमुपयाचस्वेति ।

तदागतं पुत्रमवेक्ष्य लोभी महानुवाचैवमतन्द्रितात्मा ।
वृत्तान्तमेतत्प्रतिबोध्य सर्वं त्वमेतदर्थं धनमार्जयाऽऽसु ॥

अहमपि चिरकालाश्रितविशेषकार्योपयुक्तगृहस्थसमुदायादर्थमुपाहरामि ।

पादौ प्रक्षाल्य विप्रोऽयं गत्वान्तर्देवसन्निधिम् ।
कृत्वा नतीर्द्वादशैव जलमात्रं पपौ ततः ॥

सदैव समुत्थाय पुत्रस्य विवाहं करोमि किमपि वा प्रयच्छेत्यभिमुखागतान् प्रतिवदन् पुरतो गृहस्थानुपागमत् ।

लग्नं संनिहितं भवत्यपि धनं देयं च कन्यापितुः
वस्त्रालंकृतयः सभाग्यकलिता नेयाश्च दूरास्थिताः ।
आनेयाश्च तदीयबान्धवजना अन्नत्रयोऽप्यादरात्
कर्तव्यस्तु मयेत्ययं तु बहुधाऽवोचद्गृहस्थान्प्रति ॥

एतत्सती तु गृहस्थदारान् प्रती एवमवोचत् ।

दैवात् कश्चन पुण्यवान् निजसुतां वत्साय नूनं मुदा
दास्यामीति वचोऽवदत् दृढतरं दक्षो न कोऽप्यस्ति तः ।
वृद्धो मे पतिरेष तु प्रतिदिनं संचारजीर्णोऽधुना
जानीते न किमप्यतीव जरया पश्चात्पुरस्तादपि ॥

वत्सस्तु कदाप्यकृतप्रयोजनतया मुग्धतया च यं कंचित् किंचिदपि याचितुमसमर्थोऽपि बलात् कथंचिदात्मोदरपूर्तिमात्रं विदधाति ।

पुत्रस्तु वृद्धौ पितरौ मदीयौ न ज्ञातयो बन्धुजनाश्च सन्ति ।
जाने न किं चिद्धनमेव नास्ति कथं भवेत्संप्रति मे विवाहः ॥

अतश्चिरकालाश्रितं महालोभिभट्टमवलोक्य मम विवाहयत्नो भवद्भिर्विधेयो भवतीत्यभिधाय भाग्यवज्जनाद् बहुधनं सम्पाद्य कस्माच्चित् दरिद्रादपि गृहस्थात् मंगळसूत्रसुवर्णमपि वा देयमिति कथं चित् वराहमुद्रितकनकखण्डार्धशकलं जग्राहैव ॥

अयं तु संपादितमर्थजातं पत्न्याऽहृतं चात्मसुतार्जितं च ।
एकत्र संस्थाप्य पुनर्ययाचे वस्त्रं सचित्रं परमं दुकूलम् ॥

तदनु केनचित् वदान्येन धन्येन दत्तं तदन्यत्र विक्रीय तन्मूल्यधनलाभ-संन्तोषितचित्तोऽपि कंचिद्दरिद्रं वस्त्रयुग्ममयाचयत् ॥

तद्दत्तं तदपीह कस्यचिदहो विक्रीय मूल्यं धनं ।
लब्ध्वाऽयं सहसा जगाम सरितस्तीरं तदन्यादृशम् ।
सोऽप्यागच्छदिदं तथैवमुदितः पुत्र्या च पत्न्या युतः ।
तावेतौ मिलितौ परस्परमहो संबंधिनावूचतुः ॥

अहमिह विवाहमण्डपदेवताप्रतिष्ठापनायाहो महालोभिन् पृथगेव मया पर्णशाला निबध्यते ।

त्वयाऽतिलोभिन्नुचितं खलूक्तं मयापि चात्रैव पृथुङ्निवासः ।
निबध्य शालां प्रयतेऽस्मदीयपुण्याहनान्दीकुलदेवतार्थम् ॥

किन्तु समीपत एव भवदीयपर्णशाला निबध्यतामिति ।

तथैव चक्रे निजपर्णशालां कन्याप्रदाताऽस्य निवासदेशात् ।
पुरः पुरा यन्तु ततः स्वकीयं ततान सद्माकृतिकायमानम् ॥

तत एतौ चूतपल्लवैः रचिताभिः शुभसूचिकाभिस्तोरणमालिकाभिः स्वस्वशालां परिवेष्टयामासुः ।

ततोऽयमिह सत्वरं निजसतीसुताभ्यां सह
स्थलं विमलमादरात् जलनिषेचनेन स्वयम् ।
विधाय मधुपिष्टतः परममंगळस्नानकं
चचार परया मुदाऽवनिसुरः सरिद्वारिणि ॥

ततोऽयं यजमानोऽपि स्वयमध्वर्युरिव स्वपुरोहितो भूत्वा सत्वरमात्मीय-कायमानस्थलीमासाद्य पत्न्या सहास्य कुमारस्य विवाहाख्यकर्मणः पुण्याह-वाचननान्दीश्राद्धकुलदेवताप्रतिष्ठापनादिकमाभ्युदायिकं कर्म तत्तन्मन्त्रपठनेन फलपुष्पैरकरोत् ।

ततः पुत्रेण मन्त्राणामावृत्य स्नातकादिकं ।
त्वरितं कारयामास महालोभी विचक्षणः ॥

तदनु सोऽप्यतिलोभी विधिवदाचरितमांगलिकस्नानः पत्न्या सह कुमार्या विवाहांगभूतमाभ्युदायिकं कर्म सकलं विधाय सकुटुम्ब एत्र गच्छेदिति वचनेन जामातुः काशीयात्रां न्यवारयत् ।

ततः कुंभलग्नेऽतिलोभी द्विजोऽसौ समानीय जामातरं मंत्रघोषैः ।
पितृभ्यां सहात्मीयसत्पर्णशालां विधातुं समर्चाममंस्ताऽतिभक्त्या ॥

तदनु स एवागतं वरं मधुपर्केण पूजयिष्य इति संकल्प्य तत्तन्मन्त्रोपचारणेनैव सर्वं विधाय विधिवत् कन्यादानमकरोत् ।

ततः परमलोभिनाऽभिहितमेवमत्यादरात्
समस्तमधुना त्वया श्वशुरदेयमश्वादिकम् ।
धनं बहु तवास्म्यहं सकलदानपात्रं यतः
स एवमवदत्ततो भवति सर्वमेषा तव ॥

ततस्सुमुहूर्ते महालोभी वधूं विलोक्यावाभ्यां कर्माणि कर्तव्यानीत्यभिधाय पुरोहितभूतश्वशुरोक्तमन्त्रपठनेनैव स्थालीपाकान्तं कर्म विधाय वध्वा सह वसिष्ठपत्नीमरुन्धतीमभिवाद्य च पर्णशालान्तः श्वश्रूदत्तफलाहारमकरोत् ।

अतिलोभी स्वयं जाग्रदग्निसंरक्षणं मुदा ।
चकारान्ये तु तत्रैव निद्रयाऽपातयन्निशाम् ॥

ततः सर्वेष्वपि समुत्थितेषु कृतप्राभातिकक्रियासु सत्वरमतिलोभी पंकजादि कुसुमरजःपुंजरंजनात्तहरिद्रास्नानकुंकुमगन्धांगरागाभ्यां शुककोकिलादिशकुन्तकुलेषु मंगलतूर्यनिस्वनायमानकलकलालापमातन्वत्सु मन्त्रपाठेन प्रातरौपासनं कारयित्वा महालोभिना सह विवाहवेदिकामध्यासयामास ।

शिवस्तत्राऽऽगन्तुकृतमतिरुवाचाद्रितनयां
महालोभी विप्रो निजसुतविवाहं वनभुवि ।

सरित्तीरे कान्ते तनुत इति पार्वत्यपि तदा
मुदाऽवोचदेवं तदिह शिव पश्याव इति तम् ॥

तदनु स एष महादेवोऽपि निजकान्तावचनगौरवात् तदवलोकन-कौतुकः सन् शंकरभट्टाभिधो वृद्धद्विजोऽहं भवामि भवत्यपि भवानी नाम्ना वृद्धसुवासिनी भवेत्यभिधाय तया सह महालोभितनयविवाहशालामुपागमत् ।

कन्यापिताऽसावतिलोभिनामा तौ दूरतो वीक्ष्य भयं प्रपन्नः ।
प्राबोधयत्सत्वरमेव तत्र सुप्तं महालोभिनमाह चैवम् ॥

अहो महालोभिन् समागच्छन्तावेतौ सिंहशार्दूलावुतभल्लूकौ किमुत-राक्षसौ वधूमानुषावेव चौरौ स्त्रीपुरुषाविव स्थितौ कौ भवेताम् ॥

महालोभी विप्रो निपुणतरमालोक्य वचनं
जगादेति क्षोणीविबुध इह पत्न्या सह शनैः ।
समागच्छत्यस्मन्निवसतिमटव्यामपि कथं ।
द्विजोऽबोधि क्षिप्रं त्वनु सपदि गन्तव्यमुचितम् ।

अथवाऽस्मदागमनसमयो दुर्मुहूर्तोऽत्र प्रवेशकालो वा विवाहलग्नो वा वत्सयोर्नक्षत्रानुकूल्यघटनादोषेण वाऽस्मदीयदुरदृष्टसहायेन कुचोद्यकारिणा केनचिदुक्तमेव स्यादिति चिकित्सां प्राप्य कथंचिदानीतधैर्यो मूर्छागत-मतिलोभिनमहमेवातिकष्टार्जितपरद्रव्यदुराशासिद्धदुरात्मयाचकमेनं वृद्धब्राह्मणं समादधामीति समाश्वासवचनेन लब्धसंज्ञं विधाय वधूवरयोर्दीर्घमायुर्भूयादिति शंकरभट्टारकाभिधोऽहमतिवृद्धोऽपि पत्न्या सह युष्मदीयवैवाहिकभक्ष्याणि भक्षयित्वा दक्षिणया संभावितो भूयासमित्याशया शनैः शनैरागतोऽस्मीति वदन्तमागच्छन्तमवनीसुरमवोचदेवम् ।

भो ब्रह्मन् किमिहास्ति ते व्रज पुरस्त्यक्त्वाऽयनं दूरतः
शार्दूलादिसमन्वितेऽत्र गहने पत्न्या सहाऽऽगच्छसि ।
अस्माकं न कुतोऽपि वा भयमभूत् किं त्वद्य भीता वयं
दृष्ट्वा त्वामतिवृद्धतानतचलद्देहं महा याचकम् ॥

तदनु शंकरभट्टोऽप्यवोचन्महालोभिनामेव भयंकरो भवति याचक इति ।

ततोऽसाववोचत् त्वया वक्तुमेवं निमित्तं किमित्याह भूयोऽयमित्थम् ।
विवाहं सुतस्याऽत्र कृत्वाऽतिथिं मां द्विजं गच्छ गच्छेत्यवोचःकिमर्थम् ॥

तदनु पुनरवोचदसावप्येवमेवमेव भवेद्भवतु नाम अतः किं जातं जातमेव सत्यमहं महालोभिनामा भवादृशदुरात्मयाचकभयादेव नगरग्रामजनपदपल्या-रामप्रदेशान् विहाय मत्समानातिलोभिनः कन्यां गृहीत्वा ज्ञातनयस्य तनयस्य महारण्येऽपि विवाहं करोमि न किंचिदपि ददामि किं करोषि गच्छ गच्छेतः ।

ततः शंकरभट्टोऽयं प्रत्युवाच कृतांजलिः ।
दानं दातृवशं यस्मात्किं कुर्या याचकस्तव ॥

परन्तु यावन्नददासि तावदत्रैव शयित्वा निवसामीति ।

असाविति ततः परं वचनमा महान्
अवश्यमिह संस्थितो भव भवादृशः कोपि न ।
वयं त्वनशनाभिधव्रतपरायणाः सम्प्रति
व्रजाशु नगरीं यतो भवसि वृद्धपत्न्या सह ॥

ततोऽस्मिन् शंकरभट्टे निजांगवस्त्रकलितशय्यायां पत्न्या सह शयिते सति महालोभी पुनरेवमवोचदिति ।

वथासाहित्वोपवसस्य हो महीसुरोत्तमास्माकमिहास्ति किं वने ।
पुरीं समागच्छ पुनर्व्रजाधुना ददामि किंचित्कथमप्युपार्जितम् ॥

ततोऽयमुवाच शयित्वैवेति ।

किं तद्देयं त्विदानीं वद मम पुरतः प्रत्युवाचाथ ताम्र
स्थूलार्थार्थो युवाभ्यामितिकुशलिमहालोभिभट्टस्ततोऽयम् ।
ओमित्युक्त्वाऽप्यवोचत् पुनरिति वचनं शंकरस्संप्रतीयं
भक्ष्यं भोज्यावहे वामिति वदति मुहुर्भोजनं कार्यमेव ॥

तदनु स एष महालोभी गृहीतोपवासव्रता वयं चेद्भोक्तास्महे युवामपि भोक्तासाथे तिष्ठतमित्यभिधाय तूष्णीमेव स्थितोऽभवत् ।

विवाहशुभमन्दिरं द्विजवरोऽतिशुद्धोऽतिथिः
ससंभ्रमबुभुक्षया द्रविणदक्षिणाशान्वितः ।
समेत्य निजकान्तया सह कृतोपवासोऽभवत
बतैतदपि वीक्षितुं सपदि नोचितं मादृशाम् ॥

इत्येवं मन्यमान इव कर्मसाक्षी जगच्चक्षुरस्तधराधरान्तरितोऽभवत् ।

ततो निशीथे सति दम्पती तौ सुषुप्त्यवस्थामथ बुद्धिमानसौ ।
उवाच सद्यः क्रियते हि भूसुरैः उपद्रवे वैदिककर्म केवलम् ॥

अतो वयमिदानीमेव वैवाहिकशेषहोमं समाप्य नाकबलिमहोत्सवादिकंकणविसर्जनकुलदेवतोद्वासनान्तं शुभकर्म विधाय यथायथं गच्छाम इति ।

ततश्चातिलोभी महालोभिभट्टं समीचीनमालोचितं युक्तियुक्तम् ।
त्वयेत्येवमुक्त्वाऽकरोत्पूर्णमाशु स्वयं मन्त्रतन्त्रैर्विवाहांगकर्म ॥

तदनु महालोभी सम्बन्धिनमतिलोभिनं निजनगरगमनायाऽनुज्ञाप्य सभार्यः पुनस्स्वयमपि सत्वरमात्मीयनगरीमार्गगतोऽभवत् ।

ततः शंकराख्यो महान् याचकोऽसौ समुत्थाय पत्न्या सहैवाशु गत्वा ।
पुरस्तात् पदव्यां स्थितो वापिकायां प्रभाते सति स्नानसंध्यादि कर्तुम् ॥

ततोऽयं महालोभी दूरमागता वयमित्यतिसंभ्रमेण पुत्रकलत्राभ्यां सह तत्रैव समागतोऽभवत् ।

तं दृष्ट्वा चकितोऽभवत्पुनरहं लोभी महान्याचकः
वृद्धो भूमिसुरोऽयमत्र चपलं सुप्तः कथं वाऽऽगतः ।
अत्याश्चर्यमुपेत्य निश्चयमिमं चक्रे स्वयं शंकर-
श्चोद्याद्याचकभूसुरो गिरिजया भूत्वैव मां बाधते ॥

तथाप्यस्मै न किंचिदपि ददामीति मनसि निधाय ' पश्चाच्छब्दो नास्ति पर्याय ' इति मत्वा स्वीयनगरं प्राप्य कतिचिद्दिनेषु गतेषु यथा कथंचित्संपाद्य भवतो देयं दास्यामि पश्चादधुनाऽत्र किमस्ति गच्छ गच्छ यथाऽगतं तथा यातु भवानिति वदन्तमेतमुवाच याचको भवद्भिःसहैवाऽऽवामप्याप्रदानादागच्छाव इति ।

क्वचिद्गत्वा ग्रामं पुनरयमुवाचाऽतिनिपुणः
चिरं वासोऽस्माकं भवति नगरेऽस्मिन् तव कृते ।
ततो गत्वा भूयो विजयपुरमायाहि चपलं
यते तेऽब्दे देयं कथमपि निवासा म इति च (?)॥

ततस्स एष शंकरभट्टोऽप्यत्रोचदेवमहमिह त्वयैव सह संचरन् भिक्षाचर्यमत्रस्थाय कथंचिद्यत्र कुत्रापि वा गृहीत एवा (?) सदाक्षिण एव गमिष्यामीति ।

महालोभी विप्रः कथमपि न मां मुञ्चति हठात्
वसत्येवात्रायं किमिह तु निवासेन भवति ।
इति गत्वा ग्रामं मम पुनरुपायेन तमिमं
निवार्याऽस्मान्मुक्तः सपदि कलुषादित्यमनुत ॥

ततोऽयं पुत्रकलत्राभ्यां ताभ्यां प्राचीनदम्पतिभ्यां सह निजविजयनगरोपगतमहादेवदेवालयं गत्वा तत्र तत्राऽऽत्मीयधनस्थानं यथास्थितमवलोक्य मुदितान्तरंगोऽभवत् ।

देवः शंकरभट्ट एवमवदत् देयं त्वया दीयतां
संप्राप्तोऽसि निजस्थलं त्वमधुना गच्छामि नोचेदिह ।
स्थास्यामि ध्रुवमीश्वरः सगिरिजः साक्षी महेशो महा-
लोभिन्नित्ययमुक्तवानिति ततस्तं याचकं शंकरम् ॥

इदानीमागताः स्मः किमत्र निक्षिप्तं धनमस्ति कांचित्संपाद्य देयं दास्याम्यवश्यमेव तावदस्मिन्नगरेऽत्र वा तिष्ठ किमस्मदीयं गच्छतीति ।

तथास्त्विति मुदा स्वयं गतवति द्विजेऽयं पुनः
कथंचिदपि मामसौ नहि विमुंचतीति प्रियाम् ।
उवाच वचनं ततो (ऽवद) दियं त्वयोक्तं पुरा
किमर्थमधुना भवान् भजति केवलं लोभिताम् ॥

देयं तु खलु स्वल्पमेव तथाप्याशाबद्धो वृद्धब्राम्हणः श्रमी भवत्यधुना वा गच्छतात् तद्देयं दीयतामिति ।

महालोभी भार्यामिति वचनमूचेऽथ सहसा
भवत्या दुर्मत्या मम हृदयमद्याऽपि किमपि ।
न विज्ञातं कष्टार्जितवसु (परि) त्यागवचनम्
विषप्रायं श्रुत्वा कथमपि सहे त्वां तु जरठाम् ॥

परन्तु परिगतजनपदेषु कानिचिद्दिनान्यपनीय....गमिष्यामि तमागतं प्रतिवक्तव्यमेतावद्भवदर्थमेव देशान्तरगतो मम पतिर्वृद्धोऽप्यधुना वा गच्छेति ।

ततो गतेऽस्मिन्पुनरागतं तं समीक्ष्य सैषाऽवददेवमेव ।
स इत्यवोचन्निवसामि तावत् यावत्पतिस्तेऽत्र समागतः स्यात् ॥

तदनु तस्मिन्नेव नगरे निवसन् शंकरभट्टो महालोभिभट्टतनयविवाह-समयसमागमवृन्तान्तकथनेन सर्वेषामपि हास्यरसमुत्पादयामास ।

तत्रोदारवणिग्जनस्तमवदत् वृद्धोऽसि कष्टेन किं
तद्देयं भवतेऽत्र तत्रभवते वृद्धाय सर्वे वयम् ।
दास्यामः कियदेतदित्यथ मुदाऽवोचत् स विप्रश्चिरं
स्थित्वा तं प्रविहाय गन्तुमुचितं किं मादृशानामिति ॥

अयं तु महालोभिभट्टस्तत्र तत्र पल्लीजनपदेषु परिभ्रमन् बहूनि दिवसान्यपनीय दैवादागतमात्मतनयं प्रति दुरात्मयाचकभयनिवारणमाचिरेणैव करिष्यामि भवांस्तु तद्गमनानन्तरमेव समागच्छतात्वित्यभिधाय स्वत एव तद्गमनोपायान्तरमालोचयन् अन्तरान्तराऽवस्थाय शनैः शनैर्देवालयात्मस्थलमुपागमत् ।

तदैवागतं भूसुरं शंकराख्यं समीक्ष्याऽयमुचे दुरात्मन्निदानीम् ।
त्वदर्थं पुरग्रामदेशानटित्वाऽऽगतः श्रान्त एवास्मि गच्छाधुना त्वम् ॥

ननु नूनं ब्रवीमि श्रुणु श्वः प्रातरागत्य यथा..................दिति ।

सुविप्रस्तथैवास्तु गच्छामि तूर्णं त्वया दीयतां देयवस्तु स्वकीयम् ।
मुदा मह्यमद्याऽपि दत्तं न चैतत् सदा सत्यवादी भवेरित्युवाच ॥

ततोऽयं पुनरुवाच तमेवमवनीसुर त्वया सत्यमेवोक्तं सदा सत्यवादीति ।

ततस्स याचको धीमान् प्रहसन्निदमब्रवीत् ।
तथास्त्विति निजावासं गतोऽभूत्तदनन्तरम् ॥

सहस्रभानुभानुरखिललोकक्रियमाणसाक्षितया दिनकरतया च महालोभिदुश्चेष्टितकौतुकदिदृक्षया सत्वरमेव श्वो दिनं कर्तुमिव मेरोरुदगयनगमनपरोऽभवत् ।

महालोभी ततो धीमान् सम्यगालोचितं पुरा ।
मुदा तद्गमनोपायमाचचक्षे सतीमिति ॥

अयि प्रिये श्रुणु मद्वचनमहं न मरिष्यामि मा कातरा भव भवानीपतिरत्र साक्षी भवति परन्तु निराशया दुरात्मयाचकगमनाय श्वः प्रातरात्मसमाधिनिष्ठागरिष्ठवसिष्ठप्रमुखमहायोगीव निगृहीतवपुर्निष्प्राणो मृत इव भवामि भवती तु मत्समीपत एव रुदन्ती सती तमागतमवलोक्य गच्छ गच्छाऽयं मम पतिस्तवैव दुरदृष्टादद्य परित्यक्तशरीरोऽभवदिति ।

ततस्तयोक्तं बहुशः किमर्थमेतावदायास इति प्रकोपात् ।
कुतस्तवेदं वचनं मयोक्तरीत्या कुरुष्वेति वचो बभाषे ॥

पुनस्तयापि कथितमागतेन तेन त्वत्परीक्षाकरणाय किमपि वा कृतं चेत्कथमिति श्रुत्वाऽयमुवाच दुरात्मना तेन मच्छरीरदहनान्तेऽपि कर्मणि क्रियमाणे न चलिष्यामीति च ।

तयोमित्युक्तोऽयं दिनकरमयूखोदयभसत्-
तुराषाड्दिक्कान्तामुखहसितमा...चपलम् ।
धरित्र्यां निर्लज्जो मृत इव पपातास्य वनिता
रुरोदेति क्षिप्रं बत विधिवशादस्मि विधवा ॥

ततस्सैषा मयूखमालिनि समुदिते सति तमागतमवलोक्य तवैव दुरदृष्टान्मृतो मम पतिरनाथाऽस्मि पुत्रोऽपि समीपे नास्तीत्यवाचत् ।

ततस्सोऽसौ विप्रो वचनमवदद्भामिनि भिषक्-
चिकित्सां जानेऽहं तव पतिमुदारं मृतमपि ।
कथंचिद्भैषज्यं किमपि च विधायाऽतिचपलं
पुनर्लब्धप्राणं स्थितमिह करोमीशकृपया ॥

तदनु नाडीपरीक्षाविचक्षणः शंकरभट्टोऽसौ गृहीतमहालोभिदक्षिणहस्तः समस्तौषधक्रियातीतःसंनिपातरोगोऽयमग्निवैद्यमतः परमिति शास्त्रमभिधाय सत्वरमग्निं प्रज्वाल्योल्मुकेनास्य पादहस्तमंगदाहं बहुधाऽकरोत् ।

तथाप्ययं महालोभी न चचाल सती तदा ।
रुरोदातीव चाकिता मृतः किं पतिरित्यहो ॥

ततोऽसौ शंकरभट्टस्तवाबले पतिर्मृतः पुत्रोऽपि समीपे नास्ति चिरकालाश्रितोऽहमेव सुतप्राय इतीमं मंत्राग्निसंस्कारवन्तं कृत्वैव गमिष्यामीत्यभिधाय स्वयमेकमेव महालोभिनं श्मशानमानीय चितिमध्यारोप्य तद्वनितानीताग्निमुत्पादयामास ।

तदानीमप्यस्मिन् समुचितनिजार्थव्ययभयात्
मृतप्राये देवा नभसि सहसा शंकरममुम् ।
दयाहीनं प्रोचुस्तदनु गिरिजालिंगिततनुः
शिवस्साक्षाद्भूत्वा वचनमवदत् सत्वरमिति ॥

अरे महालोभिन् उत्तिष्ठोत्तिष्ठ देयं न दीयतामहमेव पराजितः परमकारुणिकः पंपापतिस्त्वदीयदृढसाहसेन प्रसन्नोऽस्मि वरं वृणीष्वेति वचनमाक-

र्याऽयमुत्थितः ।शिव पाहि मामित्यवन्यामवतारितः पत्न्या सह महादेवपादार विन्दवन्दनमकरोत् ।

अहं कृतार्थोऽस्मि शिव त्वयाऽधुना कृपा कृता मुक्तिवरं प्रदेहि नो ।
शतायुरप्यस्तु सुतश्च पुत्रवान् इतीश्वरं प्रार्थयतयामीप्सितम् ॥

तदनु कृपापारावारः पार्वतीमनोहरः पंपापतिः तथास्तु तवैतः षोडश-वर्षाधिकायुष्यमस्ति तदनन्तरमात्मसायुज्यमेव त्वत्तनयोऽपि शतायुःपुत्रवांश्च भूयान्निजवासस्थलं प्राप्य सुतेन पुत्रकलत्राभ्यां तिष्ठेत्यभिधायाऽऽत्मवासास्पदं ....प्राप्य स्थितोऽभवत् ।

अयमपि तादृश एवेति विज्ञाय मा रोदीः कृतधैर्या भव त्वमस्मद्गुरु.. कथितया कथु(?) स नो तनोत्येवं वदति तल्लोभिश्वसुराशिष्ये सांबाशिवप्रेरणया समागतेन **श्रीराशिदेशाधिपतिनाऽऽत्मयजमानेन** पम्पापतिप्रीतये ब्राह्मण-समाराधनं विधेयं क्व गतोऽस्मदीयावनीसुरोऽयामित्युक्तमाकर्ण्य स लोभी सत्वर-मुत्थाय भूपतिदत्तधनव्रयापादितभक्ष्याज्यप्रवाहैः स्वकीयबान्धवश्वशुरजनान् सपरिवारान् संतृप्तानकरोत् ।

......तस्मिन्नेव तृप्ताः श्वशुरबान्धवाः ।
पंपापतिं प्रणम्याऽथ जग्मुर्निजपुरं प्रति ॥

केचित्तु किष्किन्धाचलबिलान्तस्थितरंगनाथरथोत्सवदिदृक्षय। विद्या-नगरनगमन् ।

अन्ये तु याचका विप्राः कवयो वान्दिनस्तथा ।
वसन्तत्याग .... जग्मुस्तन्नगरं.... ॥

ततः परपतिः मुदितकार्यकारिजनैः वर्षातपसंपर्कनिवारणाय बृहत्कुटी-रसमाच्छादितयो .... मतयोर्देशान्तरं .... क्रमेण निजनगरं प्रति गत .... ।

................त्मपुरं गतास्तत्र निवासिनोये ।
सानन्दमासन् सकला जनास्ते पंपेशसेवानिरतास्सदैव ॥

अथ शिवार्चकः परपतिकृतप्रार्थनया महादेवदेवालयसंप्रोक्षणमागमोक्त-रीत्या विधाय पंपापतिनित्यसेवां विधातुमुपाक्रान्तवानेवमेव वसन्तोत्सवो माधवपौर्णमासक्रियमाणपंपा..................वधिकः प्रतिशरद्भवति ।

इति श्रीमत्पंपापतिशिववसन्तोत्सवकथां सदैव श्रोतृणां सुकृतफलदां सज्जनमताम् । यतो........धयतिप्रभोगीश त्वां मम तदभवज्जन्म सफलम् ।

विरुपाक्षदेवस्य चम्पूप्रबन्धे वसन्तोत्सवाख्यानसर्वातिहृद्ये ।
सदा शृण्वतां पुण्यसम्पत्प्रदेऽस्मिन् असावुत्तरस्तुर्यकाण्डःसुपूर्णः ॥

॥ इति श्रीविरूपाक्षवसन्तोत्सवचंपूः समाप्ता ॥

SOME SUGGESTIONS REGARDING THE TEXT

Page	*Line*			
1	16	*Is it* कामारि *instead of* तामाति ?		
2	13	*Read* दायच्छन्		*in the gap.*
2	17	,, विद्या		,,
2	19	,, स एव स्थिताः		,,
2	22	,, ..ष्टा बभूवुर्हि सहसा		,,
2	24	,, धनार्थिन		,,
3	5	,, विद्या		,,
4	6	*Is it* मिदमहो *instead of* मिममहो ?		
5	4	*Read* साम्बशि		*in the gap*
5	12	,, अरे		,,
6	10	*Is it* मत्प्रियेत्य... *instead of* मत्प्रतीत्य ?		
6	13	,, तुष्टो	,,	पृष्टो ?
6	21	,, विद्वान्	,,	विद्वन् ?
7	12	*Read* अस्म		*in the gap*
7	18	,, लंबस्तु		,,
8	19	,, तद्		,,
9	1	,, ऽस्मा		,,
9	6	,, वता		,,
9	10	,, दिताद्		,,
9	14	,, उपा		,,
9	20	*Is it* जनतागता *instead of* जनतागत ?		
9	22	*Read* कर्म च		*in the gap*
9	25	,, ऽभवत् ।		,,
10	3	,, खिल		,,
10	19	,, काल		,,
11	4	*Is it* कालो *instead of* कामो ?		
11	13	*Read* लतानी		*in the gap*
12	7	,, मोक्ष		,,
12	20	,, थिको		,,
14	13	*Is it* तत्रत्यस्त *instead of* तत्रत्यास्त ?		
20	11	,, स एव	,,	सैव
24	10	,, ते	,,	तैः
28	18	,, भक्तं	,,	भक्तः ?
29	11	*Read* तत्करुणः *or* तात्मस्वरूपः		*in the gap*

32	2	*In* ' क ' *it is* मविलंबित		
39	20	*Is it* म्लानिं *instead of* म्लानं ?		
42	13	,, तोत्पादितत्वात् *instead of* तोप्रादितात् ?		
51	15	,, अविलंबि	,,	विलंबि ?
53	4	,, वत्न्यस्यां	,,	वर्त्यस्यां ?
56	1	,, वदंत्यमिव	,,	वदंतमेव ?
56	8	,, पत्युः करे	,,	पतेः करे ?
58	10	,, तीर्त्वा	,,	तीर्त्यं ?
65	14	,, तमेव	,,	तदेव ?
70	8	,, पापिनीः	,,	पापिनः ?
71	3	,, *Read* भु		*in the gap*
72	3	*Read* ता *in between* इत्यागतौ *and* चंद्रज्योतिः– ?		
82	1	*Is it* करैः *instead of* करे ?		
82	19	*Read* समुद्गह		*in the gap*
83	3	,, स्वादन		,,
83	4	,, स्तात्		,,
83	21	,, गमना		,,
83	23	,, बाहुल्यं		,,
83	25	,, वेश		,,
84	11	*Is it* यामास्त *instead of* यामलष्ट		
84	16	*Read* तै		*in the gap*
84	21	*Is it* प्रसारित *instead of* प्रसादित ?		
89	2	,, लोकाः प्र		*in the gap*

ERRATA

Page	Line	For	Read
1	6	यज्ञर्त्विजस्तु	यज्ञर्तिजस्तु
2	8	...क्षुपभु	क्षुपभुज्य
2	9	दक्षिणावाप्त्ययभित्र	दक्षिणावाप्त्यभित्र
2	11	कथचिदुपचारैऽस्स	कथंचिदुपचारैस्स
3	4	बांधवान्निजगृहे	बांधवाः निजगृहे
4	1	कस्यवानये	कस्य वा शये
4	2	उवाचदेवम्	अवोचदेवम्
5	8	मिपरार्थं...	मि परार्थ...
5	8	च करिष्यामि	च न करिष्यामि
5	15	द्विजेयं	द्विजेमं
5	22	पुनः पृष्टोसाव...	पुनः पृष्टोऽसाव...
5	23	वेतऽच्छ्वशुरेपु	श्वेतच्छ्वशुरेषु...
6	3	..धर चेला	...धरचेला
7	3	चपलमिमास्थान...	...चपलमिममास्थान
7	11	नाचरिष्यति	नाऽऽचरिष्यति
8	7	...तत्रन्य	....तत्रत्य
8	17	न करोद...	नाकरोद...
8	21	उपस्पृश्यातोयं	उपस्पृश्याऽतोऽयं
9	20	..तागत (?)	..तागता (?)
14	26	*drop the second* निनाद	
15	18	विबुधपद्यः	वित्रिधपद्यः
16	3	सिंधुरगंधर्व	सिंधुगंधर्व
16	18	लक्ष्यमानशं...	लक्ष्यमाणशं...
20	2	कालं विलंबा..	कालविलंबा..
20	21	..कानामावलंबि	..कानामवलंबि
22	16	पंपापतिराऽत्मीय	पंपापतिरात्मीय
24	7	चापलया चक...	चापलमाचक..
24	15	वंदत...	वदंत...
24	22	कलावतीयं	कलावतीयं
28	7	अत्माय...	अत्मीय...
28	16	...दुर्वीक्षपर्व...	..दुर्वीक्षपर्व...
28	21	निश्चलबलात्	निश्चलबला

Page	*Line*	*For*	*Read*
29	24	पंपाभो	पंपा.भो
30	24	बाणं यत्र	बाणयंत्र
31	6	...यमलंब्य	..मवलम्ब्य
31	13	..भवनी पतिः	..भवानीपतिः
31	14	दृष्टेंन्दुं	दृष्ट्वेंन्दुं
32	10	साष्टांग	साष्टांगं
33	9	महाजनस्सहांतरांतरौ	महाजनैस्सहांतरांतरा
34	19	यागकृत्याऽपि	यागकृत्या अपि
34	21	समागमन्	समगमन्
35	1	सदक्षिणातांबूल	सदक्षिणताम्बूल
35	14	लाटिक स्थानक	लाटिकं स्थानकं
36	1	तया	त्वया
36	3	नवै	नैव
36	21	विधुं	विधुं
37	3	परिपूण	परिपूर्ण
38	12	...वाप्ताश्याम	वाप्तश्याम
39	4	ब्रह्मणानां	ब्राह्मणानां
39	4	याजुषस्संहिता	याजुषसंहिता
39	6	त्रिलोकी जये	त्रिलोकीजये
39	16	चतुराकार...	चतुराऽऽकार...
39	18	कांता नयन	कांतानयन
39	19	कलिका	कलिता
40	6	धत्ते त	धत्तेऽत्
40	21	चत्	चेत्
42	23	येनते	येनैते
42	24	...तनया श्लेषा...	तनयाऽऽश्लेषा..
43	17	...त्तगंधोऽपि	..त्तगंधोऽपि
43	24	सरतावर्त	सरताऽऽवर्त
44	11	*drop* लागुरुगु	
45	*foot note*	सृष्टो....	स्पृष्टो....
46	2	...धुना यहि	..धुनाऽऽयाहि
49	14	विलम्ब का..	विलम्बं का...
49	21	सखीनामुपेत्याऽह	सखी तामुपेत्याऽऽह
50	9	विश्वस्य	निश्वस्य
50	18	सुमतिप्रयाहि	सुमति प्रयाहि
50	20	कथंचिदनकूले	कथंचिदनुकूले

Page	Line	For	Read
50	22	फलादिकं	फलाधिकं
50	24	अन्यथा सति विमुख	अन्यथासति विमुखे
51	13	दुष्ट	दुष्टं
51	20	*Mark* I *over* मान	
52	*foot note*	...ततालं	..तितालं
53	27	कचयुगे	कुचयुगे
54	23	..लाक्य	..लोक्य
54	24	करौर्द्धि...	कवौ द्धि..
55	2	कथायेव	कथनायेव
55	2	रोधस्थल..	रोधःस्थल..
55	8	त्यया	त्वया
55	11	ुत्रो	पुत्रा
57	18	पंपापतेरसमो..	पंपापतेस्समो...
58	9	वध्यापगारथा	वध्यापगा रथा
58	18	..तोष्णीव भूषण	तोष्णीषभूषण
58	*foot note*	कुतस्ल्या...	कुल्या...
59	20	भयापहां	भयापहं
60	6	...देवादिऽऽकिरात	...देवादिकिरात
60	18	...मित्राऽत्पतत्	मित्रोत्पतत्
60	28	शोभिता	शोभितां
62	22	जीवस्यो...	शिवस्यो...
65	10	गृंहगान्मृ	गृहगान्मृ
67	16	मृगानुधावनन	मृगानुधावनेन
67	25	सारेण	सारेणैव
68	20	...च्छन्नावयोः	...च्छन्ननयोः
70	12	भवति	भवासि
72	2	प्रोवाच ्मात्रं	प्रोवाच मित्रं
72	6	शेखरसमुचित महाशेखर- समुचितमहासा..	शेखरसमुचित महासा...
73	25	पूज	पूजां
75	15	...रनघा	...रनघाः
76	7	प्रेरणय	प्रेरणया
78	18	सभोग	सभोग
80	1	भवसोति	भवसीति
81	15	वशिष्ठ	वसिष्ठ

Page	*Line*	*For*	*Read*
82	21	पतेर्मदा	पतेर्मुदा
84	10	समास्थानुमु...	समास्थातुमु...
84	12	सांगात्सेवमहा	सांगोत्सवमहा
85	10	स्थलास्थिते	स्थलस्थिते
87	8	एतम् (न्मे ?) न्ये	एतम (न्म ?) न्ये
87	22	भूसुरपूजनं	भूसुर पूजनं
88	13	विनयनगर	विजयनगरं
88	16	चिंताऽभव...	चिंतोऽभव...
90	9	...जलस्य	...जनस्य
90	10	मध्ययएव	मध्य एव
91	6	सय	सत्यं
91	14	लोभी व र्थं...	लोभी स्वार्थं...
91	15	वयाऽ	त्वयाऽ
94	25	गच	गच्छ
95	9	स्बार्थत्रिय	स्वार्थत्रय
95	10	...वेत्य संभाष...	...वेत्यसंभाष...
96	11	पात्वा	पीत्वा
97	13	रतस्यैव	स्रस्यत्र
97	13	प्रीत्वा	पीत्वा
97	15	न क्षत्रा..	नक्षत्रा..
97	20	घनस्तन्य	घनस्तन्यं
97	24	वसन	वसनं
98	7	वोचन्स..	वोचत्स...
98	13	ध्वनयोः	ध्वनयो
98	16	अरण्य..	आरण्य..
98	16	कर्मसुसाधनानि	कर्मसु साधनानि
98	22	..जानि संति संति हि	..जानि संति हि
98	23	पौरोहीत्यमहं	पौरोहित्यमहं
99	16	त्रसन्न	प्रसन्न
99	17	हुत	हुतं
100	2	मार्जयाऽऽसु	मार्जयांऽऽशु
100	12	प्रती एवमवाचत्	प्रति एवमवोचत्
100	14	तः	नः
100	20	किं चिद्धन	किंचिद्धन
101	1	पत्न्याऽहृतं	पत्न्याऽऽहृतं
102	8	स एवागतं	स एष आगतं

Page	*Line*	*For*	*Read*
102	24	गंतुकृत..	गंतु कृत...
103	2	..वोचदेवं	वोचदेवं
104	13	परंवचनमा महान्	परं वचनमाह लोभी महान्
104	19	वथा	वृथा
104	19	...स्य हो	...स्यहो
105	22	दृष्ठा	दृष्ट्वा
106	2	गतषु	गतेषु
106	15	इात	इतो
108	17	निगृहीतवपुः	निगृहीतवायुः
109	1	भसत्	लसत्
109	6	...त्यवाचत्	...त्यवोचत्
109	18	श्मशान...	स्मशान
110	3	नो	मे
110	4	प्रार्थयतया	प्रार्थयताय
110	6	*Read* दास्याम्यवश्यमेव *in between* सायुज्यमेव *and* त्वत्तनयोऽपि	
110	18	नगरनगमन्	नगरमगमन्
110	22	...मतयो	...गतयो
111	2	...नेवमेव	नेवमेष...
111	5	धयति प्रभोगीश	धयति प्रभो भोगीश

INDEX TO THE VERSES

IN

विरूपाक्षवसन्तोत्सवचम्पूः

अ

अत एव विरूपाक्षः	श्लोकः	28
अत एव शिवः	,,	74
अतिलोभी स्वयं	,,	102
अत्रत्याश्च जनाः	,,	47
अत्रांतरे पतिरुपेत्य	वसंततिलक	51
अथावभृथमंगलं	पृथिवी	80
अन्यत्र संति	वसंततिलक	68
अन्यथा मम मतिः	वियोगिनि	91
अन्ये तु याचकाः	श्लोक	110
अन्ये तु केचन	वसंततिलक	58
अन्ये पुनः	,,	58
अन्योऽपि कश्चिदिति	,,	30
अन्योप्येवमुवाच तत्र	शार्दूलविक्रीडित	33
अन्योप्येवमुवाच कश्चिदिति	,,	87
अपि चादिकिरातोऽत्र	श्लोक	29
अयस्तेहं कांते	शिखरिणी	50
अयं कतिपयैः	पृथिवी	99
अयं क्षीरांबोधेः	शिखरिणी	35
अयं चूतश्चेतः	,,	61
अयं तु संपादित	उपजाति	101
अयं तं प्रत्यूचे	शिखरिणी	97
अयं त्वमीशो देवश्च	श्लोक	47

अयं पत्नीमूचे	...	शिखरिणी	....	99
अयं प्राह प्रीत्या	....	,,	...	97
अयं राजाऽनार्यैः	....	,,	....	5
अयं लक्ष्मीवृक्षः	...	,,	....	62
अयं विद्वानूचे	....	,,	....	65
अयं सर्वोपायैः	....	,,	....	92
अरण्यानीमारात्	....	,,	....	59
अरे दुरात्मन्	....	उपजाति	....	72
अरे दुष्टं विप्रं	....	शिखरिणी	....	7
अरे मलयमारुत	....	पृथिवी	....	43
असाविति ततः	....	,,	....	104
असौ सपदि	....	,,	....	81
अहं कृतार्थोऽस्मि	....	वंशस्थ	....	110
आपादमस्तक	....	वसंततिलक	....	81
आरण्यका पुनः	....	,,	....	98
आलीभिस्तनुताप	....	शार्दूलविक्रीडित	....	46
आवाहिता देवगणाः	....	श्लोक	....	84
इत्येतद्वचनानुमोद	....	शार्दूलविक्रीडित	....	45
इदानीं प्रार्थये	....	श्लोक	....	53
इदानीं वा वायो	....	शिखरिणी	....	44
उत्फुल्लोत्पललोचनौमपि	....	शार्दूलविक्रीडित	....	51
उपस्पृश्याऽतोऽयं	....	शिखरिणी	....	8
उपेक्ष्यमाणास्सर्वेऽपि	....	श्लोक	....	48
एतन्निशम्य वचनं	....	वसंततिलक	....	4
एतम (न्म) न्यध्व	...	श्लोक	....	87
एतादृशे त्वयि	....	,,	....	42
अंगं त्वदीयं	....	इंद्रवज्रा	....	78

क

कन्यापिताऽसाविति	....	उपजाति	....	103
कशाघात प्रभूतेन	....	श्लोक	....	25

कश्चित्तदैव	…. वसंततिलक ….	74
कश्चित्तत्र विपश्चिदेत्र	…. शार्दूलविक्रीडित ….	35
कश्चिद्द्विजचकोरोऽत्र	…. श्लोक ….	31
कश्चित्पंडित	…. शार्दूलविक्रीडित ….	27
कस्त्वं गिरीशः	…. उपजाति ….	77
कान्तेऽन्या मयि	…. शार्दूलविक्रीडित ….	52
कार्यकारिजनस्तत्र	…. श्लोक ….	27
किमिदानीं त्वरयसे	…. अनुष्टुप् ….	5
किं कर्तव्यं क्व देशे	…. स्रग्धरा ….	95
किं चोपकारोऽपि	…. उपजाति ….	98
किं तद्देयं त्विदानीं	…. स्रग्धरा ….	104
किं सृष्टवान् विधिः	…. वसंततिलक ….	40
कुल्याः कश्चित्	…. शार्दूलविक्रीडित ….	64
कृपानिधिरतः शिवः	…. पृथिवी ….	26
केचित्तत्र कृतावासाः	…. अनुष्टुप् ….	13
केचित्तत्र समुत्सुका	…. शार्दूलविक्रीडित ….	57
केचित्कथंचित्	…. वसंततिलक ….	86
केचित्तदैव	…. वसंततिसक ….	27
केचिद्युवानो	…. इंद्रवज्रा ….	10
क्वचिद्गत्वा ग्रामं	…. शिखरिणी ….	106
क्वचिद्गत्वा ग्रामान्	…. ,, ….	95

ग

गत्वाऽऽगत्य	…. शार्दूलविक्रीडित ….	90
गत्वा तत्र जलं	…. ,, ….	63
गंतव्यं शनकैः	…. ,, ….	17

च

चलद्व्यालो गर्जन्	…. शिखरिणी ….	65
चंद्रज्योतिषि तत्र	…. शार्दूलविक्रीडित ….	31
चंद्र त्वं ननु पातकी	…. ,, ….	39

चंद्र त्वं यदि मन्यसे	.... शार्दूलविक्रीडित	40
चंद्रश्चंदनशीतलो	.... ,, ...	36

ज

जनाभिदवलाहक	.... पृथिवी	21
जनाश्रयग्रहो	.... ,, ...	3
जम्बूः कोमल पल्लवो	.... शार्दूलविक्रीडित	62

त

त एते त एवात्र	.... दण्डक	29
ततोऽर्चकश्शनैः	.... श्लोक	85
ततो गतेऽस्मिन्	.... उपजाति	107
ततोऽग्रे गत्वाऽयं	.... शिखरिणी	16
ततो देवार्चको	.... श्लोक	73
ततोऽधिकारी	.... उपजाति	34
ततो निर्भयोयं	.... भुजंगप्रयात	61
ततो निशीथे सति	.... उपेंद्रवज्रा	105
ततो नृपतिशेखरः	.... पृथिवी	7
ततोऽब्रवीत्	.... उपजाति	37
ततोऽयमिह	.... पृथिवी	101
ततोऽसावोचत्	.... वसंततिलक	104
ततोयं प्राहैनां सखि	.... शिखरिणी ...	49
ततो राजाऽवोचत्	.... ,, ...	4
ततो विद्याधारण्याभिध	.... ,, ...	21
ततः कृत्वा पूजां	.... ,, ...	34
ततः कुंभलग्ने	.... भुजंगप्रयात	102
ततः केचित्तेषां	.... शिखरिणी	23
ततः परपतिर्द्विजान्	.... पृथिवी	24
ततः परपतिस्त्वयं	... ,, ...	21
ततः परपतिस्स्वयं	.... ,, ...	32
ततः परमलोभिना	.... ,, ...	102

ततः परावृत्य	वंशस्थ	60
ततः पिता वाचमुवाच	उपजाति	93
ततः पुत्रेण	श्लोक	102
ततः प्रभृति सोऽन्वहं	पृथिवी	93
ततः शंकरभट्टोऽयं	श्लोक	104
ततः शंकराख्यो	भुजंगप्रयात	105
ततोऽयं पम्पापति	शिखरिणी	69
ततः सतीर्थ्योऽपरः	श्लोक	87
ततस्स याचको	,,	108
ततस्सर्वे	शिखरिणी	80
ततस्सर्वे विप्राश्च	,,	32
ततस्सा भर्तारं	,,	9
ततस्सा सखी	भुजंगप्रयात	49
ततः सेयं प्रीत्या	शिखरिणी	91
ततस्सैषाऽवोचत्	,,	53
ततस्सैषा कांता	,,	39
ततस्सोसौ विप्रो	,,	109
ततस्तदारभ्य	उपजाति	92
ततस्तयोक्तं पुनः	,,	94
ततस्तयोक्तं बहुशः	,,	108
ततस्ता अप्यूचुः	शिखरिणी	70
ततस्तूष्णीभूतः	,,	7
ततस्तेऽब्रुवन्	भुजंगप्रयात	4
ततस्तौ जग्मतुः	श्लोक	65
ततस्तं प्रत्यूचे	शिखरिणी	96
ततस्तं प्रहीयाशु	भुजंगप्रयात	3
ततः प्रोवाचाहं	शिखरिणी	96
ततः श्रीमान् वीरः	,,	68
तत्काममोहित	श्लोक	90
तत्रत्याः सकलाः	,,	75
तत्र पुत्रो भक्त्या	शिखरिणी	93

तत्र प्राह सती	....	शार्दूलविक्रीडित	....	53
तत्रोदारवणिग्जन	....	,,	....	107
तत्रत्यास्समुपागताः	....	,,	....	12
तत्रत्यास्तमपृच्छदेवं	....	,,	....	14
तत्रत्यास्सकलास्तूर्णं	....	श्लोक	....	25
तत्र पंपापुरे सर्वे	....	,,	....	35
तत्र रथ्यापगायां	....	,,	....	29
तत्र श्रीपरमेश्वरस्य	....	शार्दूलविक्रीडित	....	71
तत्राधिकारिपुरुष	....	वसंततिलक	....	20
तत्रान्यो विबुधः	....	श्लोक	....	30
तंत्रातबहिराश्रितौ	....	शार्दूलविक्रीडित	...	77
तत्रापि नित्यं	....	उपजाति	....	88
तत्रोटजावास	....	उपेंद्रवज्रा	....	64
तथापि श्रीपंपापति	....	शिखरिणी	....	28
तथाप्ययं	....	श्लोक	....	109
तथाप्यसौ पार्वति	....	उपजाति	....	91
तथाप्येतत् कांतां	....	शिखरिणी	....	89
तथास्त्विति मुदा	....	पृथिवि	....	107
तथैव चक्रे	....	उपजाति	....	101
तद्वृत्तं तदपीह	....	शार्दूलविक्रीडित	....	101
तदा केचिद्दुष्टाः	....	शिखरिणी	...	25
तदानीं तद् भृत्याः	....	,,	....	72
तदानीमप्यस्मिन्	....	,,	....	109
तदानीं लोकोऽयं	....	,,	....	20
तदा पटकुटीरांत	....	श्लोक	....	56
तदाऽयं श्रीपंपापति	....	शिखरिणी	....	59
तदाऽन्योऽयं शिष्यान्	....	,,	....	88
तदाऽगतं पुत्रमवेक्ष्य	....	उपजाति	....	100
तदा सर्वे लोकाः	....	शिखरिणी	....	84
तदा सैषा तूष्णीं	....	,,	....	94
तदासोऽयं लोभी	...	,,	....	86

तदाऽज्ञया साऽपि	....	उपजाति	....	89
तदैवागतं भूसुरं	...	भुजंगप्रयात	....	108
तदैव मदनस्स्वयं	....	पृथिवी	....	39
तदैवागता क्षा	....	भुजंगप्रयात	...	46
तदैवासौ विप्रः	....	शिखरिणी	....	80
तयोर्जनानाम्	....	श्लोक	....	54
तयोमित्युक्तोऽयं	....	शिखरिणी	....	109
तर्ह्येवं मम सूनवे	....	शार्दूलविक्रीडित	....	97
तस्मिन्नेव नृपाः	....	श्लोक	....	110
तस्मिन्नोमिति	....	शार्दूलविक्रीडित	....	99
तस्यां तत्समये	....	,,	...	13
तावेतौ सरितं	....	,,	....	70
तुतुषुस्ते	....	श्लोक	....	35
तुरीयवर्णादिषु	....	उपेंद्रवज्रा	....	26
तुलसीकानने नित्यं	....	श्लोक	....	63
तुषारपिण्ड एवायं	...	,,	....	36
तूष्णीमेव वदान्येतत्	....	,,	....	88
तेऽपि श्रीपरमेश्वर	....	शार्दूलविक्रीडित	....	73
तेऽमी भूमिसुरास्तदीय	....	,,	....	25
तेऽमी भूमिसुरास्तदैव	....	,,	....	23
तेषां द्विजानां	....	इंद्रवज्रा	....	23
तं दृष्ट्वा चकितो	....	शार्दूलविक्रीडित	....	105
तं माधवं	....	वसंततिळक	....	111
त्वयातिलोभि	....	उपजाति	....	101
त्वया ज्ञात्वा	....	शिखरिणी	....	77
त्वां भाषते प्रिय	....	वसंततिलक	...	46
...त्म पुरंगताः	...	उपजाति	....	110

द

दयालुर्देवोऽसौ	....	शिखरिणी	....	71
दिग्दंतावल	....	शार्दूलविक्रीडित	....	30

दूरस्था अपि	...	शार्दूलविक्रीडित	...	55
देवार्चकः करध्रत	....	वसंततिलक	....	34
देवार्चकः परपतिः	...	,,	....	73
देवार्चकः सपदि तत्र	...	,,	...	20
देवार्चकः सपदि	....	,,	....	75
देवार्चकः स्वयं	....	,,	....	33
देवानृतं वदसि	...	,,	....	78
देवान्यथा	....	,,	....	78
देवोऽसौ गिरिजापतिः	....	शार्दूलविक्रीडित	....	83
देवः शंकरभट्ट	....	,,	....	106
देवस्तत्र पुराधिकारि	....	,,	....	72
देवस्तत्र वने	...	,,	....	70
दृष्ट्वा ते	....	,,	....	83
दृष्ट्वा तं मुदितो	....	,,	....	96
दैवात् कश्चन	...	,,	....	100
दैवात् भूपतिरेत्य	...	,,	....	87
दैवात् संजात	....	श्लोक	....	99
दैवज्ञाद्यवर्नीसुराः	....	शार्दूलविक्रीडित....	....	85
दोषाकरत्व	...	वसंततिलक	....	15

ध

ध्यानेन तत्र परिकल्प्य	....	वसंततिलक	...	46
ध्वजस्तंभे पुनः	....	श्लोक	...	84

न

ननु ब्रह्मन्नेतैः	....	शिखरिणी	....	4
नमस्ते वायो	....	,,	....	44
नवो नवोऽप्यापि	....	उपशाति	....	38
नद्यां तत्र कविः	....	शार्दूलविक्रीडित	....	71
न ज्ञातं हि मया	....	,,	....	69
नाथ त्वं जरया	....	,,	....	94

न

नायं किरणः किंतु	इंद्रवज्रा	37
निर्माय सौधनिचयान्	वसंततिलक	71
निस्संग एव	,,	78
नेदं तमः किंतु	उपजाति	38
नैषाऽभवत्	वसंततिलक	74
नोचेत्कामिति	शार्दूलविक्रीडित	52

प

पद्मानि नैव	वसंततिलक	37
परकीयानुरक्ता ये	श्लोक	10
परिग्राह्या कन्या	शिखरिणी	97
परन्तु जीवेश्वर	उपजाति	74
परन्त्वसावेव	,,	38
परन्तु श्रीपम्पापतिः	शिखरिणी	52
पश्येदं तु सखे	शार्दूलविक्रीडित	69
पश्येदं सरसं	,,	61
पादौ प्रक्षाल्य	श्लोक	100
पितर्मातर्भ्रातः	शिखरिणी	86
पित्रोराधिकरस्त्वं	श्लोक	42
पिपासया तूर्णमवाप्य	उपजाति	96
पीठे निवेश्य	वसंततिलक	76
पुत्रस्तु वृद्धौ	उपजाति	100
पुत्रो मे भवतु	शार्दूलविक्रीडित	55
पुमर्थार्थी लोकः	शिखरिणी	2
पुरा कश्चिद्विप्रः	,,	88
पुरावासे कोणे	,,	10
पम्पापतिः पुनरपीह	वसन्ततिलक	28
पम्पापुरोत्तरद्वार	श्लोक	81
प्रभाते जातेऽयम्	शिखरिणी.	90
प्रभाते सत्येते	,,	75
प्रसीद प्रिये देहि	भुजङ्गप्रयात	52

प्रिये गिरिसुते	.... पृथ्वी	79
प्रियेन्तर्वर्त्यास्याम्	.... शिखरिणी	53
प्रियं त्वामुपेत्यासु	.... भुजङ्गप्रयात	48
प्रियं से घटय	.... श्लोक	45
प्रियस्ते कान्तोऽयं	.... शिखरिणी	51

ब

बुधाः श्रीविरूपाक्ष	.... भुजङ्गप्रयात ...	55

भ

भस्मोद्धूलितविग्रहश्च	.... शार्दूलविक्रीडित	31
भुक्ता भूविबुधा	.... शार्दूलविक्रीडित	82
भूच्छाया प्रतिभाति	.... ,, ...	38
भूताधिनाथो	.... उपजाति	77
भूदेवा रथरज्जुपाणय	.... शार्दूल विक्रीडित	22
भूदेवास्तूर्णमीशं	.... स्रग्धरा	24
भूयोप्यवाद् भेरीम्	.... अनुष्टुभ्	13
भूयो भूयस्समानीतं	.... ,, ...	8
भृत्योऽत्रत्यो	.... ,, ...	5
भेदसम्पादक ध्वान्ते	.... ,, ...	82
भोक्तुं वा वनजात	.... शार्दूल विक्रीडि	98
भो ब्रह्मन् किमिहास्ति	.... ,, ...	103
भो मित्रास्ति	.... ,, ...	11

म

मध्यान्हात्परतोप्ययं	.... शार्दूलविक्रीडित	95
मन्ये स्फाटिकमन्दिरं	.... ,, ...	36
महादेवस्स्वामी	.... शिखरिणी	89
(महा) देवसेवाधिकारी	.... भुजङ्गप्रयात	12
महादेवार्चक स्वामिन्	.... श्लोक	83
महादेवोत्सवोदार	.... ,, ...	13

महादेवो देवः	.... शिखरिणी	 76
महादेवोऽर्धनारीशो	.... श्लोक	 74
महाद्वारमध्ये	.... भुजङ्गप्रयात	 33
महालोभी धीमान्	.... श्लोक	 108
महालोभी भार्या	.... शिखरिणी	 107
महालोभी विप्रः	.... ,,	 106
महालोभी विप्रो निपुणः	.... ,,	 103
महीसुरपुरेशत्वं	.... श्लोक	 15
महोन्नतद्वार	.... ,,	 26
मा प्रवेशयत	.... ,,	 73
मुक्तालङ्कृतिछन्नबिम्ब	.... शार्दूलविक्रीडित	 54
मौलं किं	.... ,,	 77

य

यतोऽस्य वृक्षस्य	.... उपजाति	 63
यदा कदापि	.... श्लोक	 49
यदित्वं समर्थोऽसि	.... भुजङ्गप्रयात	 41
यात्रां गतास्तु बहवो	.... वसन्ततिलक	 86
यात्रागतेष्वपि	.... ,,	 11
यावच्छरीरपतनं	.... ,,	 93
युक्तस्त्वया	.... ,,	 79
ये तत्र महिता विप्रः	.... श्लोक	 2

र

रथं शूद्राकृष्टं	.... शिखरिणी	 22
राजाधिकारि पृष्टोऽथ	.... श्लोक	 6
राजाधिराजपरमेश्वर	.... वसन्ततिलक	 17
रे रे मन्मथ	.... शार्दूलविक्रीडित	 41
रञ्जनात् सर्वलोकानां	.... श्लोक	... 15

ल

लग्नं सन्निहितं	.... शार्दूलविक्रीडित	... 100

लब्धापि तव नास्त्येव	....	श्लोक	....	42
लज्जासखी सखि	....	वसन्ततिलक	....	51
लोकस्तर्हि समीक्ष्य	....	शार्दूलविक्रीडित	....	98

व

वणिग्जनस्तत्र	....	उपजाति	....	9
विचारितमिदं मया	....	पृथिवी	....	8
विद्वन् समर्थोऽसि	....	उपजाति	....	15
विद्वान् स विद्या	....	इंद्रवज्रा	....	6
विद्वान् कश्चिदवोचदेवं	....	शार्दूलविक्रीडित	....	24
विद्वानयं तेन	....	उपजाति	....	64
विद्वानयं वाचमुवाच	....	इन्द्रवज्रा	....	67
विप्रास्ते करशांभवागम	....	शार्दूलविक्रीडित	....	1
....विबुधा महारण्य	....	वसन्ततिलक	....	1
वियल्लक्ष्म्यादेव्याः	....	शिखरिणी	....	36
विरूपाक्षदेवस्य चम्पू	....	भुजङ्गप्रयात	....	111
विरूपाक्षदेवस्य ये	....	,,	....	55
विरुपाक्षो देवः	....	शिखरिणी	....	27
विरुपाक्षो देवः सपदि	....	,,	....	84
विवाहशुभमन्दिरं	....	पृथिवी	....	105
विवेकस्तावदेवात्र	....	श्लोक	....	42
वृत्तसाहित्योपवसस्य	....	वंशस्थ	....	104
वृद्धौ च मातापितरौ	....	श्लोक	....	93
वृषस्यन्ती काचित्	....	शिखरिणी	....	39
वेश्याजनोऽपि	....	श्लोक	....	10
वैवाहिकेषु कार्येषु	....	,,	....	47

श

शनैः शनैः	....	पञ्चचामर	....	82
शार्दूलाश्चकितः	....	शार्दूलविक्रीडित	....	67
शार्दूलोऽपि	....	श्लोक	....	65

शिवद्रोहिणो ये	....	भुजङ्गप्रयात	....	22
शिवस्तत्रागन्तुकृतमतिः	....	शिखरिणी	....	102
शिवां कमण्डलारूढां	....	श्लोक	...	62
शीतांशुर्न भवस्यहो	....	शार्दूलविक्रीडित	...	40
शैवा वसन्तोत्सव	....	इंद्रवज्रा	...	84
शैवास्तदाज्ञया	....	श्लोक	....	82
श्रीपम्पानगरे	....	शार्दूलविक्रीडित	....	57
श्रीपम्पार्यरथोऽपि	....	,,	....	32
श्रीपम्पेशरथोत्सव	....	,,	....	57
श्रीमद्भिः पुरुषैः	....	,,	....	59
श्रीमहादेवनयन	....	श्लोक	...	63
श्रीरामेण समुद्ररोधसि	....	शार्दूलविक्रीडित	....	19
श्रीविद्याकमला	....	,,	....	58
श्रण्वन्नेव खुराघात	....	श्लोक	....	68
श्रुत्वा तां	....	शार्दूलविक्रीडित	....	91
श्रुत्वैतद्वचनं	....	,,	....	64

स

स उद्यानं	....	श्लोक	....	8
स एनमवदत्	....	पृथिवी	....	17
सखितालफलाधिकं	....	वैतालि	....	50
सखि त्वं विश्वस्थ	....	शिखरिणी	....	50
सखीं तदाऽऽगत्य	....	उपजाति	....	55
सख्याऽनीतं	....	मन्दाक्रान्त	....	48
स तावदवनीपतिः	....	पृथिवी	....	18
सत्यं प्रिये तिष्ठति	...	उपजाति	....	54
स....देवालय	....	शिखरिणी	....	2
सद्यस्त्वया मह्यं	....	उपजाति	....	44
स मोक्षपुरदेवराट्	....	पृथिवी	....	17
स विप्रो हृदा	....	भुजङ्गप्रयात	....	9
सुधाकुम्भं मन्ये	....	शिखरिणी	....	36

सुविप्रस्तथैवास्तु	....	भुजङ्गप्रयात	....	108
सेदानीं तु सुगन्ध	....	शार्दूलविक्रीडित	....	46
सैषा दूषयदत्यन्त	...	श्लोक	....	43
सैषाऽसूत सती	....	शार्दूलविक्रीडित	....	92
सोयं तदेव नितरां	....	वसन्ततिलक	....	54
सोयं सद्मनि	....	शार्दूलविक्रीडित	....	50
सौख्यं मे ननु	....	,,	....	47
सन्त्यन्थेऽपि च	...	,,	....	19
सध्यामुषासितुमसौ	...	वसन्ततिलक	....	29
सम्पूर्णकामः	....	उपजाति	....	71
सम्प्रेरितोऽसौ	....	,,	....	76
स्कान्दात्पुराणवचनात	....	श्लोक	....	62
स्तौमि त्वामिह	....	शार्दूलविक्रीडित	....	42
स्थाणुः कथं	....	इंद्रवज्रा	....	77

WORD INDEX

अ

अद्वैतसिद्धान्त 19
अधिकरण 19
अधिकारिपुरुष 4, 34
अनङ्गदिन 99
अनन्त 36
अमरावती 12
अवमृथमङ्गल 80
अश्वपति 16
अहस्कर 29
अहोबल 57
अम्बात्रय 6

उ

उत्तरमीमांसा 25
उरग 13

ऋ

ऋष्यमूक 13, 63

क

कपोतगिरि 19
कमला (पुर) 15, 58
करदीप 19
कलधौतशकल
कल्याणनगर 15
कल्याणाचल 15
कल्यालसेवा 23
कानीनसूत्र 25
कापेयकृति 47
कायमान 73, 79, 81, 101
कार्यकारि 28
काश्मीरभूपाल 16
काहली 22
किन्नर 16
किष्किन्धानगर 64
कुलदेवताप्रतिष्ठापन 101
कुम्भार्तिक्य 34, 73
कोश 19
कौशिक 97
कौण्डिण्य 97

ग

गदाधरपुर 19
गुरुगोपुर 29
गौडदेश 97
गण्डशैल 9, 13
गंधर्व 13, 16

च

चित्रान्न 8
चैत्रोत्सव 10
चन्द्रशैल 15

ज

जनाश्रय
—० शाला } 9, 10, 11, 14, 47
जयदेव 69, 71

त

ताम्रस्थूलार्थ 104
तारकोपदेश 12
तिर्यक्पुण्ड्र 14

तुङ्गभद्रा 63
त्रिकूटपीठ 15, 17, 20, 33, 34

द

दशमग्रह 8
दक्षिणकाशी 5
दिलीप 65
दीक्षितेन्द्र 62
देव 13
देवनृपति 4
देवलिपि 69
देशभाषा 13
देवानांप्रिय 5
दम्बलपुर 19
द्विजराज 13, 15, 31, 33, 41, 49, 54, 82, 84
द्विजराजशेखर 16, 67, 69, 72

न

नरपति 6, 7, 32, 38, 47
नवीन (पुर) 58
निरीश्वरवाद 25
नन्दिन् 24
नन्दिनिकेत 76
नान्दीश्राद्ध 101

प

पण 4
पद्मिनी 39
परपति 4, 7, 8, 21, 24, 27, 32, 33, 72, 73, 80, 85, 110, 111.
पामुडिपट्टणाधिप 57
पार्वती 3, 33, 34, 72, 73, 74, 76, 80, 83, 84, 85, 89, 91, 103, 110.
पार्वतीतीर्थ 22
पार्वतीवृक्ष 63
पुण्याहवाचन 101
पूर्णोदर 11
पूर्वदेव 13
पूर्वमहागोपुर 27
पूषन् 30
पञ्चाननोत्सव } 10
पञ्चमुखोत्सव }
पञ्चामृत 4
पाञ्चाल 57
पम्पाधिनाथ 24
पम्पानाथ 85, 96
पम्पापति 1, 2, 4, 5, 6, 7, 10, 12, 13, 16, 20, 22, 25, 27, 28, 32, 50, 52, 56, 57, 58, 59, 60, 62, 63, 66, 67, 69, 71, 75, 80, 83, 84, 85, 87, 109, 110, 111.
पम्पार्थ 22
पम्पारमण 65, 80
पम्पेश 76, 86, 110
पम्पाम्बिका 33, 6, 60
पम्पानगर 13, 41, 47, 55, 57, 58, 71. 35, 58, 81,
,, पुर 82, 60
,, पुरी
,, क्षेत्र

पम्पारण्य 63, 65, 69, 77
प्रपामण्टप 2
प्रमथगणाध्यक्ष 24
प्रवर्ग्य 44
प्राचीनमहागोपुर 10, 20
प्राभाकर 25
प्रापणीय 44

ब

बलारिनगराधीश्वर 13
बलि 1, 54, 105

भ

भवानी 58
भुजङ्गनगराधिप 19
भुवनेश्वरी 58
भूमण्डलाचार्य 33
भृगुपतन 30

म

मतङ्ग } 13, 22, 24, 29, 33
मतङ्गाद्रि }
मल्लारिगिरि 19
मल्लेश्वर 17
महामह 17, 34, 75
महाराज 32
महीसुरपुर 15
महोत्सव 3, 30, 73, 81, 82, 83, 94, 95, 96
माणवक 6
माधव 11
माधव 99, 111
माधवनवरात्रोत्सव 58, 85
माधवमहामह 10
मित्र 16
मुद्रितमहावराहकनकशकल 8
मुख्यप्राण 45
मृकण्डुमुनिकुमार 26, 59
मृकण्डुसूनु 65
मृगयामहोत्सव 57, 59, 72
,, रम्भोत्सव 64
मृगयोत्सव 66, 68

य

यवनिका 74

र

रत्नाङ्गुलीयक 69
राजशेखर 68
राजाधिराज 6, 7, 17, 32, 47
रामेश्वर 68
रायदुर्गनगराधिपति 17
रङ्गनाथ 110

ल

लक्ष्मणेश्वरपुर
लक्ष्मीवृक्ष 63

व

वनेचरवंश 18
वसन्तोत्सव 55, 56, 76, 84, 111
वसिष्ठ 85
वराटिका 5
वामदेव 81, 85
वराहमुद्रितकनकखण्डार्धशकल 100
वालिभाण्डारगण्डशैल } 64
सुग्रीवाग्रजगण्डशैल }
विक्रमाङ्क 16
विजयनगर 97
,, पुर 106

विद्याधर 13, 16
विद्या (पुर) 58
विद्यानगर 12, 32, 38, 110
विद्यानगरेश—रीश 6, 7, 19, 47, 52, 66, 85
विभूति 14
विरुपाक्ष 1, 5, 6, 14, 23, 24, 26, 27, 28, 29, 30, 31, 32, 33, 35, 41, 49, 55, 57, 59, 60, 62, 63, 68, 69, 75, 80, 84, 85, 111
विष्टपेश—विष्टपगुरु 10, 14, 29, 33, 47, 58, 59, 83
विष्णुवल्लभरथ 23
वीरप्रताप 6
वीळिका 54
वेत्रपुटिका 21
वेदप्रामाण्य 25
वेदान्त 33
वेंकटाचलपति 19
वंशनामनगरी 19

श

शिवनगर 72
शिवनाटक 19, 71
शिवमधूत्सक 11
शिवरथ 17
शिवरहस्य 62
शिवलिङ्ग 1, 4, 6, 8, 62, 63, 75, 83, 85, 89, 96
शिवाष्टपद्य 71
शून्यवादि 36
शैवमहामह 14
शैवागम 75, 76, 80
शंकरभगवत्पाद 25
शंकरभट्ट 103, 106, 107
श्वेताश्वत्थ 12
श्रीगुरुभट्टार्य, ,, श्रीगिरिभट्टार्य 6, 12
श्रीनिवास 19
श्रीनिवासमूर्ति 19
श्रीराशिदेश 6
श्रीराशिदेशाधिपति 16, 59, 66

स

सद्गुरूपाध्याय 19
सप्तकोटि 19
सालभंजिका 1
साप्तपदीन 19
सारणविधि 85
सार्वभौम 17
सिद्धि 13
सिद्धरामेश्वर 17
सेश्वरवाद 25
सोमान्मय 14
स्कान्द 62

ह

हनूमत्सरित् 63, 65
हरदत्ताचार्य 62
हरपुराधिप 19
हरिवंश 89
हेमकूट 13, 22, 29, 33, 47